# सुश्रुतसंहिता

## उत्तरतन्त्रम् ।

ऊनचत्वारिंशत्तमादध्यायात् षट्षष्टितमान्तिमाध्यायपर्य्यन्तम्

कविराज-श्रीहाराणचन्द्रचक्रवर्त्ति-विरचित-

सुश्रुतार्थसन्दीपनभाष्य-समेतम् ।

कलिकाताराजकीयसंस्कृतविद्यालयाध्यापक-
स्वर्गत-यामिनीनाथतर्कवागीश—
मूलाजोड़ संस्कृतविद्यालयाध्यापक
श्रीयुक्त-निशिकान्ततर्कतीर्थ-
प्रमुखैः पण्डितप्रवरैः संशोधितम्

कलिकाताराजधान्यां
राधानाथवसुलेन ( गुयाबागान ) इति प्रसिद्धवर्त्मस्थित-
सप्तदशसङ्ख्यक भवनविन्यस्तविद्योदययन्त्रे
श्रीपूर्णचन्द्रचक्रवर्त्तिना मुद्रितम् ।

रामपुर-बोयालियानिवासि—
श्रीलजगदीशचन्द्रचक्रवर्त्तिना प्रकाशितम् ।



शकाब्दाः १८४८

मूल्यं सार्द्धरूप्यकद्वयम्, प्रेरणव्ययश्चाणकपञ्चकम् ।

# सुश्रुतसंहिता

## उत्तरतन्त्रम् ।

ऊनचत्वारिंशत्तमादध्यायात् षट्षष्टितमान्तिमाध्यायपर्य्यन्तम्

**कविराज-श्रीहाराणचन्द्रचक्रवर्त्ति-विरचित-**

सुश्रुतार्थसन्दीपनभाष्य-समेतम् ।

कलिकाताराजकीयसंस्कृतविद्यालयाध्यापक-

**स्वर्गत-यामिनीनाथतर्कवागीश—**

मूलाजोड़ संस्कृतविद्यालयाध्यापक

**श्रीयुक्त-निशिकान्ततर्कतीर्थ-**

प्रमुखैः पण्डितप्रवरैः संशोधितम् ।

**कलिकाताराजधान्यां**

राधानाथवसुलेन ( गुयावागान ) इति प्रसिद्ध वर्त्मस्थित-

सप्तदशसङ्ख्यक भवनविन्यस्तविद्योदययन्त्रे

श्रीपूर्णचन्द्रचक्रवर्त्तिना मुद्रितम् ।

रामपुर-बोयालीयानिवासि—

श्रीलजगदीशचन्द्रचक्रवर्त्तिना प्रकाशितम् ।

प्राप्तव्यश्चैतत्—भाष्यकार-प्रकाशकयोः सविधे

शकाब्दाः १८४८

मूल्यं सार्द्धरूप्यकद्वयम्, विदेशव्ययसहितरूप्यकत्रयम् ।

# कल्पस्थानस्य सूचिपत्रम्।



समाप्तमिदं कल्पस्थान-सूचिपत्रम्।

## उत्तरतन्त्रस्य सूचिपत्रम्।



समाप्तमिदं शालाक्यतन्त्र सूचिपत्रम्।

त्रिचत्वारिंशोऽध्याय: ।



चतुश्चत्वारिंशोऽध्याय: ।



पञ्चचत्वारिंशोऽध्याय: ।



षट्चत्वारिंशोऽध्याय: ।



सप्तचत्वारिंशोऽध्याय: ।

समाप्तमिदमुत्तरतन्त्र-सूचिपत्रम् ।

समाप्तमिदं सुश्रुतसंहिता-सूचिपत्रम् ।

# सुश्रुतसंहिता।

## कल्पस्थानम्।



## प्रथमोऽध्यायः।

अथातोऽन्नपानरक्षाकल्पं व्याख्यास्यामः ॥ १ ॥

धन्वन्तरिः काशिपतिस्तपोधर्म्मभृतां वरः।

सुश्रुतप्रभृतीन् शिष्यान् शशासाहतशासनः ॥ २ ॥

रिपवो विक्रमाक्रान्ता ये च स्वे कृत्यतां गताः।

---

न खल्वल्पबुद्धयो भिषजः सर्व्वमपि सम्भूय कथमपि विषस्यानिष्टापादानि तानि तान्यनिर्व्वचनीयानि कर्म्माण्यपाकर्त्तुं प्रभवन्त्यातुरमुत्थापयितुं नितरामाशुविकल्पेनाशुकारित्वेन च दुष्प्रतीकारतमं हि तदित्यतः प्रतीकारविधौ भिषजां चातुर्य्यमभिनिर्व्वर्त्तयितुं चिकित्सितस्थानमुपदिश्यावसरप्राप्तमादौ यथापूर्व्वादिदर्शितत्वेन विषकल्पं बुद्धिविषयमानीय कल्पस्थानमारिप्समानो भगवान् प्रागेवान्नपानाश्रयतो जिघांसूनां विषोपयोगप्रयत्नचातुर्य्यमभिसमीक्ष्य राज्ञां नराणाञ्च रक्षार्थमन्नपानरक्षाकल्पं नामाधिकरोति अथात इत्यादिना। अन्नपानग्रहणमत्र अवश्याविशेषेण भक्ष्यपेयवदुदन्तकाष्ठादीनामप्युपलक्षयत इत्यवश्यं वक्ष्यं परमतस्तेषामप्युपदेशात्। तानि च साधारणशब्दविशेषाद्विनजुष्टान्येवाभिप्रेयन्त इति निर्णीयते तान्येव हि प्रक्षोभमतः कतृकं व्याधिव्याधितमयं व्याकरिष्यतीति सुधियः शृणुध्वम्, आरभन्ति च "हृदये सन्निरुध्य तच्चैवाचिर्णीयते" इति। तथाच विषसंपृक्तान्नपानभक्ष्यदन्तकाष्ठादितो रक्षा अन्नपानरक्षेति वाक्यार्थः ॥ १ ॥

धन्वन्तरिरिति। शौर्य्यातिशयेनाभिभूता विक्रमाक्रान्ताः। स्वे आत्मीयाः

सिद्धयश्च: क्रोधविषं विवरं प्राप्य तादृशम् ॥
विषैर्निहन्युर्निपुणं नृपतिं दुष्टचेतसः ।
स्त्रियो वा विविधान् योगान् कदाचित् सुभगेच्छया ॥
विषकन्योपयोगाद्वा क्षणाज्जह्यादसून् नरः ।
तस्मादेतेन सततं विषाद्रक्ष्यो नराधिपः ॥ ३ ॥
यस्माच्च चेतोऽनित्यत्वमश्नुवत् प्रथितं नृणाम् ।
न विश्वसेत् ततो राजा कदाचिदपि कस्यचित् ॥ ४ ॥

---

जातानां चेष्टताम्, "आज्ञाकिया देवतयोः स्त्रिषु विहितकार्ययोः" इति मेदिनी । पूर्वं द्वि नि० ७ प० निरदिशत् "स्त्रियोऽश्वपानं नखरोमसूत्र-विड्मूत्रैर्मूत्रमसाधुवृत्ताः" तदिदं साम्प्रतमुक्तं स्त्रिय इति । सुभगेच्छया परमप्रियाभाविनात्मनि सौभाग्यस्याभिलाषया नितरां प्रियाबुभूषया चेत्यर्थः, प्रयुञ्जन्तीति योग्यक्रियाध्याहारः शिष्टानुमतः । विषकन्येति । नैव "भद्रा-तिथिर्यदार्क्षं वा शतभं कृत्तिका तथा । मन्दारकविवारा चेद्विषकन्याबुधैः कृता" इति नारीजातकोक्ता विषकन्याभिप्रेयते प्रकरणविरोधात्; किन्तर्हि बाल्यतः किञ्चित् किञ्चिद्विवर्धन्तीक्ष्णविषाभ्यसनात् विषमयीकन्या विष-कन्येति प्राहुः "कन्यां तीव्रविषप्रयोगविषमाम्" इति तत्रभवान् विशाख-दत्तश्च । उपयोगात् शयनमारोप्य संसर्गादित्याहुः । अत्र कश्चिदाह "हन्ति स्पृशन्ती स्वेदेन विषकन्या हि मैथुने हतधृष्टाञ्च वार्त्ताकीमिव मेढ्रं करोति सा ।" इति । तस्मादिति । अत्र राजनि रक्षिते सर्वं सुरक्षितं भविष्य-तीति सम्प्रधार्यैव नराधिप इति । यस्मादिति । प्रकृतोपन्यासादौचित्य-मर्थान्तरन्यासः । चेतोऽनित्यत्वं मुहुर्मुहुः सदसद्भावानुसारित्वेनास्थिरत्वम्, तथास्थिरत्वं निश्चयेन प्राकृतिकं संविदेवेत्यावेदयितुं दृष्टान्तत्वेनोपन्यस्य-त्यश्नुवदिति । एतावता सुहृदोऽपि नातिविश्वसनीया इत्यायातम् । चाणक्ये

कुलीनं धार्म्मिकं स्निग्धं सुभृतं सततोत्थितम् ।
अलुब्धमशठं भक्तं कृतज्ञं प्रियदर्शनम् ॥
क्रोध-पारुष्य-मात्सर्य्य-मदालस्यविवर्ज्जितम् ।
जितेन्द्रियं क्षमावन्तं शुचिं शीलदयान्वितम् ॥
मेधाविनमसंश्रान्तमनुरक्तं हितैषिणम् ।
पटुं प्रगल्भं निपुणं दक्षं मायाविवर्ज्जितम् ॥
पूर्व्वोक्तैश्च गुणैर्युक्तं नित्यं सन्निहितागदम् ।
महानसे प्रयुञ्जीत वैद्यं तद्विद्यपूजितम् ॥ ५ ॥
प्रशस्तदिग्देशकृतं शुचिभाण्डं महच्छुचि ।
सजालकं गवाक्षाढ्यमाप्तवर्गनिषेवितम् ॥
विकक्षसृष्टसंसृष्टं सवितानं कृतार्च्चनम् ।
परीक्षितस्त्रीपुरुषं भवेच्चापि महानसम् ॥
तत्राध्यक्षं नियुञ्जीत प्रायोवैद्यगुणान्वितम् ।
शुचयो दक्षिणा दक्षा विनीताः प्रियदर्शनाः ॥
संविभक्ताः सुमनसो नीचकेशनखाः स्थिराः ।
स्नाता दृढं संयमिनः कृतोष्णीषाः सुसंयताः ॥

---

च "न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।" इति कस्यचिद्विति द्वितीयाप्राप्ते विवक्षातः षष्ठी, अविलपदसुखं वा ॥ २—४ ॥

ननु केवलं गते का गतिरित्याह कुलीनमिति । सुभृतं प्रचुरवृत्तिकम्, सततोत्थितो नित्योद्योगी, प्रगल्भः प्रतिभान्वितः, माया छद्मेति पर्य्यायौ । पूर्व्वोक्तैर्गुणैर्वैद्योक्तैः । अगदो विषहरमौषधमित्यनर्थान्तरम् । प्रशस्तादिगित्या- द्यौ आरभ्य हि "महानसञ्चापि कार्य्यमाप्तजनाम्" इति चरकसंहिता

तस्य चाज्ञाविधेयाः स्युर्विविधाः परिचारकाः॥
आहारस्थितयश्चापि भवन्ति प्राणिनो यतः।
तस्मान्महानसे वैद्यः प्रमादरहितो भवेत्॥
माहानसिकवोढारः सौपौदनिक-पौपिकाः।
भवेयुर्वैद्यवशगा ये चाप्यन्ये तु केचन॥ ६॥
इङ्गितज्ञो मनुष्याणां वाक्चेष्टामुखवैकृतैः।
विद्यादिषस्य दातारमेभिर्लिङ्गैश्च बुद्धिमान्॥
न ददात्युत्तरं पृष्टो विवक्षन् मोहमेति च।
अपार्थं बहु सङ्कीर्णं भाषते चापि मूढवत्॥
स्फोटयत्यङ्गुलीर्भूमिमकस्मादिलिखेद्धसेत्।
वेपथुर्जायते तस्य त्रस्तश्चान्योन्यमीक्षते॥
क्षामो विवर्णवक्त्रश्च नखैः किञ्चिच्छिनत्त्यपि।
आलभेतासकृद्दीनः करेण च शिरोरुहान्॥

---

५२।११६। देशस्य प्राशस्त्यन्तु [illegible] लक्षणीयम्, तथा एव अदः प्राशस्त्येनाभिधानात्। शुचि गोमयादिलिप्तत्वेन संयुक्तम्। विगतो [illegible] विकल्प[illegible]। [illegible] जलार्चनं नित्यं तत्र स्वाद्युपहारेण [illegible]देवपूजनम्। दक्षिणा [illegible] समलङ्कृताः, संविभक्ताभाजनाः कर्मसु नियुक्ताः॥ ५—६॥

सम्प्रति "दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति।" इत्यादि "७अ० १८श्लो०" मनुस्मरणात् दण्डेन विषोपयोगशङ्कां तां समूलयन्नुप-

निर्विशासुरपदारैर्वीक्षते च पुनःपुनः ॥
वर्त्तते विपरीतस्तु विषदाता विचेतनः ॥ ७ ॥
केचिद्भयात् पार्थिवस्य त्वरिता वा तदाज्ञया ।
असतामपि सन्तोऽपि चेष्टां कुर्व्वन्ति मानवाः ॥ ८ ॥
तस्मात् परीक्षणं कार्य्यं भृत्यानामादितो नृपैः ।
अन्ने पाने दन्तकाष्ठे तथाऽभ्यङ्गेऽवलेखने ॥
उत्सादने कषाये च परिषेकेऽनुलेपने ।
स्रक्षु वस्त्रेषु शय्यासु कवचाभरणेषु च ॥
पादुकापादपीठेषु पृष्ठेषु गजवाजिनाम् ।
विषजुष्टेषु चान्येषु नस्यधूमाञ्जनादिषु ।
लक्षणानि प्रवक्ष्यामि चिकित्सामप्यनन्तरम् ॥ ९ ॥
नृपभक्ताद्बलिं न्यस्तं सविषं भक्षयन्ति ये ।
तत्रैव ते विनश्यन्ति मक्षिकावायसादयः ॥
हुतभुक्तेन चान्नेन भृशं चटचटायते ।
मयूरकण्ठप्रतिमो जायते चापि दुःसहः ।
भिन्नार्च्चिस्तीक्ष्णधूमश्च न चिराच्चोपशाम्यति ॥
चकोरस्याक्षिवैराग्यं जायते क्षिप्रमेव तु ।
दृष्ट्वान्नं विषसंसृष्टं म्रियन्ते जीवजीवकाः ॥

---

वक्तुं लक्षणतो विषदातारं निर्दिदिक्षति इङ्गितज्ञ इति । इङ्गितोनाम स्वाभिप्रायसूचको भावविशेषः । पावकेनेति पाक्पूर्व्वैरभिः स्वर्गार्थैः केचिद्भयलोभात्, असतां विषदानकम् ॥ ७—८ ॥

कोकिलः स्वरवैकृत्यं क्रौञ्चस्तु मदमृच्छति ।
हृष्येन्मयूर उद्विग्नः क्रोशतः शुकसारिके ॥
हंसः क्ष्वेडति चात्यर्थं भृङ्गराजस्तु कूजति ।
पृषती विसृजत्यश्रु विष्ठां मुञ्चति मर्कटः ॥
सन्निकृष्टांस्ततः कुर्याद्राजा तान् मृगपक्षिणः ।
विषघ्नोऽथ विभूषार्थं रक्षार्थञ्चात्मनः सदा ॥ १० ॥
उपघ्रातस्य चान्नस्य वाष्पेणोर्द्ध्वं प्रसर्पता ।
हृत्पीडा भ्रान्तनेत्रत्वं शिरोदुःखञ्च जायते ॥
तत्र नस्याञ्जने कुष्ठं रामठं नलदं मधु ।
कुर्याच्छिरीषरजनी-चन्दनैश्च प्रलेपनम् ।
हृदि चन्दनलेपस्तु तथा सुखमवाप्नुयात् ॥ ११ ॥
पाणिप्राप्तं पाणिदाहं नखशातं करोति च ।
अत्र प्रलेपः श्यामेन्द्रगोपसोमोत्पलानि च ॥ १२ ॥
स चेत् प्रमादान्मोहाद्वा तदन्नमुपसेवते ।
अष्ठीलावत् ततो जिह्वा भवत्यरसवेदिनी ॥

---

कृपेत्यादि । व्यस्तं त्यक्तम्, तेन सविषेणान्नेन हुतभुक् चट्चटायते इत्य-न्वयः दुःसहशीघ्रगन्धत्वे नेति ज्ञेयम् । वैराग्यं विशेषेण रागवत्त्वं, "अवि-चार्य हृष्टः चकोरोऽक्षिणी रक्ते भवतः" इति ७।२१७ श्लो० मन्वर्थमुक्तावली च । अत्र हृष्टाकमिति शब्देन लक्ष्यते । पृषतः शुक्लबिन्दुमान् मृगभेदः । उच्छिन्नस्य परिवेषितस्य । श्यामा श्यामलता [illegible] । इन्द्रगोपः कीटभेदः

तुद्यते दह्यते चापि श्लेष्मा चास्यात् प्रसिच्यते ।
तत्र वाग्वेरितं कर्म्म यच्च स्याद्दान्तकाष्ठिकम् ॥ १३ ॥
मूर्च्छां छर्द्दिमतीसारमाध्मानं दाहवेपथू ।
इन्द्रियाणाञ्च वैकृत्यं कुर्य्यादामाशयं गतम् ॥
तत्राशु मदनालावु-विम्बीकोशातकीफलैः ।
छर्द्दनं दध्युदश्विद्भ्यामथवा तण्डुलाम्बुना ॥ १४ ॥
दाहं मूर्च्छामतीसारं तृष्णामिन्द्रियवैकृतम् ।
आटोपपाण्डुतां कार्श्यं कुर्य्यात् पक्वाशयं गतम् ॥
विरेचनं ससर्पिष्कं तत्रोक्तं नीलिनीफलम् ।
दध्ना दूषीविषारिश्च पेयो वा मधुसंयुतः ॥ १५ ॥
द्रवद्रव्येषु सर्व्वेषु क्षीरमद्योदकादिषु ।
भवन्ति विविधा राज्यः फेनबुद्बुदजन्म च ॥
छायाश्चात्र न दृश्यन्ते दृश्यन्ते यदि वा पुनः ॥
भवन्ति यमलाश्छिद्रास्तन्व्यो वा विकृतास्तथा ॥ १६ ॥
शाकसूपान्नमांसानि क्लिन्नानि विरसानि च ।
सद्यः पर्य्युषितानीव विगन्धानि भवन्ति च ॥ १७ ॥

---

क्षौमः कर्पटः । वाग्वेरितं कर्म्म "अत्र नश्यत्यने कृतम्" इत्यादिना प्रागुक्तम् । दान्तकाष्ठिकञ्च "पर्य्येत्यादिना" वक्ष्यमाणम् । उदश्विदर्द्धजलेन मथितं तक्रम् । नीलिनी 'नील' इत्यभिधीयते । दूषीविषारिः "पिप्पल्यः" इत्यादिना विषोपयोगे निर्देक्ष्यते । छाया प्रतिच्छाया प्रतिबिम्बमित्येतत् । यमला युग्माः, छिद्राश्छिद्रिताः ॥ १०—१६ ॥

गन्धवर्णरसैर्हीनाः सर्व्वे भक्ष्याः फलानि च ।
पक्वान्याशु विशीर्य्यन्ते पाकमामानि यान्ति च ॥ १८ ॥
विशीर्य्यते कूर्च्चकस्तु दन्तकाष्ठगते विषे ।
जिह्वादन्तौष्ठमांसानां श्वयथुश्चोपजायते ॥ १९ ॥
अथास्य धातकीपुष्पपथ्याजम्बुफलास्थिभिः ।
सक्षौद्रैः प्रच्छिते शोफे कर्त्तव्यं प्रतिसारणम् ॥
अथवाङ्कोठमूलानि त्वचः सप्तच्छदस्य वा ।
शिरीषमाषका वापि सक्षौद्राः प्रतिसारणम् ॥ २० ॥
जिह्वानिर्लेखकवलौ दन्तकाष्ठवदादिशेत् ॥ २१ ॥
पिच्छिलो बहलोऽभ्यङ्गो विवर्णो वा विषान्वितः ।
स्फोटजन्मरुजास्राव-त्वक्पाकस्वेदनं ज्वरः ॥
दरणञ्चापि मांसानामभ्यङ्गे विषसंयुते ।
तत्र शीताम्बुसिक्तस्य कर्त्तव्यमनुलेपनम् ॥
चन्दनं तगरं कुष्ठमुशीरं वेणुपत्रिका ।
सोमवल्ल्यमृता श्वेता पद्मं कालीयकं त्वचम् ।
कपित्थरसमूत्राभ्यां पानमेतच्च युज्यते ॥ २२ ॥
उत्सादने परीषेके कषाये चानुलेपने ।
शय्यावस्त्रतनुत्रेषु ज्ञेयमभ्यङ्गलक्षणैः ॥ २३ ॥

---

शाकेत्यादि कूर्च्चकोऽग्रभागो विलोऽयः । कुतश्चित्तामाषा माषकाख्यात्-वाग्भटादयपरेऽस्य: शिरीषमाषकाः शिरीषबीजानीति विजयः । वेणुपत्रिका

केशशातः शिरोदुःखं खेभ्यश्च रुधिरागमः।
ग्रन्थिजन्मोत्तमाङ्गेषु विषजुष्टे तु लेपने॥
प्रलेपो बहुशस्तत्र भाविताः कृष्णमृत्तिकाः।
कृष्णपित्तघृतश्यामा-पालिन्दीतण्डुलीयकैः॥
गोमयस्वरसो वापि हितो वा मालतीरसः।
रसो मूषिकपर्ण्या वा धूमो वागारसम्भवः॥ २४॥
शिरोऽभ्यङ्गः शिरस्त्राणं स्नानमुष्णीषमेव च।
स्रजश्च विषसंसृष्टाः साधयेदनुलेपवत्॥ २५॥
मुखलेपे मुखं श्यावं युक्तमभ्यङ्गलक्षणैः।
पद्मिनीकण्टकप्रख्यैः कण्टकैश्चोपचीयते॥
तत्र क्षौद्रघृतं पानं प्रलेपश्चन्दनं घृतम्।
पयस्या मधुकं फञ्जी बन्धुजीवपुनर्नवा॥ २६॥
अस्वास्थ्यं कुञ्जरादीनां लालास्रावोऽक्षिरक्तता।

---

वंशपत्रीतृणः सोमवल्ली सोमराजी, उत्पादन इति। कषाये प्रस्तुतत्वाद्-वल्कलादिना कर्णरोग इत्यर्थः। तन्मुखं कवचम्। श्रेयं विषलिङ्ग-मित्येव। अत्र प्रतीकारं प्रति तूष्णीम्भावाद् विचिकित्सां त्यक्त्वा चिकित्साभ्यङ्गवदेव भिषजोऽनुमिमन्तः। अत्र पुनरनुलेपनं प्रकृत्य लक्षणतः प्रतीकारतश्च किञ्चिद्विशिनष्टि। केशेति। तुशब्दोऽयं विशेषणार्थः। लेपन-मनुलेपनमित्यनर्थान्तरम्। कृष्णा हरिद्राभेदः, श्यामा प्रियङ्गुः, पालिन्दी श्यामालता। शिर इति। अत्रानुलेपवदित्यनेनाभ्यङ्गोक्तः प्रलेप इत्यादि-नोक्तविधौ अतिदिष्टावित्यनुसन्धेयम्॥ १७—२५॥

स्फिक्पायुमेढ्रमुष्केषु युक्तेषु स्फोटसम्भवः ॥
तत्राभ्यङ्गवदिष्टा यानवाहनयोः क्रिया ॥ २७ ॥
शोणितागमनं खेभ्यः शिरोरुक् कफसंस्रवः ।
नस्यधूमगते लिङ्गमिन्द्रियाणान्तु वैकृतम् ॥
तत्र दुग्धैर्गवादीनां सर्पिः सातिविषैः शृतम् ।
पाने नस्ये च सश्वेतं हितं समदयन्तिकम् ॥ २८ ॥
गन्धहानिर्विवर्णत्वं पुष्पाणां म्लानता भवेत् ।
जिघ्रतश्च शिरोदुःखं वारिपूर्णे च लोचने ॥
तत्र वाष्पेरितंकर्म्म मुखालेपे च यत् स्मृतम् ॥ २९ ॥
कर्णतैलगते श्रोत्रवैगुण्यं शोफवेदने ।
कर्णस्रावश्च तत्राशु कर्त्तव्यं प्रतिपूरणम् ॥
स्वरसो बहुपुत्रायाः सघृतः क्षौद्रसंयुतः ।
सोमवल्करसश्चापि सुशीतो हित इष्यते ॥ ३० ॥
अश्रूपदेहो दाहश्च वेदना दृष्टिविभ्रमः ।
अञ्जने विषसंसृष्टे भवेदान्ध्यमथापि वा ।
तत्र सद्योघृतं पेयं तर्पणञ्च समागधम् ।
अञ्जनं मेषशृङ्गस्य निर्यासो वरुणस्य च ॥

---

मुखेत्यादि । बन्धुजीवो बन्धूकः । कुञ्जरादीनामित्यादिग्रहणात् पदाति प्रभृतीनामादेयः । याता गन्ता पदातिश्चेति यावत् । गन्धेत्यादि । पुष्पाणां विषजुष्टानामित्येव । वाष्पेरितं कर्म "तत्र नस्याञ्जने" इत्यादिना प्राङ्निर-दिष्टम् । सोमवल्कः श्वेतखदिरः । अश्वित्यादि । उपदेह शब्दस्येह दूषिकायां

मुष्ककक्षाजकर्णश्च फेनो गोपित्तसंयुतः।
कपित्थमेषशृङ्गोश्च पुष्पं भल्लातकस्य वा।
एकैकं कारयेत् पुष्पं बन्धूकाङ्कोठयोरपि॥ ३१॥
शोफः स्रावस्तथा स्वापः पादयोः स्फोटजन्म च।
भवन्ति विषजुष्टाभ्यां पादुकाभ्यामसंशयम्॥
उपानत्पादपीठानि पादुकावत् प्रसाधयेत्॥
भूषणानि हतार्चींषि न विभान्ति यथा पुरा।
स्वानि स्थानानि हन्युश्च दाहपाकावदारणैः॥
पादुकाभूषणे युक्तमभ्यङ्गविधिमाचरेत्॥ ३२॥
विषोपसर्गो वाऽप्यादिर्भूषणान्तो य ईरितः।
समोक्ष्योपद्रवांस्तस्य विदधीत चिकित्सितम्॥
महासुगन्धिमगदं यं प्रवक्ष्यामि तं भिषक्।
पानालेपननस्येषु विदधीताञ्जनेषु च॥ ३३॥
विरेचनानि तीक्ष्णानि कुर्य्यात् प्रच्छर्दनानि च।
शिराश्च व्यधयेत् क्षिप्रं प्राप्तं विस्रावणं यदि॥ ३४॥

---

तात्पर्य्यम्। भल्लातकमिति "पुष्पं बन्धूकाङ्कोठयोरपि" इत्यन्तेन यथायोगं योजनीयम्। शोफ इति। उपानच्छब्देनेह काष्ठपादुकैवाभिप्रेयते पादुकाशब्दस्याभिधानात्। पादपीठं पादस्थापनमासनं "सिंहासनं तस्य सपादपीठम्" इत्यभिधानात्। पादुकावदित्यतिदिष्टातिदेशः। पठन्ति हि "पादुका भूषणे युक्तमभ्यङ्गविधिमाचरेत्" इति॥ २६—३२॥

विषोपसर्ग इत्यादि। प्रवक्ष्यामि सप्तमेऽध्याये "चन्दनागुरुणी" इत्यादिनेति शेषः। मासं 'शा० ८ अ०' अभिवीक्ष्य प्रतिषिद्धेतरत्वेन युक्तमित्यर्थ-

मूषिकाजरुहा वापि हस्ते बद्धा तु भूपतेः ।
करोति निर्व्विषं सर्व्वमन्नं विषसमायुतम् ॥
हृदयावरणं नित्यं कुर्य्याच्च मित्रमध्यगः ॥
पिबेद्घृतमजेयाख्यममृताख्यञ्च बुद्धिमान् ।
सर्पिर्दधि पयः क्षौद्रं पिबेद्वा शीतलं जलम् ॥
मयूरान् नकुलान् गोधाः पृषतान् हरिणानपि ।
सततं भक्षयेच्चापि रसांस्तेषां पिबेदपि ॥
गोधानकुलमांसेषु हरिणस्य च बुद्धिमान् ।
दद्यात् सुपिष्टां पालिन्दीं मधुकं शर्करां तथा ॥
शर्करातिविषे देये मायूरे समहौषधे ।
पार्षते चापि देयाः स्युः पिप्पल्यः समहौषधाः ॥
सक्षौद्रः सघृतश्चैव शिम्बीयूषो हितः सदा ।
विषघ्नानि च सेवेत भक्ष्यभोज्यानि बुद्धिमान् ॥ ३५ ॥
पिप्पलीमधुकक्षौद्र-शर्करेक्षुरसाम्बुभिः ।
छर्द्दयेत् गुप्तहृदयो भक्षितं यदि वा विषम् ॥ ३६ ॥

---

निष्कर्षः । अत्र मूषिकामजरुहाच्च विजिज्ञासस्व । हृदयावरणम् अगदाद्युपसेवनेनेति ज्ञेयम् । अजेयामृताख्ये द्वे घृते द्वितीये सप्तमे च कल्पे मधुकमित्यादिना अपामार्गस्येत्यादिना च निवेदयिष्येते । मयूरानित्यादिना सामान्येनोक्तमर्थं पुनर्व्विभिनष्टि गोधेत्यादिना श्लोकेन । पालिन्दीं श्यामलतां गोधादि मांसरसेषु कल्कीकृत्य दद्यादित्युपदेशः । गुप्तहृदयो विषहरौषधैराहृतहृदयः । अवशिष्टमतिरोहितार्थम् ॥ ११—३६ ॥

इति सुश्रुतसंहितायां कल्पस्थाने अन्नपानरक्षा-
कल्पोनाम प्रथमोऽध्यायः ॥ १ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
कल्पस्थाने अन्नपानरक्षाकल्पोनाम प्रथमोऽध्यायः ॥

---

## द्वितीयोऽध्यायः ।

अथातः स्थावरविषविज्ञानीयमध्यायं व्याख्यास्यामः ॥१॥

स्थावरं जङ्गमञ्चैव द्विविधं विषमुच्यते ।
दशाधिष्ठानमाद्यन्तु द्वितीयं षोड़शाश्रयम् ॥ २ ॥

मूलं पत्रं फलं पुष्पं त्वक् क्षीरं सार एव च ।
निर्यासो धातवश्चैव कन्दश्च दशमः स्मृतः ॥ ३ ॥

---

नन्वस्मिन् विषसंसृष्टान्नादितो रक्षोपायेऽस्मिन् प्रपञ्चेनोपदिष्टेऽप्येकान्तेन प्रकारादितो विषाणभिज्ञानामस्माकं सम्यक् शुश्रूषा निरस्तेति अतिमेदमा-श्राय कतिधा विषमुपदिशन्त्यायुर्वेदविदः कियन्ति कतमानि चाप्यधिष्ठानानि कतात्ते कानि प्रकोपनानि प्रशमनानि वा भवन्तीति निरवशेषं विज्ञापयतु भगवानित्येवमनुयुक्तः शिष्याणां प्रतिपित्सितमर्थजातं क्रमशः प्रतिपादयन् प्रथमन्तावत् स्वीकृताध्यायमवलम्ब्य स्थावरविषविज्ञानीयं नामाधिकरोति अथात इत्यादिना ॥ १—२ ॥

तत्र शीतकाश्वमार-गुञ्जा-सुवल्य-गर्गरक-करघाट-विद्यु-च्छिखाविजयानीत्यष्टौ मूलविषाणि ॥ ४ ॥

विषपत्रिका-लम्बा-वरदारुक-करम्भ-महाकरम्भाणि पञ्च पत्र विषाणि ॥ ५ ॥

कुमुदती-रेणुका-करम्भ-महाकरम्भ-कर्कोटक-रेणुक-खद्योतक-चर्मरीभगन्धा-सर्पघाति-नन्दन-सारपाकाणीति द्वादश फलविषाणि ॥

वेत्र-कादम्ब-वल्लिज-करम्भ-महाकरम्भाणि पञ्च पुष्पविषाणि ॥ ७ ॥

अन्त्रपाचक-कर्त्तरीय-सौरीयक-करघाट-करम्भ-नन्दन-नराटकानि सप्त त्वक्सारनिर्यासविषाणि ॥ ८ ॥

कुमुदघ्नीस्नुहीजालक्षीर्याणि त्रीणि क्षीरविषाणि ॥ ९ ॥

फेणाश्मभस्म हरितालश्च द्वे धातुविषे ॥ १० ॥

कालकूट-वत्सनाभ-सर्षपक-पालक-कर्द्दमक-वैराटक-मुस्तक-शृङ्गीविष-प्रपौण्डरीक-मूलक-हालाहल-महाविष-कर्कटकानीति त्रयोदश कन्दविषाणि । इत्येवं पञ्चपञ्चाशत् स्थावरविषाणि भवन्ति ॥ ११ ॥

चत्वारि वत्सनाभानि मुस्तके द्वे प्रकीर्त्तिते ।
षट् चैव सर्षपाण्याहुः शेषाण्येकैकमेव तु ॥ १२ ॥

---

तत्रेत्यादि । अत्र चिस्नुही नामौषधिः 'मनसासिज' इति फेनाश्माच शीतकविजयाशङ्ख्य यथाक्रमं 'शिमुलीक्षार' इति 'दारमुच्' इति

उद्वेष्टनं मूलविषैः प्रलापो मोह एव च ।
जृम्भाङ्गोद्वेष्टनश्वासा ज्ञेयाः पत्रविषेण तु ॥
मुष्कशोफः फलविषैर्दाहोऽन्नद्वेष एव च ।
भवेत् पुष्पविषैश्छर्दिराध्मानं मोह एव च ॥
त्वक्सारनिर्यासविषैरुपयुक्तैर्भवन्ति हि ।
आस्यदौर्गन्ध्यपारुष्य-शिरोरुक्कफसंस्रवाः ॥
फेनागमः क्षीरविषे विड्भेदो जिह्वजिह्वता ॥ १३ ॥
हृत्पीड़नं धातुविषैर्मूर्च्छा दाहश्च तालुनि ।
प्रायेण कालघातीनि विषाण्येतानि निर्द्दिशेत् ॥ १४ ॥
कन्दजानि तु तीक्ष्णानि तेषां वक्ष्यामि विस्तरम् ।
स्पर्शाज्ञानं कालकूटे वेपथुः स्तम्भ एव च ॥
ग्रीवास्तम्भो वत्सनाभे पीतविण्मूत्रनेत्रता ॥
सर्षपे तालुवैगुण्यमानाहो ग्रन्थिजन्म च ।
ग्रीवादौर्ब्बल्यवाक्सङ्गौ पालकेऽनुमताविह ॥
प्रसेकः कर्द्दमाख्ये तु विड्भेदो नेत्रपीतता ।
वैराटकेनाङ्गदुःखं शिरोरोगश्च जायते ॥
गात्रस्तम्भो वेपथुश्च जायते मुस्तकेन तु ।

---

चाख्यायते हरितालचत्रेणोपदिश्यते वर्षकहरितालवत्ग्रपत्नीमन शिखा भेदात्, कालकूटादीनि चेपन्ने दस्तानादरेण सामान्यतः 'मिथ्या' इत्येवा-भिधीयते ; शिवाचि तथा कालकूटादीनां लक्षणानितु भेदानोक्तानेषु बह्वी-षेषु भिषजां सम्बन्धेष्वेकोऽपि कथमपि यथावद्विवेदयितुमोष्टे तदिदं ब्रूमः

गृञ्जीविषात्प्रसादाद्दाहोदरविद्रवयः ॥
पुण्डरीकेण रक्तत्वमक्ष्णोर्वृद्धिस्तथोदरे ।
वैवर्ण्यं मूलकैश्छर्दिर्हिक्काशोफप्रमूढताः ॥
चिरेणोच्छ्वसिति श्यावो नरो हालाहलेन वै ।
महाविषेण हृदये ग्रन्थिशूलोद्गमौ भृशम् ।
कर्कटेनोत्पतत्यूर्द्ध्वं हसन् दन्तान् दशत्यपि ॥ १५ ॥
कन्दजान्युग्रवीर्य्याणि प्रयुक्तानि त्रयोदश ।
सर्व्वाणि कुशलैर्ज्ञेयान्येतानि दशभिर्गुणैः ॥
रूक्षमुष्णं तथा तीक्ष्णं सूक्ष्ममाशु व्यवायि च ।
विकाशि विशदञ्चैव लघ्वपाकि च तत् स्मृतम् ॥
तद्रौक्ष्यात् कोपयेद्वायुमौष्ण्यात् पित्तं सशोणितम् ।
मानसं मोहयेत् तैक्ष्ण्यादङ्गबन्धांश्छिनत्त्यपि ॥
शरीरावयवान् सौक्ष्म्यात् प्रविशेद्विकरोति च ।
आशुत्वादाशु तद्धन्ति व्यवायात् प्रकृतिं भजेत् ॥
क्षपयेच्च विकाशित्वाद्दोषान् धातुमलानपि ।
वैशद्यादतिरिच्येत दुश्चिकित्स्यञ्च लाघवात् ।
दुर्ज्जरञ्चाविपाकित्वात् तस्मात् क्लेशयते चिरम् ॥ १६ ॥

---

अतएव सर्व्वात्मना यतस्तान्यत्वेतानि निरूपयितुं नानाजनपदानयनाच्च तावत् ॥ ४—१५ ॥

कन्दजानीति उग्रत्वादयः कर्म्मानुमेयाः कर्म्माणि हि येषां अग्रपाना-ध्यायेऽपि "दशकाविपरीतः स्यात्" इत्यादिना निरदिक्षत् तदिदं [illegible]

स्थावरं जङ्गमं यच्च कृत्रिमं चापि तद्विषम् ।
सद्यो व्यापादयेत् तत्तु ज्ञेयं दशगुणान्वितम् ॥ १७ ॥
यत् स्थावरं जङ्गमकृत्रिमं वा देहादशेषं यदनिर्गतं तत् ।
जीर्णं विषघ्नौषधिभिर्हतं वा दावाग्निवातातपशोषितं वा ॥
स्वभावतो वा गुणविप्रहीनं विषं हि दूषीविषतामुपैति ।
वीर्य्याल्पभावान्न निपातयेत् तत् कफावृतं वर्षगणानुबन्धि ॥१८
तेनार्द्दितो भिन्नपुरीषवर्णो विगन्धवैरस्यमुखः पिपासी ।
मूर्च्छन् वमन् गद्गदवाग्विषण्णो भवेच्च दूष्योदरलिङ्गजुष्टः ॥१९॥
आमाशयस्थे कफवातरोगी पक्वाशयस्थेऽनिलपित्तरोगी ।
भवेन्नरो ध्वस्तशिरोरुहाङ्गो विलूनपक्षस्तु यथा विहङ्गः ॥ २० ॥
स्थितं रसादिष्वथवा यथोक्तान् करोति धातुप्रभवान् विकारान्
कोपञ्च शीतानिलदुर्द्दिनेषु यात्याशु पूर्व्वं शृणु तत्र रूपम् ॥२१
निद्रागुरुत्वञ्च विजृम्भणञ्च विश्लेषहर्षावथवाङ्गमर्द्दः ।
ततः करोत्यन्नमदाविपाकावरोचकं मण्डलकोठमोहान् ॥
धातुक्षयं पादकरास्यशोफं दकोदरं छर्द्दिमथातिसारम् ।
वैवर्ण्यमूर्च्छाविषमज्वरान् वा कुर्य्यात् प्रवृद्धां प्रबलां तृषां वा ॥
उन्मादमन्यज्जनयेत् तथाऽन्यदानाहमन्यत् क्षपयेच्च शुक्रम् ।
गाद्गद्यमन्यज्जनयेच्च कुष्ठं तांस्तान् विकारांश्च बहुप्रकारान् ॥२२

---

"तद्दोषात् कोपयेत् वायुम्" इत्यादि । दावाग्निर्वनोद्भवोऽग्निः । अन्न-मदो भोजनात्परमतितरामालस्यम् । आनाहः "छ० ६५ प०" "आमं

दूषितं देशकालान्नदिवास्वप्नैरभीक्ष्णशः।
यस्माद्दूषयते धातून् तस्मात् दूषीविषं स्मृतम् ॥ २३ ॥
स्थावरस्योपयुक्तस्य वेगे तु प्रथमे नृणाम्।
श्यावा जिह्वा भवेत् स्तब्धा मूर्च्छा श्वासश्च जायते ॥
द्वितीये वेपथुः स्वेदो दाहः कण्डू रुजस्तथा।
विषमामाशयप्राप्तं कुरुते हृदि वेदनाम् ॥
तालुशोषं तृतीये तु शूलञ्चामाशये भृशम्।
दुर्व्वर्णे हरिते शूने जायेते चास्य लोचने ॥
पक्वाशयगते तोदो हिक्का कासोऽन्त्रकूजनम्।
चतुर्थे जायते वेगे शिरसश्चातिगौरवम् ॥
कफप्रसेको वैवर्ण्यं पर्व्वभेदश्च पञ्चमे।
सर्व्वदोषप्रकोपश्च पक्वाधाने च वेदना ॥
षष्ठे प्रज्ञाप्रणाशश्च भृशं वाप्यतिसार्य्यते।
स्कन्धपृष्ठकटीभङ्गः सन्निरोधश्च सप्तमे ॥ २४ ॥
प्रथमे विषवेगे तु वान्तं शीताम्बुसेवितम्।
अगदं मधुसर्पिर्भ्यां पाययेत समायुतम् ॥

---

शकृद्" इत्यादिना वक्ष्यमाणो रोगभेदः। गाढ़त्वमव्यक्तास्फुटत्वाव्यक्तत्वम्। दूषीविषशब्दं निर्व्वक्ति दूषितमिति ॥ १६—२३ ॥

स्थावरस्येत्यादि। आमाशयप्राप्तमिति प्रथमेऽपि वेगे विषस्यामाशयप्राप्तत्वेनोपलब्धादामाशयशब्दस्येह तत्सन्निहिते हृदि तात्पर्य्यं तथाचोपपन्नं भवति "हृदिवेदनाम्" इति। सन्निरोधः श्वासावरोधः। प्रथम इति। अगदं

द्वितीये पूर्ववद्वान्तं पाययेत् तु विरेचनम्।
तृतीयेऽगदपानन्तु हितं नस्यं तथाञ्जनम्॥
चतुर्थे स्नेहसंमिश्रं पाययेतागदं भिषक्।
पञ्चमे क्षौद्रमधुककाथयुक्तं प्रदापयेत्॥
षष्ठेऽतीसारवत् सिद्धिरवपीड़श्च सप्तमे।
मूर्द्ध्नि काकपदं कृत्वा सासृग्वा पिशितं क्षिपेत्॥
वेगान्तरे त्वन्यतमे कृते कर्म्मणि शीतलाम्।
यवागूं सघृतक्षौद्रामिमां दद्याद्विचक्षणः॥ २५॥
कोषातक्योऽग्निकः पाठासूर्य्यवल्ल्यमृताभयाः॥
शिरीषः किणिही शेलुः गिर्य्याह्वा रजनीद्वयम्॥
पुनर्नवे हरेणुश्च त्रिकटुः सारिवे बला।
एषां यवागूर्निःक्वाथे कृता हन्ति विषद्वयम्॥
मधुकं तगरं कुष्ठं भद्रदारुहरेणवः।
पुन्नागैलैलवालूनि नागपुष्पोत्पलं सिता॥
विड़ङ्गं चन्दनं पत्रं प्रियङ्गुध्यामकं तथा।
हरिद्रे द्वे बृहत्यौ च सारिवे च स्थिरा सहा॥
कल्कैरेषां घृतं सिद्धमजेयमिति विश्रुतम्।
विषाणि हन्ति सर्व्वाणि शीघ्रमेवाजितं क्वचित्॥ २६॥

परमतो मधुकमित्यादिना पिप्पल्य इत्यादिना च निर्दिदयिष्यते मूर्द्ध्नीति। काकपदं काकपदाकारं प्रच्छपदं कृत्वा। वा शब्दादवपीड़योपयोज्य इत्याख्यातम्। वेगान्तर इति। तु शब्दात् संज्ञादौ लब्धे चेत्यर्थं यम्। किणिही

दूषीविषार्त्तं सुस्विन्नमूर्द्धञ्चाधश्च शोधितम् ।
पाययेतागदं नित्यमिमं दूषीविषापहम् ॥
पिप्पल्यो ध्यामकं मांसी सावरः परिपेलवम् ।
सुवर्च्चिका ससूक्ष्मैला तोयं कनकगैरिकम् ॥
क्षौद्रयुक्तोऽगदो ह्येष दूषीविषमपोहति ।
एष नाम्ना विषारिस्तु न चान्यत्रापि वार्य्यते ॥ २७ ॥
ज्वरे दाहे च हिक्कायामानाहे शुक्रसंक्षये ।
शोफेऽतिसारे मूर्च्छायां हृद्रोगे जठरेऽपि वा ॥
उन्मादे वेपथौ चैव ये चान्ये स्युरुपद्रवाः ।
यथास्वं तेषु कुर्व्वीत विषघ्नैरौषधैः क्रियाम् ॥ २८ ॥
साध्यमात्मवतः सद्यो याप्यं संवत्सरोत्थितम् ।
दूषीविषमसाध्यन्तु क्षीणस्याहितसेविनः ॥ २९ ॥

इति सुश्रुतसंहितायां कल्पस्थाने स्थावरविषविज्ञानीयो नाम द्वितीयोऽध्यायः ॥ २ ॥

---

अपामार्गः, गिर्य्याह्वा गिरिकर्णिका अपराजितेति यावत् । पिप्पल्य इत्यादि । सावरो लोध्रः परिपेलवं कैवर्त्तमुस्तकम्, सुवर्चिका सर्ज्जिकाक्षारः जलिनि केचित् । तोयं ह्रीवेरम् । ज्वर इति । यथास्वं तत्र तत्रोपदिष्टं चिकित्सितमभिप्रेत्येत्यर्थनिष्कर्षः । परिशिष्टं निगदव्याख्यातम् ॥ २४ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये कल्पस्थाने स्थावरविषविज्ञानीयं नाम द्वितीयोऽध्यायः ।

# तृतीयोऽध्यायः ।

अथातो जङ्गमविषविज्ञानीयमध्यायं व्याख्यास्यामः ॥ १ ॥

जङ्गमस्य विषस्योक्तान्यधिष्ठानानि षोडश ।

समासेन मया यानि विस्तरस्तेषु वक्ष्यते ॥ २ ॥

तत्र दृष्टि-निश्वास-दंष्ट्रा-नख-मूत्र-पुरीष-शुक्र-लालार्त्तव-मुख-सन्दंश-विशर्द्धित-तुण्डास्थि-पित्त-शूक-शवानीति ॥ ३ ॥

तत्र दृष्टिनिश्वासविषास्तु दिव्याः सर्पाः । भौमास्तु दंष्ट्राविषाः । मार्ज्जार-श्व-वानर-मकर-मण्डूक-पाकमत्स्य-गोधा-शम्बूक--प्रचलाक--गृहगोधिका--चतुष्पादकीटास्तथान्ये दंष्ट्रानखविषाः ॥ ४ ॥

चिपिट-पिच्चटक-कषायवासिक-सर्षपवासिक-तोटक-वर्च्चः-कीट-कौण्डिन्यकाः शकृन्मूत्रविषाः ॥ ५ ॥

मूषिकाः शुक्रविषाः । लूतास्तु लालामूत्रपुरीषमुखसन्दंश-नखशुक्रार्त्तवविषाः ॥ ६ ॥

---

इतः पूर्व्वं "द्वितीयं षोडशाश्रयम्" इति यन्निरदिक्षत् तदेव पारिशेष्यादिदानीं विवक्षन् जङ्गमविषविज्ञानीयं नामाधिकरोति अथात इत्यादिना ॥१॥

जङ्गमस्येति । विशर्द्धितमपानशब्दं करोतीति विशर्द्धितोऽपानवातः । 'शृधु अपानशब्दे' इतिधात्वर्थस्मरणात् । समासोक्तमर्थं प्रपञ्चेनोपदिदिक्षति

वृश्चिकविश्वम्भरराजीवमत्स्योच्चिटिङ्गाः समुद्रवृश्चिकाश्च लालाविषाः ॥ ७ ॥

चित्रशिरःसरावकुर्दिशतदारुकारिमेदकशारिकामुखा मुखसन्दंशविशर्द्धितमूत्रपुरीषविषाः । मक्षिकाकणभजलायुका मुखसन्दंशविषाः ॥ ८ ॥

विषहतास्थि सर्पकण्टकवरटीमत्स्यास्थि चेत्यस्थिविषाणि । शकुलीमत्स्यरक्तराजीवरकीमत्स्याश्च पित्तविषाः ॥ ९ ॥

सूक्ष्मतुण्डोच्चिटिङ्गवरटीशतपदीशूकवलभिकाशृङ्गीभ्रमराः शूकतुण्डविषाः ॥ १० ॥

कीटसर्पदेहा गतासवः शवविषाः । शेषास्त्वनुक्ता मुखसन्दंशविषेष्वेव गणयितव्याः ॥ ११ ॥

भवन्ति चात्र ।

शत्रोऽरिदेशे रिपवस्तृणाम्बु-मार्गान्नधूमश्वसनान् विषेण ।
संदूषयन्त्येभिरतिप्रदुष्टान् विज्ञाय लिङ्गैरभिशोधयेत्तु ॥
दुष्टं जलं पिच्छिलमुग्रगन्धि फेनान्वितं राजिभिरावृतञ्च ।
मण्डूकमत्स्या म्रियन्ते विहङ्गा मत्ताश्च सानूपचरा भ्रमन्ति ॥
मज्जन्ति ये चात्र नराश्वनागास्ते छर्दिमोहज्वरदाहशोफान् ।
गच्छन्ति तेषामपहृत्य दोषान् दुष्टं जलं शोधयितुं यतेत ॥

---

तत्रेति । नैव पाकमत्स्यादयो ये नाम केचित्प्राणिनस्ते परिचीयन्ते तान् विजिज्ञासुस्तु नानाजनपदानवगाह्य तावत् । अन्ये कुम्भीरादय इत्याकूतम् । वृश्चिकेत्यादि । अत्र "समुद्रवृश्चिकाश्च लालाविषाः" इति पाठान्तरम् ॥२—११॥

धवाश्वकर्णासनपारिभद्राः सपाटलाः सिल्लकमोक्षकौ च ।
दग्धाः सराजद्रुमसोमवल्कास्तद्भस्म शीतं वितरेत् सरःसु ॥
भस्माञ्जलिञ्चापि घटे निधाय विशोधयेदीप्सितमेवमम्भः ।
क्षितिप्रदेशं विषदूषितन्तु शिलास्थलीं तीर्थमथेरिणं वा ॥
स्पृशन्ति गात्रेण तु येन येन गोवाजिनागोष्ट्रखरा नरा वा ।
तच्छूनतां यात्यथ दह्यते च विशीर्य्यते रोमनखास्तथैव ॥
तत्राप्यनन्तां सह सर्व्वगन्धैः पिष्ट्वा सुराभिर्विनियोज्य मार्गम् ।
सिञ्चेत् पयोभिस्तु मृदन्वितैस्तं विडङ्गपाठाकटभीजलैर्वा ॥
तृणेषु भक्तेषु च दूषितेषु सीदन्ति मूर्च्छन्ति वमन्ति चान्ये ।
विड्भेदमृच्छन्त्यथवा म्रियन्ते तेषां चिकित्सां प्रणयेद्यथोक्ताम् ॥
विषापहैर्वाप्यगदैर्विलिप्य वाद्यानि चित्राण्यपि वादयेत ।
तारः सुतारः ससुरेन्द्रगोपः सर्व्वैश्च तुल्यः कुरुविन्दभागः ॥
पित्तेन युक्तैः कपिलाह्वयेन वाद्यप्रलेपो विहितः प्रशस्तः ।
वाद्यस्य शब्देन हि यान्ति नाशं विषाणि घोराण्यपि यानि सन्ति
धूमेऽनिले वा विषसम्प्रयुक्ते खगाः श्रमार्त्ताः प्रपतन्ति भूमौ ।
कासप्रतिश्यायशिरोरुजश्च भवन्ति तीव्रा नयनामयाश्च ॥

---

राज इति । मण्डूकमत्स्यमित्यनियमात् समाहारः "दर्शितैर्य्योऽन्यत्र समाहार इतरेतरयोगश्च प्रवर्त्तते नियमस्याभावात्" इति कालापाः । सिल्लकः श्यामः, मोक्षको मुष्ककः । तीर्थं घट्टः "क्षततीर्थः पयसा निवाशयः" इति भारविः । इरिणमूषरभूमिम् । सर्व्वगन्धं नाम "चातुर्जातक कर्पूर कक्कोलागुरुकुङ्कुमम् । लवङ्गसहितञ्चैव सर्व्वगन्धं प्रकीर्त्तितम्" इतिपारि-

लाक्षाहरिद्रातिविषाभयाब्द-हरेणुकैलादलवल्ककुष्ठम् ।
प्रियङ्गुकाञ्चाप्यनले निधाय धूमानिलौ चापि विशोधयेत ॥१२

प्रजामिमामात्मयोनेर्ब्रह्मणः सृजतः किल ।
अकरोदसुरो विघ्नं कैटभो नाम दर्पितः ॥
ततः क्रुद्धस्य वै वक्त्राद् ब्रह्मणस्तेजसो निधेः ।
क्रोधो विग्रहवान् भूत्वा निपपाताथ दारुणः ॥
स तं ददाह गर्ज्जन्तमन्तकाभं महाबलम् ।
ततोऽसुरं घातयित्वा तत्तेजोऽवर्द्धताद्भुतम् ॥
ततो विषादो देवानामभवत् तं निरीक्ष्य वै ।
विषादजननत्वाच्च विषमित्यभिधीयते ॥
ततः सृष्ट्वा प्रजाः शेषं तदा तं क्रोधमीश्वरः ।
विन्यस्तवान् स भूतेषु स्थावरेषु चरेषु च ॥
यथाव्यक्तरसं तोयमन्तरीक्षान्महीगतम् ।
तेषु तेषु प्रदेशेषु रसत्वं तं नियच्छति ॥
एवमेव विषं यद्यद्द्रव्यं व्याप्यावतिष्ठते ।
स्वभावादेव तं तस्य रसं समनुवर्त्तते ॥
विषे यस्माद्गुणाः सर्व्वे तीक्ष्णाः प्रायेण सन्ति हि ।
विषं सर्व्वमतो ज्ञेयं सर्व्वदोषप्रकोपणम् ॥

---

भाषितम् । बहुवचनन्तु प्रचुरतरोपयोगमाख्यापयति । तारोरीत्यकम् । सुतारः पारदः, कुचविम्बं पक्वाममपि:, कपित्था सर्व्ववर्णाः ॥ १२ ॥

ते तु हन्ति प्रकुपिता जन्तूनिति स्वां विषार्द्दिताः।
नोपयाति विषं पाकमतः प्राणान् रुणद्धि च॥
श्लेष्मणावृतमार्गत्वादुच्छ्वासोऽस्य निरुध्यते।
विसंज्ञः सति जीवेऽपि तस्मात् तिष्ठति मानवः॥
शुक्रवत् सर्व्वसर्पाणां विषं सर्व्वशरीरगम्।
क्रुद्धानामेति चाङ्गेभ्यः शुक्रं निर्म्मन्थनादिव॥
तेषां वड़िशवद्दंष्ट्रास्तासु सज्जति चागतम्।
अनुद्वृत्य विषं तस्मान्न मुञ्चन्ति च भोगिनः॥
यस्मादत्यर्थमुष्णञ्च तीक्ष्णञ्च पठितं विषम्।
अतः सर्व्वविषेषूक्तः परिषेकस्तु शीतलः॥
मन्दं कीटेषु नात्युष्णं बहुवातकफं विषम्।
अतः कीटविषे चापि स्वेदो न प्रतिषिध्यते॥
कीटैर्द्दष्टानुग्रविषैः सर्पवत् समुपाचरेत्॥
स्वभावादेव तिष्ठेत् तु प्रहाराद्दंसयोर्विषम्।
व्याप्य सावयवं देहं दिग्धविद्धाहिदष्टयोः॥
लौल्याद्विषान्वितं मांसं यः खादेन्मृतमात्रयोः।
यथा विषं स रोगैश्च क्लिश्यते म्रियतेऽपि वा॥
अतश्चाप्यनयोर्मांसमभक्ष्यं मृतमात्रयोः।
मुहूर्त्तात् तदुपादेयं प्रहाराद्दंसवर्ज्जितम्॥ १३॥
सवातं धूम्रधूमाभं पुरीषं योऽतिसार्य्यते।

आध्मातोऽत्यर्थमुच्छ्वासो विवर्णः स्यादपीडितः।
उदमत्यश्च फेनञ्च विपरीतं तमादिशेत्॥
न चास्य हृदयं वह्निर्विषदुष्टं दहत्यपि।
तद्धि स्थानं चेतनायाः स्वभावाद्याप्य तिष्ठति॥ १४॥

अश्वत्थदेवायतनश्मशान-वल्मीकसन्ध्यासु चतुष्पथेषु।
याम्ये सपित्र्ये परिवर्ज्जनीया ऋक्षे नरा मर्म्मसु ये च दष्टाः॥१५
दर्व्वीकराणां विषमाशुघाति सर्व्वाणि चोष्णे द्विगुणीभवन्ति।
अजीर्णपित्तातपपीड़ितेषु बालप्रमेहिष्वथ गर्भिणीषु॥
क्षतातुरक्षीणबुभुक्षितेषु रूक्षेषु भीरुष्वथ दुर्द्दिनेषु॥ १६॥
शस्त्रक्षते यस्य न रक्तमस्ति राज्यो लताभिश्च न सम्भवन्ति।
शीताभिरद्भिश्च न रोमहर्षो विषाभिभूतं परिवर्ज्जयेत् तम्॥
जिह्वा सिता यस्य च केशशातो नासावभङ्गश्च सकण्ठभङ्गः।
कृष्णाः सरक्ताः श्वयथुश्च दंशे हन्वोः स्थिरत्वञ्च स वर्ज्जनीयः॥
वर्त्तिर्घना यस्य निरेति वक्त्राद्रक्तं स्रवेदूर्द्ध्वमधश्च यस्य।
दंष्ट्रानिपाताः सकलाश्च यस्य तञ्चापि वैद्यः परिवर्ज्जयेत्तु॥
उन्मत्तमत्यर्थमुपद्रुतं वा हीनस्वरं वाप्यथ वा विवर्णम्।
सारिष्टमत्यर्थमवेगिनञ्च जह्यात् तं कर्म्म न तत्र कुर्य्यात्॥ १७

---

याम्य भरण्याम् पित्र्ये मघायाम्। अरिष्टमिह निमन्दव्याख्यातम्॥

इति सुश्रुतसंहितायां कल्पस्थाने जङ्गमविषविज्ञा-
नीयं नाम तृतीयोऽध्यायः ॥ ३ ॥

इति श्रीडाराचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये कल्पस्थाने जङ्गमविषविज्ञानीयं नाम तृतीयोऽध्यायः ॥

---

# चतुर्थोऽध्यायः ।

अथातः सर्पदष्टविषविज्ञानीयमध्यायं व्याख्यास्यामः ॥१॥

धन्वन्तरिं महाप्राज्ञं सर्व्वशास्त्रविशारदम् ।

पादयोरुपसंगृह्य सुश्रुतः परिपृच्छति ॥

सर्पसंख्यां विभागञ्च दष्टलक्षणमेव च ।

ज्ञानञ्च विषवेगानां भगवन् वक्तुमर्हसि ॥

तस्य तद्वचनं श्रुत्वा प्राब्रवीद् भिषजां वरः ।

असंख्या वासुकिमुखा विख्यातास्तक्षकादयः ।

---

गताध्याये जङ्गमविषविज्ञानं प्रत्युपदिष्टेऽर्थे आकाङ्क्षा किमपि प्रत्ययो जात-स्तदिदानीं प्रथमन्तावत् प्राधान्यात् सर्पादितः सर्पजातं तद्दष्टलक्षणं तद्विष-लक्षणञ्चोपदिशतु भगवानित्येवमनुयुक्तः प्रपञ्चेनोक्तमर्थमुपदेष्टुं सर्पदष्टविष-विज्ञानीयं नामाधिकरोति अथात इत्यादिना ॥ १ ॥

सुखावबोधायानुयोगक्रमं समासेनोपदिदिक्षति धन्वन्तरिमित्यादिना-

महीधराश्च नागेन्द्रा हुताग्निसमतेजसः ॥
ये चाप्यजस्रं गर्ज्जन्ति वर्षन्ति च तपन्ति च ।
ससागरगिरिद्वीपा यैरियं धार्य्यते मही ॥
क्रुद्धा निश्वासदृष्टिभ्यां ये हन्युरखिलं जगत् ।
नमस्तेभ्योऽस्ति नो तेषां कार्य्यं किञ्चिच्चिकित्सया ॥ २ ॥
ये तु दंष्ट्राविषा भौमा ये दशन्ति च मानुषान् ।
तेषां संख्यां प्रवक्ष्यामि यथावदनुपूर्व्वशः ॥

हंसीत्यनेन ग्रन्थसन्दर्भेण। तत्रेति वासुकिमुखा इति वासुकेर्मुख्यत्वमैरावतादपेक्षयेति ज्ञेयम्, स्मरन्ति हि "शेषः प्रथमतो जातो वासुकिस्तदनन्तरम्। ऐरावतस्तक्षकश्च कर्कोटकधनञ्जयौ" इति महाभारतम् "आ० प० ३५ अ०"। यद्वा "ब्रह्मा राज्येऽभ्यषेचयत् × × नागानामथ वासुकिम्" इत्याग्नेयस्मरणाद् वासुकेर्मुख्यत्वं साम्प्रतमेव। वर्षन्ति तोयं विषम्, तपन्ति च निश्वासदृष्टिभ्यामित्यभिसन्धिः। महीधराश्चेति विशिनष्टि ससागरेति। नैव "नागोऽनन्तः प्रतापवान्। धारयन् वसुधामेकः" इति आ० प० ३६ अ० महाभारतीयेऽनन्तस्यैव पृथ्वीधारित्वे स्मृतेऽप्येष्वपि ससागरेति विशेषणम् "अष्टभिर्या महीधरा" इति भविष्यपुराणीयानुशासनादनुपपन्नम्। चिकित्सया मन्त्रेण विनाकृतयेत्येव ज्ञेयम्, महाभारतीये "आ० प० ४२ अ०" अभिशप्तस्य राज्ञः परीक्षितो दंशनार्थं प्रस्थितेन तक्षकेण दष्टतया भस्मीभूतस्य न्यग्रोधस्य मन्त्रसविधेन मुनिना काश्यपेन पुनरुज्जीवनस्मरणात् ॥ २ ॥

य इति। ये भौमा दंष्ट्राविषाश्चकाराद्विर्व्विषाश्च मानुषान् दशन्तीति व्याख्येयम्। अत्र सर्पाणां चेतनाचेतनदंशनशीलत्वे सत्यपि मानुषान्

अशीतिस्त्वेव सर्पाणां भिद्यते पञ्चधा तु सा।
दर्व्वीकरा मण्डलिनो राजिमन्तस्तथैव च।
निर्व्विषा वैकरञ्जाश्च त्रिविधास्ते पुनः स्मृताः॥
दर्व्वीकरा मण्डलिनो राजिमन्तश्च पन्नगाः।
तेषु दर्व्वीकरा ज्ञेया विंशतिः षट् च पन्नगाः॥
द्वाविंशतिर्मण्डलिनो राजिमन्तस्तथा दश।
निर्व्विषा द्वादश ज्ञेया वैकरञ्जास्त्रयस्तथा।
वैकरञ्जोद्भवाः सप्त चित्रा मण्डलिराजिलाः॥
पदाभिमृष्टा दुष्टा वा क्रुद्धा ग्रासार्थिनोऽपि वा।
ते दशन्ति महाक्रोधास्त्रिविधमुच्यते॥
सर्पितं रदितं वापि तृतीयमथ निर्व्विषम्।
सर्पाङ्गाभिहतं केचिदिच्छन्ति खलु तद्विदः॥
पदानि यत्र दन्तानामेकं द्वे वा बहूनि च।
निमग्नान्यल्परक्तानि यान्युद्वृत्य करोति हि॥
चञ्चुमालकयुक्तानि वैकृत्यकरणानि च।
संक्षिप्तानि सशोफानि विद्यात् तत् सर्पितं भिषक्॥

---

दशन्तीति मनुष्याधिकारत्वात् साम्प्रतमेव, निर्व्विषाणामुपदेशस्तु प्रासङ्गिकः। वैकरञ्जेति। समवैकरञ्जोद्भवान् वर्णतस्त्रेधा भिनत्ति चित्रेति। पदानीति। दन्तानामेकं द्वे बहूनि वा निमग्नानि गम्भीराणि अल्परक्तानि ईषद्रक्तवर्णानि पदानि यानि चञ्चुमोटमुद्वृत्य विषं निषेक्तुं वक्रीकृत्य करोति सर्पं इति

राज्यः सलोहिता यत्र नीलाः पीताः सितास्तथा ।
विज्ञेयं रदितं तत्तु ज्ञेयमल्पविषञ्च तत् ॥
अशोफमल्पदुष्टासृक् प्रकृतिस्थस्य देहिनः ।
पदं पदानि वा विद्यादविषं तच्चिकित्सकः ॥
सर्पस्पृष्टस्य भीरोर्हि भयेन कुपितोऽनिलः ।
कस्यचित् कुरुते शोफं सर्पाङ्गाभिहतन्तु तत् ॥
व्याधितोद्विग्नदष्टानि ज्ञेयान्यल्पविषाणि च ।
तथातिवृद्धातिबाल-दष्टमल्पविषं स्मृतम् ॥
सुपर्णदेवब्रह्मर्षि-यक्षसिद्धनिषेविते ।
विषघ्नौषधियुक्ते च देशे न क्रमते विषम् ॥ ३ ॥
रथाङ्गलाङ्गलच्छत्र-स्वस्तिकाङ्कुशधारिणः ।
ज्ञेया दर्व्वीकराः सर्पाः फणिनः शीघ्रगामिनः ॥
मण्डलैर्विविधैश्चित्राः पृथवो मन्दगामिनः ।
ज्ञेया मण्डलिनः सर्पा ज्वलनार्कसमप्रभाः ॥

---

शेषः तानि चत्वार एव बालकोऽङ्गुलिसं कुङ्कुमम्, कुत्सितं वा सममालक्तं रक्ताभं हरितालमिश्रेतत् तदङ्गानगुक्तान्यालकयुक्तानि वैक्षल्यकारणानि सर्व्वेभ्यो विषलिङ्गाभिनिर्व्वर्त्तनानि संक्षिप्तानि सूचीविद्धवदविहृतानि सशोफानि ईषच्छोफयुक्तानि यत्र दंशने दृश्यन्ते तत् सर्पितमित्येवं व्याख्येयम् ॥ २ ॥

रथेत्यादि । फणिन इत्यतिशायने मत्वर्थीयः विपुलफणधरा इत्यर्थः । कोपयन्तीति । फणिनश्चैव दर्व्वीकरा एव प्रत्येनश्चाः प्राकृतेषामेव विशेषतः

स्निग्धा विविधवर्णाभिस्तिर्य्यगूर्द्ध्वन्तु राजिभिः ।
चित्रिता इव ये भान्ति राजिमन्तस्तु ते स्मृताः ॥
मुक्तारूप्यप्रभा ये च कपिला ये च पन्नगाः ।
सुगन्धिनः सुवर्णाभास्ते जात्या ब्राह्मणाः स्मृताः ॥
क्षत्रियाः स्निग्धवर्णास्तु पन्नगा भृशकोपनाः ।
सूर्य्यचन्द्राकृतिच्छत्रलक्ष्म तेषां तथाम्बुजम् ॥
कृष्णा वज्रनिभा ये च लोहिता वर्णतस्तथा ।
धूम्राः पारावताभाश्च वैश्यास्ते पन्नगाः स्मृताः ॥
महिषद्वीपिवर्णाभास्तथैव परुषत्वचः ।
भिन्नवर्णाश्च ये केचिच्छूद्रास्ते परिकीर्त्तिताः ॥
कोपयन्त्यनिलं जन्तोः फणिनः सर्व्व एव तु ।
पित्तं मण्डलिनश्चापि कफञ्चानेकराजयः ॥
अपत्यमसवर्णाभ्यां द्विदोषकरलक्षणम् ।
ज्ञेयं दोषैश्च दम्पत्योर्विशेषश्चात्र वक्ष्यते ॥
रजन्याः पश्चिमे यामे सर्पाश्चित्राश्चरन्ति हि ।
शेषेषूक्ता मण्डलिनो दिवा दर्व्वीकराः स्मृताः ॥

---

फणित्वेनोपदेशात् । रथाङ्गादिधारित्वेनानेकविधानामेषां सर्व्वेषामेवाव-बोधार्थं सर्व्वमित्युपात्तमित्यवधेयम् । अपत्यमिति । असवर्णाभ्यां विजातीयाभ्यां स्त्रीपुंसाभ्यां जातमपत्यं द्विदोषप्रकोपनं लक्षणमस्येति द्विदोषकर-लक्षणम् । एतावता द्विदोषप्रकोपित्वेन सर्पाणामसवर्णाभ्यां जातत्वं विज्ञा-

दर्व्वीकरास्तु तरुणा वृद्धा मण्डलिनस्तथा।
राजिमन्तो वयोमध्या जायन्ते मृत्युहेतवः॥
नकुलाकुलिता बाला वारिविप्रहताः कृशाः।
वृद्धा मुक्तत्वचो भीताः सर्पास्त्वल्पविषाः स्मृताः॥ ४॥

तत्र दर्व्वीकराः—कृष्णसर्पो महाकृष्णः कृष्णोदरः श्वेतकपोतो महाकपोतो वलाहको महासर्पः शङ्खपालो लोहिताक्षो गवेधुकः परिसर्पः खण्डफणः ककुदः पद्मो महापद्मो दर्भपुष्पो दधिमुखः पुण्डरीको भ्रुकुटीमुखो विष्किरः पुष्पाभिकीर्णो गिरिसर्प ऋजुसर्पः श्वेतोदरो महाशिरा अलगर्द्द आशीविष इति॥ ५॥

मण्डलिनस्तु—आदर्शमण्डलः श्वेतमण्डलो रक्तमण्डलश्चित्रमण्डलः पृषतो रोध्रपुष्पो मिलिन्दको गोनसो वृद्धगोनसः पनसो महापनसो वेणुपत्रकः शिशुको मदनः पालिंहिरः पिङ्गलस्तन्तुकःपुष्पपाण्डुः षड्गोऽग्निको बभ्रुः कषायः कलुषः पारावतो हस्ताभरणश्चित्रक एणीपद इति॥ ६॥

---

पितं भवति। नन्वेवं गते जिह्माख्यं पुनरापन्नम् कतमत् कतमदस्ववर्णापत्यं कतमत्कतमद्विदोषं प्रकोपयतीति नह्यनियमेनैषां द्विदोषप्रकोपित्वं समन्वितं भवतीत्याह ज्ञेयमिति। एवमन्यस्मानाधिष्ठानोऽयं च शब्दः तथाच दम्पत्योर्जायापत्योर्द्वैरेवज्ञेयमनयोरपत्यमित्यर्थनिष्कर्षः। तद्यथा सुगमः। नकुलेत्यादौ वृद्धा इत्यतिवृद्धाः, मध्यकालव्यतिरिक्तावेति नानुपपत्तिः। महाशिरा अलगर्द्दौ अलसर्पं इत्येवं नामतः षड्विंशति

राजिमन्तस्तु—पुण्डरीको राजिचित्रोऽङ्गुलराजिर्विन्दुराजिः कर्द्दमकस्तृणशोषकः सर्षपकः श्वेतहनुर्दर्भपुष्पश्चक्रको गोधूमकः किक्किसाद इति ॥ ७ ॥

निर्व्विषास्तु—गलगोली शूकपत्रोऽजगरो दिव्यको वर्षाहिकः पुष्पशकली ज्योतीरथः चीरिकः पुष्पकोऽहिपताकोऽन्धाहिको गौराहिको वृक्षेशय इति ॥ ८ ॥

वैकरञ्जास्तु त्रयाणां दर्व्वीकरादीनां व्यतिकराज्जाताः । तद्यथा—माकुलिः पोटगलः स्निग्धराजिरिति । तत्र कृष्णसर्पेण गोनस्यां वैपरीत्येन वा जातो माकुलिः । राजिलेन गोनस्यां वैपरीत्येन वा जातः पोटगलः । कृष्णसर्पेण राजिमत्यां वैपरीत्येन वा जातः स्निग्धराजिरिति । तेषामाद्यस्य पितृवद्विषोत्कर्षः, द्वयोर्मातृवदित्येके ॥ ९ ॥

---

दर्व्वीकरा व्याख्याताः । मण्डलिन इति । पृषतोनाम शुभ्रविन्दुमान् मृगभेदस्तद्वच्चित्रितो लोध्रपुष्पाभःसर्पः पृषतोलोध्रपुष्प उच्यते । शिशुरिव शिशुकः मदनविशेषणमेतत् एवमेव तन्तुकः पुष्पपाण्डुरपि व्याख्येयः, अग्निरिव कायतीत्यग्निकः बभ्रुविशेषणमेतत्, कलुषइत्यनेन पारावतं विशिनष्टीति द्वाविंशति र्मण्डलिनो व्याख्याताः । राजिमन्तइति । सर्षपकः श्वेतहनुर्दर्भपुष्पश्चक्रकश्च द्वौ विचित्रसर्पविशेषाविन्युपपन्नं भवति "राजिमन्त स्तथा दश" इति । निर्व्विषा इति । गौराश्विरिव कायति गौराहिको वृक्षेशयो दक्षिणापथे दृश्यत इत्याहुः । वैकरञ्जा इति व्यतिकरात् सम्बन्धात् संसर्गादिति यावत् । अखण्डितं हि पराभिमतं स्वाभिमतमिव

अवान्तरे वैकरञ्जानां पुनर्दिव्यालक-रोध्रपुष्पक-राजिचित्रकाः पोटगलः पुष्पाभिकीर्णो दर्भपुष्पो वेल्लितकः सप्त। तेषामाद्यास्त्रयो राजिलवत्, शेषा मण्डलिवत्। एवमेतेषां सर्पाणामशीतिरिति॥ १०॥

तत्र महानेत्रजिह्वास्यशिरसः पुमांसः। सूक्ष्मनेत्रजिह्वास्यशिरसः स्त्रियः। उभयलक्षणा मन्दविषा अक्रोधा नपुंसका इति॥ ११॥

तत्र सर्व्वेषां सर्पाणां सामान्यत एव दष्टलक्षणं वक्ष्यामः॥ १२॥

किं कारणं? विषं हि निशितनिस्त्रिंशाशनिहुतवहदेश्यमाशुकारि मुहूर्त्तमप्युपेक्षितमातुरमतिपातयति। न चावकाशोऽस्ति वाक्समूहमनुसर्त्तुम्॥ १३॥

प्रत्येकमपि दष्टलक्षणेऽभिहिते सर्व्वं त्रैविध्यं भवति, तस्मात् त्रैविध्यमेव वक्ष्यामः। एतच्चातुरहितमसम्मोहकरञ्च। अपि चात्रैव सर्व्वसर्पव्यञ्जनावरोधः॥ १४॥

---

प्रतिभातीति कृत्वा प्रागपत्यमित्यादिना सामान्येनोक्तमर्थं केषाञ्चिन्मतमुपन्यस्य विशिनष्टि तेषामिति। पित्तवत् विषोत्कर्षो विषप्रकर्षः निकर्षस्तु मात्रविषयत्वेनार्थादाक्षिप्यत इत्यतः प्रागुक्त विशेषः साधितो भवति॥ ॥ ४—८॥

अवान्तरामिति राजिला राजिमन्तो मण्डलिनश्च विषप्रधाना इति प्रथमम्। १०—११॥

तत्र दर्वीकरविषेण त्वङ्नयननखदशनमूत्रपुरीषदंशकृष्णत्वं रौक्ष्यं शिरसो गौरवं सन्धिवेदना कटीपृष्ठग्रीवादौर्बल्यं जृम्भणं वेपथुः स्वरावसादो घुर्घुरको जडता शुष्कोद्गारः कासश्वासौ हिक्का वायोरूर्द्ध्वगमनं शूलोद्वेष्टनं तृष्णा लालास्रावः फेनागमनं स्रोतोऽवरोधस्तास्ताश्च वातवेदना भवन्ति ॥ १५ ॥

मण्डलिविषेण त्वगादीनां पीतत्वं शीताभिलाषः परिधूपनं दाहस्तृष्णा मदो मूर्च्छा ज्वरः शोणितागमनमूर्द्धमधश्च मांसानामवशातनं श्वयथुर्दंशकोथः पीतरूपदर्शनमाशुकोपस्तास्ताश्च पित्तवेदना भवन्ति ॥ १६ ॥

राजिमद्विषेण शुक्लत्वं त्वगादीनां शीतज्वरो रोमहर्षः स्तब्धत्वं गात्राणामादंशशोफः सान्द्रकफप्रसेकश्छर्दिरभीक्ष्णमक्ष्णोः कण्डूः कण्ठे श्वयथुर्घुर्घुरक उच्छ्वासनिरोधस्तमःप्रवेशस्तास्ताश्च कफवेदना भवन्ति ॥ १७ ॥

पुरुषाभिदष्ट ऊर्द्ध्वं प्रेक्षते, अधस्तात् स्त्रिया, शिराश्चोत्तिष्ठन्ति ललाटे। नपुंसकाभिदष्टस्तिर्य्यक्प्रेक्षी भवति। गर्भिण्या पाण्डुमुखो ध्मातश्च। सूतिकया शूलार्त्तो रुधिरं मेहत्युपजिह्विका चास्य भवति। ग्रासार्थिनान्नं काङ्क्षति। वृद्धेन मन्दा वेगाश्च। बालेनाशुमृदवश्च। निर्व्विषेणाविषलिङ्गम्। अन्धाहिकेनान्धत्वमित्येके। ग्रसनादजगरः शरीर-

प्राणहरः, न विषात् । तत्र सद्यःप्राणहराद्दिष्टः पतति शस्त्राशनिनिहत इव भूमौ, स्रस्ताङ्गः स्वपिति ॥ १८ ॥

तत्र सर्व्वेषां सर्पाणां विषस्य सप्त वेगा भवन्ति । तत्र दर्व्वीकराणां प्रथमे वेगे विषं शोणितं दूषयति, तत् प्रदुष्टं कृष्णतामुपैति ; तेन कार्ष्ण्यं पिपीलिकापरिसर्पणमिव चाङ्गे भवति । द्वितीये मांसं दूषयति ; तेनात्यर्थं कृष्णता शोफो ग्रन्थयश्चाङ्गे भवन्ति । तृतीये मेदो दूषयति ; तेन दंशक्लेदः शिरोगौरवं स्वेदश्चक्षुर्ग्रहणञ्च । चतुर्थे कोष्ठमनुप्रविश्य कफप्रधानान् दोषान् दूषयति ; तेन तन्द्राप्रसेकसन्धिविश्लेषा भवन्ति । पञ्चमेऽस्थीन्यनुप्रविशति, प्राणमग्निञ्च दूषयति ; तेन पर्व्वभेदो हिक्का दाहश्च भवति । षष्ठे मज्जानमनुप्रविशति, ग्रहणीञ्चात्यर्थं दूषयति ; तेन गात्राणां गौरवमतिसारो हृत्पीड़ा मूर्च्छा च भवति । सप्तमे शुक्रमनुप्रविशति, व्यानञ्चात्यर्थं कोपयति, कफञ्च सूक्ष्मस्रोतोभ्यः प्रच्यावयति ; तेन श्लेष्मवर्त्तिप्रादुर्भावः पृष्ठभङ्गः सर्व्वचेष्टाविघातो लालास्वेदयोरतिप्रवृत्तिरुच्छ्वासनिरोधश्च भवति ॥ १९ ॥

तत्र मण्डलिनां प्रथमे वेगे विषं शोणितं दूषयति, तत् प्रदुष्टं पीततामुपैति ; तत्र परिदाहः पीतावभासता चाङ्गानां भवति । द्वितीये मांसं दूषयति ; तेनात्यर्थं पीततापरिदाहौ दंशे श्वयथुश्च भवति । तृतीये मेदो दूषयति ;

तेन पूर्व्ववच्चक्षुर्ग्रहणं तृष्णा दंशे क्लेदः स्वेदश्च । चतुर्थे कोष्ठमनुप्रविश्य ज्वरमापादयति । पञ्चमे परिदाहं सर्व्वगात्रेषु करोति । षष्ठसप्तमयोः पूर्व्ववत् ॥ २० ॥

राजिमतां प्रथमे वेगे विषं शोणितं दूषयति, तत् प्रदुष्टं पाण्डुतामुपैति ; तेन रोमहर्षः शुक्लावभासश्च पुरुषो भवति । द्वितीये मांसं दूषयति ; तेन पाण्डुतात्यर्थं जाड्यं शिरःशोफश्च भवति । तृतीये मेदो दूषयति ; तेन चक्षुर्ग्रहणं दंशक्लेदः स्वेदो घ्राणाक्षिस्रावश्च भवति । चतुर्थे कोष्ठमनुप्रविश्य मन्यास्तम्भं शिरोगौरवञ्चापादयति । पञ्चमे वाक्सङ्गं शीतज्वरञ्च करोति । षष्ठसप्तमयोः पूर्व्ववदिति ॥ २१ ॥

भवन्ति चात्र ।

धात्वन्तरेषु याः सप्त कलाः सम्परिकीर्त्तिताः ।
तास्वेकैकामतिक्रम्य वेगं प्रकुरुते विषम् ॥ २२ ॥
येनान्तरेण हि कलां कालकल्पं भिनत्ति हि ।
समीरणेनोह्यमानं तत्तु वेगान्तरं स्मृतम् ॥ २३ ॥
शूनाङ्गः प्रथमे वेगे पशुर्ध्यायति दुःखितः ।
लालास्रावी द्वितीये तु कृष्णाङ्गः पीड्यते हृदि ॥

---

सम्प्रति शिष्यशिशिक्षयिषया द्वितीयादि विषवेगाभिनिर्वृत्तिप्रकारमुपदिदिक्षति धात्वन्तरेष्विति । सम्परिकीर्त्तिताः 'शा० ४ अ०' इति शेषः । वेगं वेगान्तरमिति तात्पर्य्यम्, एतदेव द्रढयति येनेति हि यस्मात् काल·

तृतीये च शिरोदुःखं कण्ठग्रीवञ्च भज्यते ।
चतुर्थे वेपते मूढः खादन् दन्तान् जहात्यसून् ॥ २४ ॥
केचिद्वेगत्रयं प्राहुरन्त्येष्वेतेषु तद्विदः ॥ २५ ॥
ध्यायति प्रथमे वेगे पक्षी मुह्यत्यतः परम् ।
द्वितीये विह्वलः प्रोक्तस्तृतीये मृत्युमृच्छति ॥
केचिदेवं विहङ्गेषु विषवेगमुशन्ति हि ॥ २६ ॥
मार्जारनकुलादीनां विषं नातिप्रवर्त्तते ॥ २७ ॥

इति सुश्रुतसंहितायां कल्पस्थाने सर्पदष्टविषविज्ञानीयो
नाम चतुर्थोऽध्यायः ॥ ४ ॥

---

अल्पं कालमविरन्तरं द्रुतगामि स्वभावं विषं समीरवेगोद्धमानं दुष्यमाणं सहन्तरेण मध्ये कला मध्यवर्त्तिनी कला येन वेगेनभिनत्ति तदेव वेगान्तरं स्मृतम्, तस्मात् प्रागुक्तं साम्प्रतमित्याकूतम् । प्रसङ्गात् पशुपक्षिणोर्विष-वेगं प्रकृत्य किञ्चिदाजिज्ञीर्षन्ति सूनान्न इति । एतेषु वेगेष्वन्तर्मध्ये इत्यर्थः । अथ वेगाभावपर्य्यायोऽयं अन्तःप्रध्वस्तप्तेषु मध्ये वेगत्रयं प्रादुर्भवन्तो नाग्नो भवतीत्येवं व्याख्येयम् । परिशिष्टं निगदव्याख्यातम् ॥ २२—२७ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
कल्पस्थाने सर्पदष्टविषविज्ञानीयं नाम चतुर्थोऽध्यायः ।

# पञ्चमोऽध्यायः।

अथातः सर्पदष्टकल्पचिकित्सितं व्याख्यास्यामः॥ १॥

सर्व्वैरेवादितः सर्पैः शाखादष्टस्य देहिनः।
दंशस्योपरि बध्नीयादरिष्टाश्चतुरङ्गुले॥
प्लोतचर्म्मान्तर्व्वल्कानां मृदुनाऽन्यतमेन च।
न गच्छति विषं देहमरिष्टाभिर्निवारितम्॥
दहेद्दंशमथोत्कृत्य यत्र बन्धो न जायते।
आचूषणच्छेददाहाः सर्व्वत्रैव तु पूजिताः॥
प्रतिपूर्य्य मुखं वस्त्रैर्हितमाचूषणं भवेत्॥ २॥

---

प्रकृतत्वादिदानीं सर्पदष्टानां चिकित्सितमधिकरोति अथात इत्यादिना। सर्पदष्टानां न्यायप्राप्तं चिकित्सितं सर्पदष्टकल्पचिकित्सितम्— "कल्पः शास्त्रविधौ न्याये" इति रुद्रः। अत्र कल्पशब्दो मन्त्राणां व्यवच्छेदार्थ- इति ब्रूमः, प्रभाववन्मन्त्रिता हि ते न्यायं हत्वाय मत्वा प्रभावात् दुष्कर- मपि कर्म निष्पादयन्त्यनायासेन। मन्त्राणां माहात्म्यमनुपरमतोऽदेवेत्यादिना निवेदयिष्यति स्वयमेव। सर्पदष्टचिकित्सितकल्पमित्येवं पाठस्तु तिरोहि- तार्थः॥ १॥

सर्व्वैरित्यादि। विषमतिप्रतिबन्धिबन्धविशेषमाचष्टे। योऽयमरिष्टाबन्धो मर्त्यं जिघ्नतीति कृत्वा बध्नीयादित्यनेनाचष्टे। विषं हि रक्तेन मिश्रीभूयान्यत्र- समाधात् कृत्स्नं शरीरमनुधावत्यतः कार्यमेतत्काल्यतरत्वरितं विषं निरोद्धु-

स दष्टव्योऽथ वा सर्पो लोष्टो वापि हि तत्क्षणम् ॥ ३ ॥
अथ मण्डलिना दष्टं न कथञ्चन दाहयेत् ।
स पित्तविषबाहुल्याद्दंशो दाहाद्विसर्पति ॥ ४ ॥
अरिष्टामपि मन्त्रैश्च बध्नीयान्मन्त्रकोविदः ।
सा तु रज्ज्वादिभिर्बद्धा विषप्रतिकरी मता ॥
देवब्रह्मर्षिभिः प्रोक्ता मन्त्राः सत्यतपोमयाः ।
भवन्ति नान्यथा क्षिप्रं विषं हन्युः सुदुस्तरम् ॥
विषं तेजोमयैर्मन्त्रैः सत्यब्रह्मतपोमयैः ।
यथा निवार्यते क्षिप्रं प्रयुक्तैर्न तथौषधैः ॥
मन्त्राणां ग्रहणं कार्य्यं स्त्रीमांसमधुवर्ज्जिना ।
जिताहारेण शुचिना कुशास्तरणशायिना ॥
गन्धमाल्योपहारैश्च बलिभिश्चापि देवताः ।
पूजयेन्मन्त्रसिद्ध्यर्थं जपहोमैश्च यत्नतः ॥

---

मिदमुच्यते चादित इति। चादित आदावस्यां दंशमात्रमित्येतत्। अरिष्टा इति बहुवचनन्तु त्र्यङ्गुलं चतुरङ्गुलं वा हित्वा त्रयश्चत्वारो वा पञ्चषा बन्धा कार्य्या इत्यावेदयितुम्, प्रोतोऽत्र्यङ्गुलविस्तीर्णं हिंस्रिर्वा वेष्टनार्हं दृढं वस्त्रखण्डम्, मन्त्रैरेकवचनान्तैर्ब्रह्मवचनसम्पूतत्वाच्च पट्टादिकृता रज्जु-रित्यवधेयम्। चकारादौपयौगिकतया कौषेयसूत्रादीन्युपदिशन्ति कुशलाः। नन्वस्मिन् शरीरे येषु पुनः पौर्वादयोऽवयवा बन्धनं नार्हन्ति तेषु दष्टेषु का गति रित्याह दंशेष्विति। लोष्टो मृत्पिण्डः लोहपिण्ड इत्यपरे। सम्प्रति विषगतिः समूलकाण्डमाकाशविशेनापसृतमपि सम्बन्धकमरिष्टाबन्धनं हन्ति

मन्त्रास्तु विधिना प्रोक्ता हीना वा स्वरवर्णतः ।
यस्मान्न सिद्धिमायान्ति तस्माद् योज्योऽगदक्रमः ॥ ५ ॥
समन्ततः शिरा दंशाद्विध्येत् तु कुशलो भिषक् ।
शाखाग्रे वा ललाटे वा वेध्यास्ता विसृते विषे ॥
रक्ते निर्ह्रियमाणे तु कृत्स्नं निर्ह्रियते विषम् ।
तस्माद्विस्रावयेद्रक्तं सा ह्यस्य परमा क्रिया ॥
समन्तादगदैर्दंशं प्रच्छयित्वा प्रलेपयेत् ।
चन्दनोशीरयुक्तेन वारिणा परिषेचयेत् ॥
पाययेतागदांस्तांस्तान् क्षीरक्षौद्रघृतादिभिः ।
तदलाभे हिता वा स्यात् कृष्णा वल्मीकमृत्तिका ॥
कोविदारशिरीषार्क-कटभीर्वापि भक्षयेत् ।
न पिबेत् तैलकौलत्थ मद्यसौवीरकाणि च ॥
द्रवमन्यत्तु यत् किञ्चित् पीत्वा पीत्वा तदुद्वमेत् ।
प्रायो हि वमनेनैव सुखं निर्ह्रियते विषम् ॥ ६ ॥
फणिनां विषवेगे तु प्रथमे शोणितं हरेत् ।

---

सामर्थ्यं कार्यमित्यावेदयितुमिदमुच्यते यदिष्टामिति । प्रतिकरी समूलघात-मुपहन्तीत्यर्थः । सत्यतपोमयाः सत्याद्यागताः "मयट् च" इति पा० सू० ४।३।८२ मयट् । तेजोमयैस्तेजःप्रचुरैः—"तेजोमयीवाक्" इति श्रुतिश्च । मन्त्रा वेदाः ॥ २—५ ॥

समन्तत इति । दंशात्समन्ततश्चतुर्दिक्षु शिराविध्येदिति योजना, अत्र शाखाग्रेवेति वाशब्दश्चार्थे द्वितीयस्तु व्यवस्थायामितरावयवानां समुच्चयार्थः ।

द्वितीये मधुसर्पिर्भ्यां पाययेतागदं भिषक् ॥
नस्यकर्म्माञ्जने युञ्ज्यात् तृतीये विषनाशने ।
वान्तं चतुर्थे पूर्व्वोक्तां यवागूमथ दापयेत् ॥
शीतोपचारं कृत्वादौ भिषक् पञ्चमषष्ठयोः ।
दापयेच्छोधनं तीक्ष्णं यवागूञ्चापि कीर्त्तिताम् ॥
सप्तमे त्ववपीड़ेन शिरस्तीक्ष्णेन शोधयेत् ।
तीक्ष्णमेवाञ्जनं दद्यात् तीक्ष्णशस्त्रेण मूर्द्ध्नि च ।
कुर्य्यात् काकपदं चर्म्म सासृग्वा पिशितं क्षिपेत् ॥ ७ ॥
पूर्व्वे मण्डलिनां वेगे दर्व्वीकरवदाचरेत्
अगदं मधुसर्पिर्भ्यां द्वितीये पाययेत च ।
वामयित्वा यवागूञ्च पूर्व्वोक्तामथ दापयेत् ॥
तृतीये शोधितं तीक्ष्णैर्यवागूं पाययेद्धिताम् ।
चतुर्थे पञ्चमे वापि दर्व्वीकरवदाचरेत् ॥
काकोल्यादिर्हितः षष्ठे पेयश्च मधुरो गणः ।
हितोऽवपीड़े त्वगदः सप्तमे विषनाशनः ॥ ८ ॥
अथ राजिमतां वेगे प्रथमे शोणितं हरेत् ।
अगदं मधुसर्पिर्भ्यां संयुक्तं पाययेत च ॥

---

यद्यप्यशोधिते प्राक्पानादौ व्यर्थविधानादेव यवागूपानमप्राप्तमप्यर्थोऽर्था-दाक्षिप्यत इति ब्रूमो यत्रतिहि "रक्तेनिक्षिप्यमाणेतु" इत्यादि । काकपदेति । चि ललाटस्यातुरस्य छेद क्रिया परमेत्यर्थः "भवति चापि सर्वे वायुं वाय-चारयन्" इति न्यायात् । अगदैश्चिन्तयेत्यादिना वक्ष्यमाणैः । हिता याना-

वाम्यं द्वितीये त्वगदं पाययेद्विषनाशनम् ।
तृतीयादिषु चेष्वेव विधिर्दार्व्वीकरो हितः ।
षष्ठेऽञ्जनं तीक्ष्णतममवपीडश्च सप्तमे ॥ ९ ॥
गर्भिणीबालवृद्धानां सिराव्यधविवर्ज्जितम् ।
विषार्त्तानां यथोद्दिष्टं विधानं शस्यते मृदु ॥ १० ॥
रक्तावसेचनादीनि नरतुल्यान्यजाविके ।
गवाश्वयोश्च द्विगुणं त्रिगुणं महिषोष्ट्रयोः ॥
चतुर्गुणन्तु नागानां केवलं सर्व्वपक्षिणाम् ।
परिषेकान् प्रदेहांश्च सुशीतानवचारयेत् ॥ ११ ॥
मात्रकान्त्वञ्जनस्येष्टं द्विगुणं नस्यतो हितम् ।
पाने चतुर्गुणं पथ्यं वमनेऽष्टगुणं पुनः ॥ १२ ॥
देशप्रकृतिसात्म्यर्त्तु-विषवेगबलाबलम् ।
प्रधार्य्य निपुणो बुद्ध्या ततः कर्म्म समाचरेत् ॥ १३ ॥

---

लेपनयोरिति हृदयम् । कोविदारोऽत्र रक्तकाञ्चनः काटभी ज्योतिष्मती "नैपुटकी" इति विख्यायते व्यवहारस्तु शिरीषस्यैव । कुर्य्यादिति काकपदं काकपदाकारं प्रच्छपदम् । चर्म्मसाद्ये छागादीनामिव नेये ॥ ९—१० ॥

सम्प्रतिविषमात्र प्राचुरतरं भवत्येवान्तेन विशेषतो तिर्य्यग्योनीनां पश्वादीनामिष्टैव भारं भारमनुकम्पापहृतचित्तो भगवानप्रस्तुतमपि कश्चिदर्थमुपदिदिक्षति रक्तेत्यादिना । अत्र नरतुल्यानीत्यनेन "बलिनोबहुदोषस्य" इत्यादिना "शा० ८ अ०" उपदिष्टम् "मात्रकन्त्वञ्जनस्येष्टम्" इत्यनन्तरमुपदेक्ष्यमाणञ्च नराभिप्रायिकयोः रक्तावसेचनानां परमं मानं यथायोगमजाद्यावतिदिष्टमित्युक्तम् । गवाश्वयोरित्यसमाहार आर्षः । द्विगुण-

वेगानुपूर्व्वमित्येतत् कर्म्मोक्तं विषनाशनम् ।
कर्म्मावस्थाविशेषेण विषयोरुभयोः शृणु ॥
विवर्णे कठिने शूने सरुजेऽङ्गे विषाहिते ।
तूर्णं विस्रावणं कार्य्यमुक्तेन विधिना ततः ॥
क्षुधार्त्तमनिलप्रायं तद्विषार्त्तं समाहितः ।
पाययेद्दधि तक्रं वा सर्पिः क्षौद्रं तथा रसम् ॥
तृड्दाहघर्म्मसंमोहे पैत्तं पैत्ते विषातुरम् ।
शीतैः संवाहनस्नान-प्रदेहैः समुपाचरेत् ॥
शीते शीतप्रसेकार्त्तं श्लैष्मिकं कफकृद्विषम् ।
वामयेद्वमनैस्तीक्ष्णैस्तथा मूर्च्छामदान्वितम् ॥
कोष्ठदाहरुजाध्मान-मूत्रसङ्गरुगन्वितम् ।
विरेचयेच्छकृद्वायुसङ्गपित्तातुरं नरम् ॥
शूनाक्षिकूटं निद्रार्त्तं विवर्णाविललोचनम् ।
विवर्णांश्चापि पश्यन्तमञ्जनैः समुपाचरेत् ॥

---

मित्यादीनि क्रियाविशेषणानि रक्तेत्यादिपदमेकवचनान्तत्वेनानुकृष्यान्वेयम् । निश्चितापरपर्य्यायोऽयं केवलशब्दः । "निर्णीते केवलम्" इत्यमरः । तथाच सुशीताम् परिषेकाम् प्रदेहानेवावचारयेत्त्वन्यादित्यर्थनिष्कर्षः । मन्थलोचहितं नराम् प्रत्यगदसमाख्यमञ्जनादिकं किं मानमभिनन्दन्ति भिषजो विष-वेगमुन्मूलयितुमित्याह मात्रकमिति । मात्रकं द्वादशधान्यमाषात्मकं मानमिति "चि० ११ अ०" अनुसन्धायाध्यवसितव्यम् । चिकित्सा हि देश-प्रकृत्यादिविशेषेण प्रतिपुरुषं भिद्यत इत्याह देशेति ।

शिरोरुग्गौरवालस्य-हनुस्तम्भगलग्रहे ।
शिरो विरेचयेत् क्षिप्रं मन्यास्तम्भे च दारुणे ॥
नष्टसंज्ञं विवृत्ताक्षं भग्नग्रीवं विरेचनैः ।
चूर्णैः प्रधमनैस्तीक्ष्णैर्विषघ्नैः समुपाचरेत् ॥
ताडयेच्च शिराः क्षिप्रं तस्य शाखाललाटजाः ॥
तास्वप्रसिच्यमानासु मूर्द्ध्नि शस्त्रेण शस्त्रवित् ।
कुर्य्यात् काकपदाकारं व्रणमेवं स्रवन्ति ताः ॥
सरक्तं चर्म्म मांसं वा निक्षिपेच्चास्य मूर्द्ध्नि च ।
चर्म्मवृक्षकषायं वा चूर्णं वा कुशलो भिषक् ॥
वादयेच्चागदैर्लिप्ता दुन्दुभीस्तस्य पार्श्वयोः ।
लब्धसंज्ञं पुनश्चैनमूर्द्ध्वञ्चाधश्च शोधयेत् ॥
निःशेषं निर्हरेच्चैव विषं परमदुर्ज्जयम् ।
अल्पमप्यवशिष्टं हि भूयो वेगाय कल्पते ॥
कुर्य्याद्वा सादवैवर्ण्य ज्वरकासशिरोरुजः ।
शोफशोषप्रतिश्याय-तिमिरारुचिपीनसान् ॥
तेषु चापि यथादोषं प्रतिकर्म्म प्रयोजयेत् ।
विषार्त्तोपद्रवांश्चापि यथास्वं समुपाचरेत् ॥ १४ ॥

---

अनिलप्रायं वातलं तद्विषार्त्तमनिलप्रायविषार्त्तं दर्व्वीकरविषार्त्तमित्येतत् पैत्तं पित्तलं पैत्ते पित्तार्त्तं विषार्त्तमिति क्रमागतत्वात् पित्तकरविषार्त्तं मण्डलिविषार्त्तमिति यावत् । श्लैष्मिकं श्लेष्मलम् । राजिमद्विष मत्वेति कफकृद्विषम् । चर्म्मवृक्षो भूर्ज्जवृक्षः ॥ ११—१४ ॥

यथारिष्टां विमोच्याशु प्रच्छयित्वाऽहितं तथा ।
दंशात् तत्र विषं स्कन्नं भूयो वेगाय कल्पते ॥ १५ ॥
एवं क्रियाक्रमैर्मन्त्रैरोषधीभिश्च यत्नतः ।
विषे हृतगुणे देहाद्यदा दोषः प्रकुप्यति ॥
तदा पवनमुद्वृत्तं स्नेहाद्यैः समुपाचरेत् ।
तैलमत्स्यकुलत्थाम्लवर्ज्यैर्मारुतनाशनैः ॥
पित्तज्वरहरैः पित्तं कषायैः स्नेहबस्तिभिः ॥
कफमारग्वधाद्येन सक्षौद्रेण गणेन तु ॥
श्लेष्मघ्नैरगदैश्चापि तिक्तै रूक्षैश्च भोजनैः ॥ १६ ॥
वृक्षप्रपातविषमपतितं मृतमम्भसि ।
उद्बन्धनञ्च मृतं सद्यश्चिकित्सेन्नष्टसंज्ञवत् ॥ १७ ॥

---

यथेत्यादि । विमुच्येति विमोचनं हि विषस्याशुगतित्वादूर्ध्वं वह्नेव कार्य-मित्युपदेशः । अहितमरिष्टाबन्धजनितरक्तयाऽनुविद्धम् देशम् तथाह दिश्या-दष्टे विम्बेदित्यर्थः । कुतः ? आह तत्रेति । यस्मात्तत्राहिते देशे स्कन्नं संहतमोचितसंश्रयत्वेनाशुस्रावदविस्रुतमित्यर्थः । मन्त्रैर्यथातथमनन्तरोक्तो-विधिवद्व्याहृतैः । ओषधिभिः सोमसमाख्याभिः, आमनन्ति हि "ओष-धीनां पतिं सोमम्" इत्युपक्रम्य "नाग्निर्न तोयं न विषम् × × × तथाऽऽक्र-मायुःक्षपये" इति । चकारात् प्रसिद्धत्वेनाऽवागुप्ताभिर्जपामूलादिभिर्विषहर-रत्नादिभिश्चेति ज्ञेयम् ।

यथा च विषार्ता हृदयक्रियावरोधेन मूर्च्छिता म्रियन्ते तथैव वृक्षादि पतिता अपीति साम्यादिहोक्तं नष्टसंज्ञविधिमितीत्यतिदिशति वृक्षेति ।

गाढं बद्धेऽरिष्टया प्रच्छितेऽपि तीक्ष्णैर्लेपैस्तद्विधैर्वा विशेषैः ।
शूने गात्रे क्लिन्नमत्यर्थपूति ज्ञेयं मांसं तद्विषात् पूतिकष्टम् ॥
सद्योविद्धं निस्रवेत् कृष्णरक्तं पाकं यायाद्दह्यते चाप्यभीक्ष्णम् ।
कृष्णीभूतं क्लिन्नमत्यर्थपूति शीर्णं मांसं यात्यजस्रं च ताच ॥
तृष्णा मूर्च्छा भ्रान्तिदाहौ ज्वरश्च यस्य स्युस्तं दिग्धविद्धं व्यवस्येत् ।
पूर्व्वोद्दिष्टं लक्षणं सर्व्वमेतज्जुष्टं यस्यालं विविध व्रणाः स्युः ।
लूतादष्टा दिग्धविद्धा विषैर्वा जुष्टा ये स्युर्ये व्रणाः पूतिमांसाः ॥
तेषां युक्त्या पूतिमांसान्यपोह्य वार्य्यौकोभिः शोणितञ्चापहृत्य ।

---

वृक्षप्रपातविषमपतितमिति षष्ठी समासः । षष्ठी च यथा योगमवधित्वाधिकरणत्वसम्बन्धेन बोद्धव्या "भूम्यामि पतनम्" इति भृग्वग्रवत् । प्रपातः पर्व्वतस्योच्चैः प्रदेशः "प्रपातस्तटो भृगुः" इत्यमरः, विषमं नतोन्नतम्, उद्वृत्तं उदरं तद्यमर्थः वृक्षादिपतितं वृक्षादिपतितत्वेन मूर्च्छितम्, चक्षुषि मृतं मृतप्रायं उद्वृत्तं मृतं उदकमग्नमृतप्रायञ्च नष्टसंज्ञवत् नष्टसंज्ञं विहत्ताच्च इत्युक्तवत्सचिकित्सेदिति ॥ १५—१७ ॥

प्रतीकारविभ्रमादाशङ्कितं पूतिमांसं लक्षणतोनिर्द्दिशति गाढमिति । अरिष्टया गाढं सर्व्वथा शोणितगतिप्रतिबन्धित्वेन दृढं बद्धे अपि शब्दादरिष्टया प्रच्छिते छिन्ने वा लक्षणे इति शेषः वा शब्दात् तीक्ष्णैर्लेपैस्तद्विधैर्विशेषैस्तीक्ष्णैर्वपनाद्यादिभि र्वा शूने पाकानुकूलशोथानुविद्धे गात्रे मांसं क्लिन्नमत्यर्थ पूतिच भवति, विषघ्नातितरां विकारित्वादित्यभिसन्धिः । विषात् पूतिच तन्मांसं कष्टं ज्ञेयं विज्ञैर्मूलकष्टाद्यादित्याकूतम् । दिग्धविद्धविज्ञानमुपदिशति तद्य इति, दिग्धो विषलिप्तो वाणः "वाणेविषाक्ते दिग्धलिप्तकौ" इत्यमरः, विषाभिनिर्वृत्तलक्षणविज्ञानमभिधत्ते पूर्व्वोक्तादिनार्द्धश्लोकेन, तथातुरस्य विविधाश्च व्रणाश्चयुक्तेन पूर्व्वोद्दिष्टं सर्व्वं लक्षणं गाढमित्यादिनोक्तं पूति-

हत्वा दोषान् क्षिप्रमूर्द्ध्वमधश्च सम्यक् सिञ्चेत् क्षीरिणां कषायैः ।
अन्तर्व्वंशं दापयेच्च प्रदेहान् शीतैर्द्रव्यैराज्ययुक्तैर्विषघ्नैः ॥
भिन्नेऽस्थ्रावे दुष्टजातेन कार्य्यः पूर्व्वो मार्गः पैत्तिके यो विधिश्च ॥१९॥
त्रिवृद्विशल्ये मधुकं हरिद्रे रक्ता नरेन्द्रो लवणश्च वर्गः ।
कटुत्रिकञ्चैव विचूर्णितानि शृङ्गे निदध्यान्मधुसंयुतानि ॥
एषोऽगदो हन्ति विषं प्रयुक्तः पानाञ्जनाभ्यञ्जननस्ययोगैः ।
अवार्य्यवीर्य्यो विषवेगहन्ता महागदो नाम महाप्रभावः ॥२०॥
विडङ्गपाठात्रिफलाजमोदाहिङ्गूनि वक्रं त्रिकटूनि चैव ।
सर्व्वश्च वर्गो लवणश्च सूक्ष्मः सचित्रकः क्षौद्रयुतो निधेयः ॥
शृङ्गे गवां शृङ्गमयेन चैव प्रच्छादितः पक्षमुपेक्षितश्च ।

---

मांसक्षयम्, तद्दिग्धविद्धस्थानञ्च दुष्टं स्यादेतावता विषजाते भवति यदि पूतिमांसादयः प्रादुर्भवन्तीत्याशयातम् ।

उक्तानां वक्ष्यमाणानाञ्च विषमूलानां भयानां प्रतीकारक्रममधिकरोति हृत्वेति । वाम्यौकोभिर्व्वाम्यौकोभिः, अन्तर्व्वंशस्तेत्वन्तर्वंशं वंशमध्ये इत्यर्थः । अस्थिविषजाते किञ्चिद् विधिमष्टि भिन्न इति वैशब्दोऽयं विशेषणार्थः । दुष्टजातेन विषसमाश्रयेन पक्वा विषहतास्थ्यादिना क्षतीवकलुषीतेनास्थिविवेकेति यावत् भिन्ने प्रस्फुटिते पूर्व्वो मार्गः पूतिमांसाद्युक्तो विधिः । मण्डलिनामिदं पैत्तिकं पित्तं मण्डलिनश्चापि इति प्राहुः ॥ १८—१९ ॥

त्रिवृदिति । विशल्या दन्ती, रक्ता मञ्जिष्ठा नरेन्द्र आरग्वधः अस्योक्ति "सू० ४१अ०" द्रष्टव्यः । वर्ग इति गणाभिधायकत्वेन व्याख्यातम् । निदध्यादिति ।

एषोऽगदः स्थावरजङ्गमानां जेता विषाणामजितो हि नाम्ना ।२१
प्रपौण्डरीकं सुरदारु मुस्ता कालानुसार्य्या कटुरोहिणी च ।
स्थौणेयकं ध्यामकपद्मकानि पुन्नागतालीशसुवर्च्चिकाश्च ॥
कुटन्नटैलासितसिन्धुवाराः शैलेयकुष्ठे तगरं प्रियङ्गुः ।
रोध्रं जलं काञ्चनगैरिकञ्च समागधं चन्दनसैन्धवञ्च ॥
सूक्ष्माणि चूर्णानि समानि कृत्वा शृङ्गे निदध्यान्मधुसंयुतानि ।
एषोऽगदस्तार्क्ष्य इति प्रदिष्टो विषं निहन्यादपि तक्षकस्य ॥२२॥
मांसीहरेणुत्रिफलासुरङ्गीरक्तालतायष्टिकपद्मकानि ।
विडङ्गतालीशसुगन्धिकैलात्वक्कुष्ठपत्राणि सचन्दनानि ॥
भार्गी पटोलं किणिही सपाठा मृगादनी कर्कटिका पुरश्च ।
पालिन्द्यशोकौ क्रमुकं सुरस्याः प्रसूनमारुष्करजञ्च पुष्पम् ॥
चूर्णान्यथैषां निहितानि शृङ्गे न्यसेच्च पित्तानि समाक्षिकाणि ।
वराहगोधाशिखिशल्लकानां मार्ज्जारजं पार्षतनाकुले च ॥
यस्यागदोऽयं सुकृतो गृहे स्यान्नाम्नर्षभो नाम नरर्षभस्य ।
न तत्र सर्पाः कुत एव कीटाः त्यजन्ति वीर्य्याणि विषाणि चैव ॥
एतेन भेर्य्यः पटहाश्च दिग्धा नानद्यमाना विषमाशु हन्युः ।

---

चर्म्म तगरपुष्पं, सूक्ष्मः कतकतरुः, निर्म्मली" इति विख्यायते। प्रेति। प्रपौण्डरीकं नाम काष्ठभेदः "पुण्डरिया" इति परिचीयते, कालानुसार्य्या तगरः स्थौणेयकं ग्रन्थिपर्णम्, ध्यामको गन्धतृणम्, पुन्नागः पुरीप्रदेशे "पुन्ना" इत्यभिधीयते कुटन्नटःश्योनाकः, असितसिन्धुवारो निर्गुण्डी, जलं ह्रीवेरः, काञ्चनगैरिकं स्वर्णवर्णगैरिकम्। मांसीति। रक्तालता मञ्जिष्ठा, सुगन्धिकं

दिग्धाः पताकाश्च निरीक्ष्य सद्यो विषाभिभूता ह्यविषा भवन्ति॥२३

लाक्षा हरेणुर्नलदं प्रियङ्गुः शिग्रुद्वयं यष्टिकपुष्पिका च ।
चूर्णीकृतोऽयं रजनीविमिश्रो वर्गो विधेयो मधुसर्पिषाक्तः ॥
शृङ्गे गवां पूर्व्ववदापिधानस्ततः प्रयोज्योऽञ्जननस्यपानैः ।
सञ्जीवनो नाम गतासुकल्पमेषोऽगदो जीवयतीह मर्त्यम् ॥२४

श्लेष्मातकः कट्फलमातुलुङ्गः श्वेता गिरिह्वा किणिहीसिताच।
सतण्डुलीयोऽगद एष मुख्यो विषेषु दर्व्वीकरराजिलानाम् ॥२५

द्राक्षा सुगन्धा नगवृत्तिका च पिष्टा समङ्गा समभागयुक्ता ।
देयो द्विभागः सुरसाच्छदस्य कपित्थबिल्वादपि दाड़िमाच्च ॥
तथार्द्धभागोऽसितसिन्धुवारादङ्कोठमूलादपि गैरिकाच्च ।
एषोऽगदः क्षौद्रयुतो निहन्ति विशेषतो मण्डलिनां विषाणि ॥२६

वंशत्वगार्द्रामलकं कपित्थं कटुत्रिकं हैमवती सकुष्ठा ।
करञ्जबीजं तगरं शिरीषपुष्पञ्च गोपित्तयुतं निहन्ति ॥
विषाणि लूतोन्दुरुपन्नगानां कीटव्रलेपाञ्जननस्ययोगैः ।
पुरीषमूत्रानिलगर्भसङ्गान् निहन्ति वर्त्यञ्जननाभिलेपैः ।
काचार्म्मकोथान् पटलांश्च घोरान् पुष्पञ्च हन्त्यञ्जननस्ययोगैः ॥२७

---

पुष्करमूलम्, पुरंगुग्गुलुः पालिन्दी श्यामालता, सुरसी तुलसीप्रसूनम् । अत्र मार्ज्जारकमित्यादौ पित्तानीति पदं वचनव्यत्ययेनाकृष्यान्वेयम् ॥२०-२२

लाक्षेति । अजितागदवत्पदं सम्यक् शृङ्गमयं पिधानमस्येति पूर्व्ववदापिधानः । द्राक्षेति, सुगन्धेह तुलसीविशेषः "बाबैर" इत्याख्यायते, नगवृत्तिका शतावरी, सुरसा कृष्णतुलसी । वंशेत्यादि । हैमवती वचा, पुरीषादीनां सङ्गः अप्रवृत्तता

समूलपुष्पाङ्कुरवल्कबीजात् क्वाथ: शिरीषात् त्रिकटुप्रगाढ़: ।
सलावण: क्षौद्रयुतोऽथ पीतो विशेषत: कीटविषं निहन्ति ॥२८

कुष्ठं त्रिकटुकं दार्व्वी मधूकलवणद्वयम् ।
मालती नागपुष्पञ्च सर्व्वाणि मधुराणि च ॥
कपित्थरसपिष्टोऽयं शर्कराक्षौद्रसंयुत: ।
विषं हन्त्यगद: सर्व्वं मूषिकाणां विशेषत: ॥ २९ ॥

सोमराजीफलं पुष्पं कटभी सिन्धुवारक: ।
चोरको वरुण: कुष्ठं सर्पगन्धा ससप्तला ॥
पुनर्नवा शिरीषस्य पुष्पमारग्वधार्कजम् ।
श्यामाम्बष्ठाविडङ्गानि तथाम्रास्मन्तकानि च ॥
भूमी कुरवकश्चैव गण एकसर: स्मृत: ।
एकशो द्विस्त्रिशो वापि प्रयोक्तव्यो विषापह: ॥ ३० ॥

इति सुश्रुतसंहितायां कल्पस्थाने सर्पदष्टकल्पचिकित्सितं
नाम पञ्चमोऽध्याय: ॥ ५ ॥

---

पुरीषमूत्रानिलगर्भसङ्गा:, काचाद्योनेत्ररोगविशेषा: लवणमेव लावणम् । कुष्ठमिति । मधुराणि, "सू० ४२ अ०" उक्तानि काकोल्यादीनि । सोमेत्यादि चोरको गन्धद्रव्यविशेष: सर्पगन्धा स्वनामप्रसिद्धा विषहारिणीलता, सप्तला "चर्मकसा" इति परिचीयते भूमी कृष्णमृत्तिका, कुरवकोरक्तझिण्टी, एकमप्येषां विषं निहन्तुं सरतीत्येकसर: । परिशिष्टं निगदव्याख्यातम ॥३०

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
कल्पस्थाने सर्पदष्टकल्पचिकित्सितं नाम पञ्चमोऽध्याय: ।

# षष्ठोऽध्यायः ।

अथातो दुन्दुभिस्वनीयमध्यायं व्याख्यास्यामः ॥ १ ॥

धवाश्वकर्ण-तिनिश-पलाश-पिचुमर्द-पाटलि-पारिभद्रका-म्रोडुम्बर-करहाटकार्ज्जुन-ककुभ-सर्ज्ज-कपीतन-श्लेष्मातकाङ्को-ठामलक-प्रग्रह-कुटज-शमी-कपित्थाश्मन्तकार्क-चिरविल्व-महा-वृक्षारुष्करारलु-मधुक-मधुशिग्रु-शाक-गोजी-मूर्व्वा-तिल्वकेक्षु-रक-गोपघण्टारिमेदानां भस्मान्याहृत्य गवां मूत्रेण क्षारक-ल्पेन परिस्राव्य विपचेत्; दद्याच्चात्र पिप्पलीमूल-तण्डुलीयक-वराङ्ग-चोरक--मञ्जिष्ठा--करञ्जिका--हस्तिपिप्पली--मरीचोत्-पल-सारिवा-विडङ्ग-गृहधूमानन्तासोमसरला-वाह्लीक--गुहा-

---

अगदविद्यायां कुशला अगदङ्कारा आतुरमगदं कर्त्तुं यान् यांश्चागदान्-प्रयुञ्जन्ति प्रायेण तांस्तानुपदिश्य शास्त्रे। इदानीन्तु परिशिष्टानुपदेष्टुं "वादयेच्चागदैर्लिप्ता दुन्दुभीः" इति सामान्येनोक्तमर्थं प्रपञ्चेनाभिदधत् दुन्दुभिस्वनीयमधिकरोति अथात इत्यादिना। दुन्दुभिर्नाम महती ढक्का साच पुनरगदलिप्तैव प्रचेतव्या, अनन्तरं तथैवोपदेशात्। अध्यायस्यास्य सप्तमकल्पत्वेन पाठस्तु प्रामादिकोऽस्यात इत्यध्यवसितव्यम् "दुन्दुभेर्मूषिका-णाञ्च" इत्युपक्रमविरोधात् ॥ १ ॥

धवेत्यादि। तिनिशो माधुरो वृक्षभेदः "तिनाश" इत्याख्यायते करहाटो मदनः ककुभोऽर्ज्जुनभेदः सर्ज्जः सालः कपीतनः आम्रातकः प्रग्रहो कवि-

कोशाम्र-श्वेतसर्षप-वरुण-लवण-प्लक्ष-निचुलक-वर्द्धमान-वञ्जुल-पुत्रश्रेणी-सप्तपर्ण-टुण्टुक-शेलुश्लेष्मातक-नागदन्ती-विषाभया-भद्र-दारु-कुष्ठ-हरिद्रा-वचाचूर्णानि लोहाताम्रसमभागानि। ततः क्षारवदागतपाकमवतार्य लोहकुम्भे निदध्यात्॥ २॥

अनेन दुन्दुभिं लिम्पेत् पताकातोरणानि च।
श्रवणाद्दर्शनात् स्पर्शात् विषात् सम्प्रतिमुच्यते॥
एष क्षारागदो नाम शर्करास्वश्मरीषु च।
अर्शःसु वातगुल्मेषु कासशूलोदरेषु च॥
अजीर्णे ग्रहणीदोषे भक्तद्वेषे च दारुणे।
शोफे सर्व्वसरे चापि देयः श्वासे च दारुणे॥
एष सर्व्वविषार्त्तानां सर्व्वथैवोपयुज्यते।
तथा तक्षकमुख्यानामयं दर्पाङ्कुशोऽगदः॥ ३॥
विडङ्गत्रिफलादन्ती भद्रदारुहरेणवः।
तालीशपत्रमञ्जिष्ठा-केशरोत्पलपद्मकम्॥
दाडिमं मालतीपुष्पं रजन्यौ सारिवे स्थिरे।
प्रियङ्गुस्तगरं कुष्ठं बृहत्यौ चैलवालुकाम्॥
सचन्दनगवाक्षी भागैः समैः विषापहम्॥

---

क्षारवीं, वरणः स्योनाकः गोञ्जी गांजिया, टुण्टुकः कंकिलाचः वाहीकः कुडुमः गुवार्पणिपर्णी, निचुलो हिज्जलः वर्द्धमान एरण्डः वञ्जुलो तिमः पुत्रश्रेणी द्रवन्ती कोशाम्रं ताम्ररजनादीनां "सर्व्वत्र तैजसं कौषं" इति कांस्यपात्र सर्व्वसरो मूत्ररोगभेदः॥ २—३॥

सर्पिः कल्याणकं चैतद्ग्रहापस्मारनाशनम् ।
पाण्ड्वामयगरश्वास-मन्दाग्निज्वरकासनुत् ।
शोषिणां स्वल्पशुक्राणां बन्ध्यानाञ्च प्रशस्यते ॥ ४ ॥
अपामार्गस्य बीजानि शिरीषस्य तथैव च ।
श्वेते द्वे काकमाचीञ्च गवां मूत्रेण पेषयेत् ।
सर्पिस्तैस्तु संसृष्टं विषसंशमनं परम् ।
अमृतं नाम विख्यातमपि सञ्जीवयेन्मृतम् ॥ ५ ॥
चन्दनागुरुणी कुष्ठं तगरं तिलपर्णिकम् ।
प्रपौण्डरीकं नलदं सरलं देवदारु च ।
भद्रश्रियं यवफलां भार्गीं नीलीं सुगन्धिकाम् ॥
कालेयकं पद्मकञ्च मधुकं नागरं जटाम् ।
पुन्नागैलैलवालूनि गैरिकं ध्यामकं बलाम् ॥
तोयं सर्ज्जरसं मांसीं सितपुष्पां हरेणुकाम् ।
तालीशपत्रं क्षुद्रैलां प्रियङ्गुं सकुटन्नटाम् ॥
शैलपुष्पं सशैलेयं पत्रं कालानुसारिवाम् ।
कटुत्रिकं शीतशिवं काश्मर्य्यं कटुरोहिणीम् ॥
सोमराजिमतिविषां पृथ्विकामिन्द्रवारुणीम् ।
उशीरं वरुणं मुस्तं नखं कुस्तुम्बुरुं तथा ॥

---

विडङ्गेत्यादि । गवाक्षी 'गुडुम्' इति परिचीयते श्वेतापराजिता श्वेतदूर्व्वा चेति केचित् । चन्दनेत्यादि । तिलपर्णिकं रक्तचन्दनम् । कुट-

श्वेते हरिद्रे स्थौणेयं लाक्षाञ्च लवणानि च ।
कुमुदोत्पलपद्मानि पुष्पञ्चापि तथार्कजम् ॥
चम्पकाशोकसुमनस्तिलकप्रसवानि च ।
पाटलीशाल्मलीशेलु-शिरीषाणां तथैव च ॥
सुरस्यास्तृणशून्याश्च सिन्धुवारस्य यानि च ।
धवाश्वकर्णयोश्चापि पुष्पाणि तिनिशस्य च ॥
गुग्गुलुं कुङ्कुमं बिम्बीं सर्पाक्षीं गन्धनाकुलीम् ।
एतत् सम्भृत्य सम्भारं सूक्ष्मचूर्णानि कारयेत् ॥
गोपित्तमधुसर्पिर्भिर्युक्तं शृङ्गे निधापयेत् ॥
भग्नस्कन्धं विवृत्ताक्षं मृत्योर्दंष्ट्रान्तरं गतम् ।
अनेनागदमुख्येन मनुष्यं पुनराहरेत् ॥
एषोऽग्निकल्पं दुर्व्वारं क्रुद्धस्यामिततेजसः ।
विषं नागपतेर्हन्यात् प्रसभं वासुकेरपि ॥
महासुगन्धिनामायं पञ्चाशीत्यङ्गयोजितः ।
राजाऽगदानां सर्व्वेषां राज्ञो हस्ते भवेत् सदा ॥
तेनानुलिप्तस्तु नृपो भवेत् सर्व्वजनप्रियः ।
भ्राजिष्णुताञ्च लभते शत्रुमध्यगतोऽपि सन् ॥ ६ ॥
उच्चावचो विधिः कार्य्यो विषार्त्तानां विजानता ।

---

वटः श्योनाकः यवफलं कुटजम्, सुगन्धिकं पुष्करमूलं ध्यामकं गन्धतृणं तोयं वालकं सितपुष्पं तगरम्, तिलकप्रसवं तिलपुष्पम्, सर्पाक्षी रास्नाभेदः,

मुक्ता कीटविषं तद्धि शीतेनाभिप्रवर्द्धते ॥ ७ ॥
अन्नपानविधावुक्तमुपधार्य शुभाशुभम् ।
शुभं देयं विषार्त्तेभ्यो विरुद्धेभ्यश्च वारयेत् ॥
फाणितं शिग्रुसौवीरमजीर्णाध्यशनं तथा ।
वर्ज्जयेच्च समासेन नवधान्यादिकं गणम् ॥
दिवास्वप्नं व्यवायञ्च व्यायामं क्रोधमातपम् ।
सुरातिलकुलत्थांश्च वर्ज्जयेच्च विषातुरः ॥ ८ ॥
प्रसन्नदोषं प्रकृतिस्थधातुमन्नाभिकाङ्क्षं सममूत्रजिह्मम् ।
प्रसन्नवर्णेन्द्रियचित्तचेष्टं वैद्योऽवगच्छेदविषं मनुष्यम् ॥ ९ ॥

इति सुश्रुतसंहितायां कल्पस्थाने दुन्दुभिस्वनीयो नाम षष्ठोऽध्यायः ॥ ६ ॥

---

गन्धनाकुली गन्धरास्ना, नवधान्यादिः सू० १८ अ० उक्तः । परिशिष्टं निगद-व्याख्यानम् ॥ ४ — ९ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये कल्पस्थाने दुन्दुभिस्वनीयो नाम षष्ठोऽध्यायः ।

# सप्तमोऽध्यायः

अथातो मूषिककल्पं व्याख्यास्यामः ॥ १ ॥

पूर्व्वमुक्ताः शुक्रविषा मूषिका ये समासतः ।
नामलक्षणभैषज्यैरष्टादश निबोध तान् ॥
लालनः पुत्रकः कृष्णो हंसिरश्चिक्किरस्तथा ।
छुछुन्दरोऽलसश्चैव कषायदशनोऽपि च ॥
कुलिङ्गश्चाजितश्चैव चपलः कपिलस्तथा ।
कोकिलोऽरुणसंज्ञश्च महाकृष्णस्तथोन्दुरः ॥
श्वेतेन महता सार्द्धं कपिलेनाखुना तथा ।
मूषिकश्च कपोताभस्तथैवाष्टादश स्मृताः ॥
शुक्रं पतति यत्रैषां शुक्रदिग्धैः स्पृशन्ति वा ।
नखदन्तादिभिस्तस्मिन् गात्रे रक्तं प्रदुष्यति ॥
जायन्ते ग्रन्थयः शोफाः कर्णिका मण्डलानि च ।
पिडकोपचयश्चोग्रा विसर्पाः किटिमानि च ॥

---

* व्याख्यातमावत् सर्पदष्टविषचिकित्सितं नाम इदानीमवसरप्राप्तात् "विषं पञ्चदशः सर्वं मूषिकाणां विशेषतः" इति नाममात्रेणोपदिष्टा मूषिका एव प्रपञ्चेन प्रवर्त्तयिष्याम इत्यभिसन्धाय मूषिककल्पमधिकरोति अथात इत्यादिना ॥ १ ॥

पर्व्वभेदो रुजस्तीव्रा ज्वरो मूर्च्छा च दारुणा ।
दौर्ब्बल्यमरुचिः श्वासो वेपथुर्लोमहर्षणम् ॥ २ ॥
दृष्टरूपं समासोक्तमेतच्च व्यासतः शृणु ।
लालास्रावो लालनेन हिक्का च्छर्द्दिश्च जायते ।
तण्डुलीयककल्कन्तु लिह्यात् तत्र समाक्षिकम् ॥
पुत्रकेणाङ्गसादश्च पाण्डुवर्णश्च जायते ।
चीयते ग्रन्थिभिश्चाङ्गमाखुशावकसन्निभैः ।
शिरीषेङ्गुदकल्कन्तु लिह्यात् तत्र समाक्षिकम् ॥
कृष्णेनासृक् छर्द्दयति दुर्द्दिनेषु विशेषतः ।
शिरीषफलकुष्ठन्तु पिबेत् किंशुकभस्मना ॥
हंसिरेणान्नविद्वेषो जृम्भा लोम्नाञ्च हर्षणम् ।
पिबेदारग्वधादिन्तु सुवान्तस्तत्र मानवः ॥
चिक्किरेण शिरोदुःखं शोफो हिक्का वमिस्तथा ।
आलिनीमदनाङ्कोठ-कषायैर्वामयेत्तु तम् ॥
कुकुन्दरेण विड्भङ्गो ग्रीवास्तम्भो विजृम्भणम् ।
यवनालर्षभक्षारं वृहत्याश्चात्र दापयेत् ॥
ग्रीवास्तम्भोऽलसेनोर्द्धवायुर्दंशे रुजा ज्वरः ।
महागदं ससर्पिष्कं लिह्यात् तत्र समाक्षिकम् ॥ *
निद्रा कषायदन्तेन हृच्छोषः कार्श्यमेव च ।
क्षौद्रोपेताः शिरीषस्य लिह्यात् सारफलत्वचः ॥

---

* महागदः "५ कल्पे विहृदत्वादिनोपदिष्टः ॥

कुलिङ्गेन व्रणः शोफो राज्यश्च दंशमण्डले ।
सद्दे ससिन्धुवारे च लिह्यात् तत्र समाक्षिके ॥
अजितेन वमि मूर्च्छा हृदयः कृष्णगात्रता ।
तत्र क्षीरपिष्टां पालिन्दीं मधुना लिहेत् ॥
चपलेन भवेच्छर्दिर्मूर्च्छा च सह तृष्णया ।
सभद्रकाष्ठं सजटां क्षौद्रेण त्रिफलां लिहेत् ॥
कपिलेन व्रणे कोथो ज्वरो ग्रन्थ्युद्गमस्तथा ।
क्षौद्रेण लिह्यात् त्रिफलां श्वेताञ्चापि पुनर्नवाम् ।
ग्रन्थयः कोकिलेनोग्रा ज्वरो दाहश्च दारुणः ।
वर्षाभूनीलिनीक्वाथसिद्धं तत्र घृतं पिबेत् ॥
अरुणेनानिलः क्रुद्धो वातजान् कुरुते गदान् ।
महाकृष्णेन पित्तञ्च श्वेतेन कफ एव च ॥
महता कपिलेनासृक् कपोतेन चतुष्टयम् ।
भवन्ति चैषां दंशेषु ग्रन्थिमण्डलकर्णिकाः ॥
पिड़कोपचयाश्चोग्राः शोफश्च भृशदारुणः ।
दधिक्षीरघृतप्रस्थास्त्रयः प्रत्येकशो मताः ॥
करञ्जारग्वधव्योष-हरत्यंशुमतीशिराः ।
निःक्वाथ्य चैषां क्वाथस्य चतुर्थांशः पुनर्भवेत् ॥
वृहत्सिलामृताचक्र-सरंगन्धा समृत्तिका ।

---

दधीत्यादि । चतुर्थांशः दशम इति तात्पर्य्यम् । सद्दे मुद्गमाषपर्ण्यौ, जटा जटामांसी ।

कपित्थदाडिमत्वक् च सुपिष्टानि तु दापयेत् ॥
तत् सर्व्वमेकतः कृत्वा शनैर्मृद्वग्निना पचेत्।
पञ्चानामरुणादीनां विषमेतद्व्यपोहति ॥
काकादनीकाकमाची-स्वरसेष्वथवा कृतम्।
शिराश्च स्रावयेत् प्राज्ञः कुर्य्यात् संशोधनानि च ॥
सर्व्वथाश्च विधिः कार्य्यो मूषिकाणां विषच्छिदम्।
दग्ध्वा विस्रावयेद्दंशं प्रच्छितञ्च प्रलेपयेत् ॥
शिरीषरजनीकुष्ठ-कुङ्कुमैरमृतायुतैः।
छर्द्दनं जालिनीक्वाथैः शुकाख्याङ्कोठयोरपि ॥
शुकाख्याकोषवत्योश्च मूलं मदन एव च। *
देवदालीफलञ्चैव दध्ना पीत्वा विषं वमेत् ॥
फलं वचा देवदाली कुष्ठं गोमूत्रपेषितम्।
पूर्व्वकल्पेन योज्याः स्युः सर्व्वोन्दुरविषच्छिदः ॥
विरेचने त्रिवृन्नीली त्रिफलाकल्क इष्यते।
शिरोविरेचने सारः शिरीषफलमेव च ॥
कटुत्रिकाद्यश्च हितो गोमयस्वरसोऽञ्जने।
कपित्थगोमयरसः सक्षौद्रो लेह इष्यते ॥
रसाञ्जनहरिद्रेन्द्रयवकट्वीषु वा कृतम्।
कल्कं सातिविषं प्रातर्लिह्याच्च क्षौद्रसंयुतम् ॥

* शुकाख्या शन्थि पर्णम् ॥ ४ ॥

तण्डुलीयकमूलेषु सर्पिः सिद्धं पिबेन्नरः ।
आस्फोतमूलसिद्धं वा पञ्चकापित्थमेव वा ॥ ३ ॥
मूषिकाणां विषं प्रायः कुप्यत्यभ्रेषु निर्दृतम् ।
तत्राप्येष विधिः कार्य्यो यश्च दूषीविषापहः ॥
स्थिराणां रुजतां वापि व्रणानां कर्णिका भिषक् ।
पाटयित्वा यथादोषं व्रणवच्चापि शोधयेत् ॥ ४ ॥
शृगालश्वतरक्ष्वृक्ष-व्याघ्रादीनां यदानिलः ।
श्लेष्मप्रदुष्टो मुष्णाति संज्ञां संज्ञावहाश्रितः ॥
तदा प्रस्रस्तलाङ्गुल-हनुस्कन्धोऽतिलालवान् ।
अत्यर्थबधिरोऽन्धश्च सोऽन्योन्यमभिधावति ॥
तेनोन्मत्तेन दष्टस्य दंष्ट्रिणा सविषेण तु ।
सुप्तता जायते दंशे कृष्णञ्चातिस्रवत्यसृक् ।
दिग्धविद्धस्य लिङ्गेन प्रायशश्चोपलक्षितः ॥
येन चापि भवेद्दष्टस्तस्य चेष्टां रुतं नरः ।
बहुशः प्रतिकुर्व्वाणः क्रियाहीनो विनश्यति ॥
दंष्ट्रिणा येन दष्टश्च तद्रूपं यदि पश्यति ॥
अप्सु वा यदि वादर्शे रिष्टं तस्य विनिर्दिशेत् ॥
त्रस्यत्यकस्माद् योऽभीक्ष्णं श्रुत्वा दृष्ट्वापि वा जलम् ।
जलत्रासन्तु विद्यात् तं रिष्टं तमपि कीर्त्तयेत् ॥

अदष्टो वा जलत्रासी न कथञ्चन सिध्यति ।
प्रसुप्तोऽथोत्थितो वापि स्वस्थस्त्रस्तो न सिध्यति ॥ ५ ॥
विस्राव्य दंशं तैर्दष्टे सर्पिषा परिदाहितम् ।
प्रदिह्यादगदैः सर्पिः पुराणं वापि पाययेत् ॥
अर्कक्षीरयुतञ्चास्य दद्याच्छीर्षविरेचनम् ।
श्वेतां पुनर्नवाञ्चास्य दद्याद्धुत्तूरकायुतम् ॥
पललं तिलतैलञ्च रूपिकायाः पयो गुडः ।
निहन्ति विषमालर्कं मेघवृन्दमिवानिलः ॥
मूलस्य शरपुङ्खायाः कर्षं धुत्तूरकार्द्धिकम् ।
तण्डुलोदकमादाय पेषयेत् तण्डुलैः सह ॥
उन्मत्तकस्य पत्रैस्तु संवेष्ट्यापूपकं पचेत् ।
खादेदौषधकाले तदलर्कविषदूषितः ॥
करोत्यन्यान् विकारांस्तु तस्मिन् जीर्य्यति चौषधे ।
विकाराः शिशिरे याप्या गृहे वारिविवर्ज्जिते ॥
ततः शान्तविकारस्तु स्नात्वा चैवापरेऽहनि ।
शालिषष्टिकयोर्भक्तं क्षीरेणोष्णेन भोजयेत् ॥
दिनत्रये पञ्चमे वा विधिरेषोऽर्द्धमात्रया ।

प्रसङ्गात् शृगालादिदष्टविषचिकित्सितमधिकरोति शृगालेत्यादिना । अदष्टः शरीरमात्रेण स्पृष्टः न पुनर्दन्तैः । यथा कश्चिज्जलत्रास इति-

कर्त्तव्यो भिषजावश्यमलर्कविषनाशनः ॥
कुप्येत् स्वयं विषं यस्य न स जीवति मानवः ।
तस्मात् प्रकोपयेदाशु स्वयं यावन्न कुप्यति ॥
बीजरत्नौषधीगर्भैः कुम्भैः शीताम्बुपूरितैः ।
स्नापयेत् तं नदीतीरे समन्त्रैर्वा चतुष्पथे ॥
बलिं निवेद्य तत्रापि पिण्याकपललं दधि ।
माल्यानि च विचित्राणि मांसं पक्वामकं तथा ॥
अलर्काधिपते यक्ष सारमेयगणाधिप ।
अलर्कजुष्टमेतन्मे निर्व्विषं कुरु माचिरात् ॥
दद्यात् संशोधनं तीक्ष्णमेवं स्नातस्य देहिनः ।
अशुद्धस्य सुरूढ़ेऽपि व्रणे कुप्यति तद्विषम् ॥
श्वादयोऽभिहिता व्याला वातपित्तप्रकोपणाः ।
अतः करोति दष्टस्तु तेषां चेष्टां रुतं नरः ॥
बहुशः प्रतिकुर्व्वाणो न चिराम्म्रियते च सः ॥
नखदन्तक्षतं व्यालैर्यत् क्षतं तद्विमर्द्दयेत् ।
सिञ्चेत् तैलेन कोष्णेन ते हि वातप्रकोपणाः ॥ ६ ॥

---

म्रियत इत्याह प्रेति । स्वस्थः शरीरेणाप्यस्पृष्टः । याप्या कालक्षेपेणोपशमनीया शिशिरे सूर्यादिसन्तापरहिते सर्व्वथानुष्ण इति यावत् उक्तं हि ६ अ॰ "उष्णवर्ज्यो विधिः कार्य्यो विषार्त्तानाम्" इति । श्वादय इति । अत इति तृतीयान्तात्तसिल् तत्राघातः श्वादिभिर्दष्ट इति योजना । परिशिष्ट मतिरोहितार्थम् ॥ ५—६ ॥

इति सुश्रुतसंहितायां कल्पस्थाने मूषिककल्पो
नाम सप्तमोऽध्यायः ॥ ७ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
कल्पस्थाने मूषिककल्पो नाम सप्तमोऽध्यायः ॥

## अष्टमोऽध्यायः ।

अथातः कीटकल्पं व्याख्यास्यामः ॥ १ ॥

सर्पाणां शुक्रविण्मूत्र-शवपूत्यण्डसम्भवाः ।
वाय्वग्न्यम्बुप्रकृतयः कीटास्तु विविधाः स्मृताः ॥
सर्व्वदोषप्रकृतिभिर्युक्तास्ते परिणामतः ।
कीटत्वेऽपि सुघोरास्ते सर्व्व एव चतुर्व्विधाः ॥ २ ॥

सम्प्रति पारिशेष्यात् कीटकल्पमधिकरोति अथात इत्यादिना । कीटा नाम क्रमयः ॥ १ ॥

सर्पाणामित्यादि । वाय्वग्न्यम्बुप्रकृतयः वातपित्तकफप्रकृतयः इति तात्पर्य्यम् । सर्व्वदोष प्रकृतिभिः सान्निपातिकप्रकृतिभिर्युक्ता मिलिताः । न तावत् क्षुद्रजन्तुत्वेनैतानवजानीहि यवमात्रेषु हि तेषु सर्व्वे एव प्रतीकार-प्रयासा मोघा भविष्यन्ति, पश्यति हि "प्रोक्ष्यमानस्तु यथातुरैव" इत्युपक्रम्य "तत् सप्तमे ऽस्वर्ग परीत गात्रं व्यापादयेन्मर्त्यमतिप्रवृद्धम्" इत्येवं व्याजेनाक

कुम्भीनसस्तुण्डिकेरी शृङ्गी शतकुलीरकः ।
उच्चिटिङ्गोऽग्निनामा च चिच्चिटिङ्गो मयूरिका ।
आवर्त्तकस्तथोरभ्रः सारिकामुखवैदली ।
शरावकुर्द्दोऽभीराजी परुषश्चित्रशीर्षकः ॥
शतबाहुश्च यश्चापि रक्तराजिः प्रकीर्त्तितः ।
अष्टादशेति वायव्याः कीटाः पवनकोपनाः ।
तैर्भवन्तीह दष्टानां रोगा वातनिमित्तजा ॥ ३ ॥
कौण्डिन्यकः कणभको वरटी पत्रवृश्चिकः ।
विनासिका ब्रह्मणिका विन्दुलो भ्रमरस्तथा ॥
वाह्यकी पिच्चिटः कुम्भी वर्च्चःकीटोऽरिमेदकः ।
पद्मकीटो दुन्दुभिको मकरः शतपादकः ।
पञ्चालकः पाकमत्स्यः कृष्णतुण्डोऽथ गर्द्दभी ।
क्लीतः कृमिसरारी च यश्चाप्युत्क्लेशकः स्मृतः ॥
एते ह्यग्निप्रकृतयश्चतुर्व्विंशाः प्रकीर्त्तिताः ।
तैर्भवन्तीह दष्टानां रोगाः पित्तनिमित्तजाः ॥ ४ ॥
विश्वम्भरः पञ्चशुक्लः पञ्चकृष्णोऽथ कोकिलः ।
सैरेयकः प्रचलको वलभः किटिमस्तथा ॥
सूचीमुखा कृष्णगोधा यश्च काषायवासिकः ।

---

गमनात् विशेषनष्टि परिणामत इति । ते चतुर्व्विधाः सर्व्वएव कोटाः कीटत्वे कृमिजातित्वेन क्षुद्रजन्तुत्वे सत्यपि परिणामतः कालपरिणामात् सुघोरा मृत्युहेतवो भवन्तीत्यर्थं निष्कर्षः । एत इति । चत्वारोविंशतिश्च परिमाणमेषामिति चतुर्व्विंशाः ॥ २—४ ॥

कीटगर्दभकश्चैव तथा कोटक एव च ॥
त्रयोदशैते सौम्याः स्युः कीटाः श्लेष्मप्रकोपणाः ।
तैर्भवन्तीह दष्टानां रोगाः कफनिमित्तजाः ॥ ५ ॥
तुङ्गीनासो विचिलकस्तालको वाहकस्तथा ।
कोष्ठागारी क्रिमिकरो यश्च मण्डलपुच्छकः ॥
तुङ्गनाभः सर्षपिकोऽवल्गुली शम्बुकस्तथा ।
अग्निकीटाश्च घोराः स्युर्द्वादश प्राणनाशनाः ॥
तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत् ।
तास्ताश्च वेदनास्तीव्रा रोगा वै सान्निपातिकाः ॥
क्षाराग्निदग्धवद्दंशो रक्तपीतसितारुणः ।
ज्वराङ्गमर्दरोमाञ्चवेदनाभिः समन्वितः ॥
छर्द्यतीसारतृष्णाश्च दाहो मोहविजृम्भिका ।
वेपथुश्वासहिक्काश्च दाहः शीतश्च दारुणम् ॥
पिडकोपचयः शोफा ग्रन्थयो मण्डलानि च ।
दद्रवः कर्णिकाश्चैव विसर्पाः किटिमानि च ।
तैर्भवन्तीह दष्टानां यथास्वञ्चाप्युपद्रवाः ॥ ६ ॥
येऽन्ये तेषां विशेषास्तु तूर्णं तेषां समादिशेत् ।

---

तुङ्गीत्यादि । क्षाराग्निदग्धवदित्ययं दृष्टान्तो दार्ष्टान्तिकं कोथपाकादिना सुगमीत्यवधेयम् । रक्तेत्यादिविशेषणञ्च दोषत्रितयधर्ममाविष्करोति । अत्र पित्तात् रक्तपीतौ द्वौ वर्णौ सितः कफात् अरुणस्तु वातादित्यवधेयम् ।

दूषीविषप्रकोपाच्च तथैव विषलेपनात् ॥ ७ ॥
लिङ्गं तीक्ष्णविषेष्वेतत्कृच्छ्रं मन्दविषेष्वतः ।
प्रसेकोऽरोचकश्छर्द्दिः शिरोगौरवशीतता ॥
पिडकाकोठकण्डूनां जन्म दोषविभागतः ॥ ८ ॥
योगैर्नानाविधैरेषां चूर्णानि गरमादिशेत् ।
दूषीविषप्रकाराणां तथैवाप्यनुलेपनम् ॥
तेन पाण्डुः कृशोऽल्पाग्निः कासश्वासज्वरार्द्दितः ।
जठरग्रहणीरोगयक्ष्मगुल्मक्षयैश्च सः ।
निपीडितोमर्म्मसु च शूनपादकरोऽलसः ।

---

मतावदेतावन्त एव सोपद्रवा भवन्तीत्याह यइति। अत्र पूर्व्वस्मादुपद्रवशब्दो द्वितीयान्तबहुवचनान्ततयेनानुकृष्यान्वेयः। तदयमर्थः तेषां विशेषाः तृणी-नामादिभ्यः पृथग्भूताः ये अन्ये कुम्भीनसादयः, तेषामुपद्रवान् दूषी-विषप्रकोपं दिग्धविद्धलिङ्गञ्चाभिवीक्ष्य तूर्णं समादिशेत्। कालातिक्रमेहि ते आत्ययिका भवन्तीति हृदयम्। सामान्येनोक्तमर्थं पुनर्विशिनष्टि लिङ्ग-मिति। तीक्ष्णविषेषु वातपित्तप्रकृतिकेषु कुम्भीनसकौण्डिन्यकादिषु मन्द-विषेषु सौम्यत्वेन कफप्रकृतिकेषु विश्वम्भरादिष्वित्यर्थः। दोषविभागतः कफस्था-नांशविभागेन सर्व्वमर्द्धं पादं वा लिङ्गमित्याकुलम् ॥ ५—८ ॥

योगैरित्यादि। केचिदत्र एषामितीदमा सन्निहितत्वात् केवलं कुम्भीनसा-दीनेव ग्राहयन्ति केचित्पुनः पुरोवर्त्तित्वात् कुपित सर्पादीनपि ग्राहयितु-मभीप्सन्ति, अन्येतु विनिगमनाभावात् विषजन्तुशरीरत्वेनाविशेषाच्च सर्व्वानेव ग्राहयितुं, ते कुपित सर्पादयो विषजन्तवः तेच वक्ष्यमाणाः कणभादयः इ१ध कुम्भीनसादय इत्येवं त्रिष्टय "तदादीनां मिथोयद्यत्परं तत्तच्छिष्यते।" (पां वां सूं) इत्येकशेषे एषामिति रूपमित्याहुः। चूर्णानीति चूर्णशब्दाऽत्र

स्वप्ने मार्ज्जार गोमायुव्यालान् सनकुलान् कपीन् ।
प्रायः पश्यति नद्यादीन् शुष्कांश्च स वनस्पतीन् ॥ ८ ॥
एकजातीनतस्तूर्द्ध्वं कीटान् वक्ष्यामि भेदतः ।
सामान्यतो दृष्टलिङ्गैः साध्यासाध्यक्रमेण च ॥
त्रिकण्टकः कुणी चापि हस्तिकक्षोऽपराजितः ।
चत्वार एते कणभा व्याख्यातास्तीव्रवेदनाः ।

तैर्दष्टस्य श्वयथुरङ्गमर्द्दो गुरुता गात्राणां दंशः कृष्णश्च भवति ।

प्रतिसूर्य्यः पिङ्गभासो बहुवर्णो महाशिराः ।
तथा निरुपमश्चापि पञ्च गौधेरकाः स्मृताः ॥
तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत् ।
रुजश्च विविधाकारा ग्रन्थयश्च सुदारुणाः ॥ १० ॥

---

अजहत्स्वार्थया लक्षणया कल्कादीन्यप्यभिधत्ते इत्यवश्यं वक्तव्यं न्याय्यत्वात्, दूषीविषप्रकाराणामिति भेदापरपर्य्यायोऽयं प्रकारशब्दः स्वभावतोगुणहीनयतिरिक्तानि सर्व्वाण्येव दूषीविषाणि व्यवच्छिनत्ति । अनुलेपनमित्यनुलेपनशब्देन विषजन्तूनां प्रकृत्युत्थेषु परस्परविरुद्धेषु तेषु तेषु द्रव्येषु प्रतिसारणादिषु चारैषुच प्रवर्त्तते इति गम्यते "नाना प्राण्यङ्ग शकृतां विरुद्धौषधिभस्मनाम् विषाणाञ्चाल्पवीर्य्याणां योगोगर इति स्मृतः" इति शास्त्रान्तरैकवाक्यत्वात् । तथाच कुम्भीनसादीनां वा कुथित सर्पादीनां वा सर्पादिविषजन्तुसमूहानां वा चूर्णादीनि दूषीविषप्रकाराणां गुणहीनानां दूषीविषाणां चूर्णादीनि विषजन्तुशकृदादीनि च नानाविधैर्योगैःसंयोगैर्गरमादिशेदिति निष्कर्षः । अनुलेपनादिति पाठेतु अनुलेपनाच्चूर्णानीति योजना । एकजातीनिति । भेदतो विशेषतः सामान्यतश्च दृष्टलिङ्गैः साध्यासाध्यक्रमेणच वक्ष्यामीति समन्वयः ।

गलगोली श्वेतकृष्णा रक्तराजी रक्तमण्डला सर्व्वश्वेता सर्षपिकेत्येवं षट् ताभिर्दष्टे सर्षपिकावर्ज्जं दाहशोफक्लेदा भवन्ति । सर्षपिकया हृदयपीड़ातिसारश्च ॥ ११ ॥

शतपद्यस्तु—परुषा कृष्णा चित्रा कपिलिका पीतिका रक्ता श्वेता अग्निप्रभा इत्यष्टौ । ताभिर्दष्टे शोफो वेदना दाहश्च हृदये । श्वेताग्निप्रभाभ्यामेतदेव, दाहो मूर्च्छा चातिमात्रं श्वेतपिड़कोत्पत्तिश्च ॥ १२ ॥

मण्डूकाः—कृष्णः सारः कुहको हरितो रक्तो यववर्णाभो भृकुटी कोटिकश्चेत्यष्टौ । तैर्दष्टस्य दंशकण्डूर्भवति पीतफेनागमश्च वक्त्रात् । भृकुटीकोटिकाभ्यामेतदेव, दाहश्छर्द्दिर्मूर्च्छा चातिमात्रम् ॥ १३ ॥

विश्वम्भराभिर्दष्टे दंशः सर्षपाकाराभिः पिड़काभिश्चीयते शीतज्वरार्त्तश्च पुरुषो भवति ॥ १४ ॥

अहिण्डुकाभिर्दष्टे तोददाहकण्डूश्वयथवो मोहश्च । कण्डूमकाभिर्दष्टे पीताङ्गश्छर्द्यतीसारज्वरादिभिरभिहन्यते । शूकवृन्तादिभिर्दष्टे कण्डूकोठाः प्रवर्द्धन्ते शूकञ्चात्र लक्ष्यते ॥१५॥

पिपीलिकाः—स्थूलशीर्षा संवाहिका ब्राह्मणिकाङ्गुलिका कपिलिका चित्रवर्णेति षट् । ताभिर्दष्टे दंशे श्वयथुरग्निस्पर्शवद्दाहशोफौ भवतः ॥ १६ ॥

---

अलकाणभत्वमेकजातित्वमित्युन्नेयम् । एतेन शेषं व्याख्यातप्रायम् ॥८—१०॥

भेदतो दष्टलिङ्गं दर्शयति सर्षपिकयेति । शतपद्य इति एतदेवेति वृश्चर्योऽव-

मक्षिकाः—कान्तारिका कृष्णा पिङ्गलिका मधूलिका काषायी स्थालिकेत्येवं षट्। ताभिर्दष्टस्य दाहशोफौ भवतः। स्थालिकाकाषायीभ्यामेतदेव, पिड़काश्च सोपद्रवा भवन्ति ॥ १७

मशकाः—सामुद्रः परिमण्डलो हस्तिमशकः कृष्णः पार्वतीय इति पञ्च। तैर्दष्टस्य तीव्रकण्डूर्दंशशोफश्च भवति। पार्वतीयस्तु कीटैः प्राणहरैस्तुल्यलक्षणः। नखावकृष्टेऽत्यर्थं पिड़काः सदाहपाका भवन्ति। जलौकसां दष्टलक्षणमुक्तं चिकित्सितञ्च ॥ १८ ॥

भवन्ति चात्र।

गोधेरकः स्थालिका च ये च श्वेताग्निसंप्रभे।
भ्रुकुटी कोटिकश्चैव न सिध्यन्त्येकजातिषु ॥ १९ ॥
शतमूलपुरीषैस्तु सविषैरवमर्षणात्।
स्युः कण्डूदाहकोठाङ्ग-पिड़कातोदवेदनाः ॥
प्रक्लेदवांस्तथास्रावो भृशं सम्पाचयेत् त्वचम्।
दिग्धविद्धक्रियास्तत्र यथावदवचारयेत् ॥ २० ॥
नावसन्नं न चोत्सन्नमतिसंरम्भवेदनम्।

---

मेव शब्दः। एतद्दष्टलिङ्गजालमित्यर्थः। जलौकसामिति उक्तं जलौकावचारणीये इति शेषः ॥ ११—१८ ॥

गोधेरक इत्यादि। दिग्धविद्धक्रिया "सू० प० तेषां युक्त्या" इत्यादि नोपदिष्टा। नावसन्नं न निम्नं नापि चोत्सन्नम् अत्यन्तसंरम्भवेदनं

दंशादौ विपरीतार्त्तिं कीटदष्टं सुबाधकम् ॥ २१ ॥
कीटैर्दष्टानुग्रविषैः सर्पवत् समुपाचरेत् ।
त्रिविधानान्तु सर्पाणां त्रैविध्येन क्रिया हिता ॥ २२ ॥
स्वेदमालेपनं सेकञ्चोष्णमत्रावचारयेत् ।
अन्यत्र मूर्च्छिताद्दंशात् पाकशोथप्रपीड़ितात् ।
विषघ्नञ्च विधिं सर्व्वं कुर्य्यात् संशोधनानि च ॥ २३ ॥
शिरीषकटुकं कुष्ठं वचारजनिसैन्धवैः ।
क्षीरमज्जवसासर्पिः-शुण्ठीपिप्पलिदारुषु ॥
उत्कारिका स्थिराद्यौ वा सुकृता स्वेदने हिता ॥ २४ ॥
न स्वेदयेत् तथा दंशं धूमं वक्ष्यामि वृश्चिके ॥ २५ ॥
अगदानेकजातीषु प्रवक्ष्यामि पृथक् पृथक् ॥ २६ ॥
कुष्ठं चक्रं वचा विल्वमूलं पाठा सुवर्च्चिका ।
गृहधूमं हरिद्रे द्वे त्रिकण्टकविषे हिताः ॥ २७ ॥
प्रतिसूर्य्यकदष्टानां सर्पदष्टवदाचरेत् ॥ २८ ॥

---

रागवेदनादि बहुलं तथा दंशादौ दंशाद्यवस्थायां विपरीतार्त्तिं कीटदष्टं सुबाधकं कष्टसाध्यम्। कीटैरित्यादिनोक्तमर्थं विशिनष्टि। त्रिविधानामिति त्रैविध्येन दर्व्वीकरादिभेदभिन्नेन त्रेधा प्रतीकारविधिना त्रिविधानां वातादिप्रकृतीनां कीटानां क्रिया हितेत्यर्थनिष्कर्षः। मूर्च्छितः प्रवृद्ध इति पर्य्यायौ। स्थिरादिः "सू० ३८ अ०" उपदिष्टो विदारीगन्धादिः, प्रसङ्गादप्रस्तुतमपि वृश्चिकविषं प्रति किञ्चिदभिधत्ते नेति। नस्वेदयेत् सामान्येन विधिनेति नेयम् परमत स्वमतभेदान्तरविभागात्। वक्ष्यामि त्रिवी-

आगारधूमरजनीचक्रं कुष्ठं पलाशजम् ।
गलगोलिकदष्टानामगदो विषनाशनः ॥ २९ ॥
कुङ्कुमं तगरं शिग्रु पद्मकं रजनीद्वयम् ।
अगदो जलपिष्टोऽयं शतपद्विषनाशनः ॥ ३० ॥
मेषशृङ्गी वचा पाठा निचुलो रोहिणी जलम् ।
सर्व्वमण्डूकदष्टानामगदो विषनाशनः ॥ ३१ ॥
वचाश्वगन्धातिबला-बलासातिगुहागुहाः ।
विश्वम्भराभिदष्टानामगदो विषनाशनः ॥ ३२ ॥
शिरीषं तगरं कुष्ठं हरिद्रेंऽशुमती सहे ।
अहिण्डुकाभिदष्टानामगदो विषनाशनः ॥ ३३ ॥
कण्डूमकाभिर्दष्टानां रात्रौ शीताः क्रिया हिताः ।
दिवा ते नैव सिध्यन्ति सूर्य्यरश्मिबलाहिताः ॥ ३४ ॥
चक्रं कुष्ठमपामार्गः शुकवृन्तविषेऽगदः ।
भृङ्गस्वरसपिष्टा वा कृष्णवल्मीकमृत्तिका ॥ ३५ ॥
पिपीलिकाभिर्दष्टानां मक्षिकामशकैस्तथा ।
गोमूत्रेण युतो लेपः कृष्णवल्मीकमृत्तिका ॥ ३६ ॥

---

त्यादिरेवेति शेषः । चक्रं तगरपुष्पम् । त्रिकण्टकविष इति । त्रिकण्टकशब्दाऽयं कुणिप्रभृतिकानप्युपलक्षयत्यवश्यं वक्तव्यम् । कणभत्वसामान्यात् पृथक्त्वेनैषां प्रतीकारानुपदेशाच्च । एवमेव यथा प्रयोजनं प्रतिसूर्य्यकदष्टानामित्यादावपिव्याख्येयम् । अतिगुहा शालपर्णी गुहा पृश्निपर्णी । शिरीषमिति । अंशुमती शालपर्णी सहे मुद्गमाषपर्ण्यौ ॥ १९—३६ ॥

त्रिविधा वृश्चिकाः प्रोक्ता मन्दमध्यमहाविषाः ॥
गोशकृत्कोथजा मन्दा मध्याः काष्ठेष्टिकोद्भवाः ।
सर्पकोथोद्भवास्तीक्ष्णा ये चान्ये विषसम्भवाः ॥ ३७ ॥
मन्दा द्वादश मध्यास्तु त्रयः पञ्चदशोत्तमाः ।
दशविंशतिरित्येते संख्यया परिकीर्त्तिताः ॥ ३८ ॥

कृष्णः श्यावः कर्व्वुरः पाण्डुवर्णो गोमूत्राभः कर्कशो मेचकश्च । श्वेतो रक्तो रोमशः शाद्वलाभोऽरक्तश्चैते मन्दवीर्य्या मतास्तु ॥ एभिर्दष्टे वेदना वेपथुश्च गात्रस्तम्भः कृष्णरक्तागमश्च । शाखादष्टे वेदना चोर्द्ध्वमेति दाहस्वेदौ दंशशोफो ज्वरश्च ॥३९॥
रक्तः पीतः कापिलेनोदरेण सर्व्वे धूम्राः पर्व्वभिश्च त्रिभिः स्युः । एते मूत्रोच्चारपूत्यण्डजाता मध्याज्ञेयास्त्रिप्रकारोरगाणाम् ॥ यश्चैतेषामन्वयाद्यः प्रसूतो दोषोत्पत्तिं तत्स्वरूपाच्च कुर्यात् । जिह्वाशोफो भोजनस्यावरोधो मूर्च्छा चोग्रा मध्यवीर्य्याभिदष्टे ॥४०
श्वेतश्चित्रः श्यामलो लोहिताभो रक्तः श्वेतो रक्तनीलोदरौ च । पीतो रक्तो नीलपीतोऽपरस्तु रक्तो नीलो नीलशुक्लस्तथा च ॥

---

त्रिविधा इत्यादि । काष्ठेष्टिकोद्भवा इति । काष्ठेष्टिके अत्र जीर्णे उरगमूत्रादिदूषिते एव प्रत्येतव्ये । वक्ष्यति हि "एते मूत्रोच्चारपूत्यण्ड-जाता" इति । कर्व्वुरो नानावर्णः मेचकः कृष्णनीलः "मेचकः कृष्णनीलः स्यादतसीपुष्पसन्निभः" इति शब्दार्णवः । शाद्वलो नवतृणबहुलो देश-स्तद्वाभ इत्यर्थः । अरक्त ईषद्रक्तवर्णः कापिलेनोदरेणेत्युपलक्षणे तृतीया ।

रक्तोबभ्रुः पूर्ववत्त्वेकपर्व्वा यव्वापर्व्वा पर्व्वणी द्वे च यस्य ।
नानारूपा वर्णतश्चापि घोरा ज्ञेयास्त्वेते वृश्चिकाः प्राणचोराः ॥
भस्मैतेषां सर्पकोथात् प्रदिष्टं देहेभ्यो वा घातितानां विषैश्च ।
एभिर्दष्टे सर्पवेगप्रवृत्तिः स्फोटोत्पत्तिर्भ्रान्तिदाहौ ज्वरश्च ॥
खेभ्यः कृष्णंशोणितञ्चापितीव्रं तस्मात् प्राणैस्त्यज्यते शीघ्रमेव ॥ ४१

उग्रमध्यविषैर्दष्टं चिकित्सेत् सर्पदष्टवत् ।
दंशं मन्दविषाणान्तु चक्रतैलेन सेचयेत् ॥
विदार्य्यादिसुसिद्धेन सुखोष्णेनाथवा पुनः ।
कुर्य्याच्चोत्कारिकास्वेदं विषघ्नैरुपनाहनैः ॥
आदंशं स्वेदितं चूर्णैः प्रच्छितं प्रतिसारयेत् ।
रजनीसैन्धवव्योष-शिरीषफलपुष्पजैः ॥
मातुलुङ्गाम्लगोमूत्र-पिष्टञ्च सुरसाग्रजम् ।
लेपे स्वेदे सुखोष्णञ्च गोमयं हितमिष्यते ॥
पाने क्षौद्रयुतं सर्पिः क्षीरं वा बहुशर्करम् ।
गुड़ोदकं वा सुहिमं चातुर्जातकवासितम् ॥
पानमन्नं प्रदातव्यं क्षीरं वा सगुड़ं हिमम् ॥
शिखिकुक्कुटबर्हाणि सैन्धवं तैलसर्पिषी ।

---

रक्तोबभ्रुः रक्तपिङ्गलः पूर्व्ववत् त्रिपर्व्वेत्युन्नेयम् । ३७—४० ।

उग्रेत्यादि । चक्रतैलं "चिं २४ अ" मधुकमित्यादिना निर्दिष्टम् । विदार्य्यादिनाम "सू० ३८ अ०" उपदिष्टो गणीसंयोगः । सुरसाग्रजं

धूपो हन्ति प्रयुक्तोऽयं शीघ्रं वृश्चिकजं विषम् ॥
कुसुम्भपुष्पं रजनी निशा वा कोद्रवं तृणम् ।
एभिस्तु तान्तैर्धूपस्तु पायुदेशे प्रयोजितः ।
नाशयेदाशु कीटोत्थं वृश्चिकस्य च यद्विषम् ॥ ४२ ॥
लूताविषं घोरतमं दुर्विज्ञेयतमन्तु तत् ।
दुश्चिकित्स्यतमं वापि भिषग्भिर्मन्दबुद्धिभिः ॥
सविषं निर्विषञ्चैतदित्येवं परिशङ्किते ।
विषघ्नमेव कर्त्तव्यमविरोधि यदौषधम् ॥
अगदानां हि संयोगो विषजुष्टस्य युज्यते ।
निर्विषे मानवे युक्तोऽगदः सम्पद्यतेऽसुखम् ॥
तस्मात् सर्व्वप्रयत्नेन ज्ञातव्यो विषनिश्चयः ।
अज्ञात्वा विषसद्भावं भिषग्व्यापादयेन्नरम् ॥ ४३ ॥

प्रोद्भिद्यमानस्तु यथाङ्कुरेण न व्यक्तजातिः प्रविभाति वृक्षः ।
तद्वद्दुरालक्ष्यतमं हि तासां विषं शरीरे प्रविकीर्णमात्रम् ॥
ईषच्च कण्डूः प्रचलं सकोठमव्यक्तवर्णं प्रथमेऽहनि स्यात् ।
अन्तेषु शूनं परिनिम्नमध्यं प्रव्यक्तरूपञ्च दिने द्वितीये ॥
त्र्यहेण तद्दर्शयतीह दंशं विषं चतुर्थेऽहनि कोपमेति ।
अतोऽधिकेऽह्नि प्रकरोति जन्तोर्विषप्रकोपप्रभवान् विकारान् ॥

---

तक्कोलीलम्, कुसुम्भेत्यादि कोद्रवं तृणं कोद्रवपलालः ॥ ४१—४२ ॥
लूतेत्यादि । युज्यते युक्तियुक्तो भवति । सूचयतीति सूचः अप्रत्यक्षः

षष्ठे दिने विप्रसृतञ्च सर्व्वान् मर्म्मप्रदेशान् भृशमावृणोति ।
तत् सप्तमेऽत्यर्थपरीतगात्रं व्यापादयेन्मर्त्यमतिप्रवृद्धम् ॥ ४४ ॥
यास्तीक्ष्णचण्डोग्रविषा हि लूतास्ताः सप्तरात्रेण विनाशयन्ति ।
अतोऽधिकेनापि निहन्युरन्या यासां विषं मध्यमवीर्य्यमुक्तम् ॥
यासां कनीयो विषवीर्य्यमुक्तं ताः पक्षमात्रेण विनाशयन्ति ।
तस्मात् प्रयत्नं भिषगत्र कुर्य्यादादंशपातादिविषघातियोगैः ॥
विषन्तु लालानखमूत्रदंष्ट्रारजःपुरीषेरथ चेन्द्रियेण ।
सप्तप्रकारं विसृजन्ति लूतास्तदुग्रमध्यावरवीर्य्ययुक्तम् ॥
सकण्डुकोठं स्थिरमल्पमूलं लालाकृतं मन्दरुजं वदन्ति ।
शोफञ्च कण्डूञ्च पुलानिका च धूमायनञ्चापि नखाग्रदंशे ॥
दंशन्तु मूत्रेण सकृष्णमध्यं सरक्तपर्य्यन्तमवेहि दीर्णम् ।
दंष्ट्राभिरुग्रं कठिनं विवर्णं जानीहि दंशं स्थिरमण्डलञ्च ॥
रजःपुरीषेन्द्रियजं हि विद्धि स्फोटं विपक्वामलपीलुपाण्डुम् ॥ ४५
एतावदेतत् समुदाहृतन्तु वक्ष्यामि लूताप्रभवं पुराणम् ।
सामान्यतो दृष्टमसाध्यसाध्यं चिकित्सितञ्चापि यथाविशेषम् ॥ ४६

विश्वामित्रो नृपवरः कदाचिदृषिसत्तमम् ।
वशिष्ठं कोपयामास गत्वाश्रमपदं किल ॥
कुपितस्य मुनेस्तस्य ललाटात् स्वेदबिन्दवः ।

---

सम्पद्यते दुःखाय सम्पन्नो भवतीत्यर्थः । पुलानिका लोमहर्षः, सरक्तपर्य्यन्तं सरक्तचतुष्पार्श्वं, पुराणं पुरावृत्तम् ॥ ४३—४६ ॥

अपतन् दर्भमादेव मधस्तात् तीक्ष्णवर्च्चसः ।
लूने तृणे महर्षीणां धेन्वर्थं संभृतेऽपि च ॥
ततो जातास्त्विमा घोरा नानारूपा महाविषाः ।
अपकाराय वर्त्तन्ते नृपसाधनवाहने ॥
यस्माल्लूनं तृणं प्राप्ता मुनेः प्रस्वेदबिन्दवः ।
तस्माल्लूतेति भाष्यन्ते संख्यया ताश्च षोड़श ॥
कृच्छ्रसाध्यास्तथाऽसाध्या लूतास्तु द्विविधाः स्मृताः ।
तासामष्टौ कृच्छ्रसाध्या वर्ज्यास्तावत्य एव तु ॥
त्रिमण्डला तथा श्वेता कपिला पीतिका तथा ।
आलमूत्रविषा रक्ता कसना चाष्टमी स्मृता ॥
ताभिर्दष्टे शिरोदुःखं कण्डूर्दंशे च वेदना ।
भवन्ति च विशेषेण गदाः श्लैष्मिकवातिकाः ॥
सौवर्णिका लाजवर्णा जालिन्येणीपदी तथा ।
कृष्णाग्निवर्णा काकाण्डा मालागुणाष्टमी स्मृता ॥
ताभिर्दष्टे दंशकोथः प्रवृत्तिः क्षतजस्य च ।
ज्वरो दाहोऽतिसारश्च गदाः स्युश्च त्रिदोषजाः ॥
पिड़का विविधाकारा मण्डलानि महान्ति च ।
शोफा महान्तो मृदवो रक्ताः श्यावाश्चलास्तथा ॥
सामान्यं सर्व्वलूतानामेतदादंशलक्षणम् ।

---

तासामित्यादि । अत्र यथाक्रममित्यर्थादाक्षिप्यते तथाच वक्ष्यमाणास्त्रि-मण्डलादयः कृच्छ्रसाध्याः सौवर्णिकादयस्त्वसाध्या व्याख्यातम् ।

विशेषलक्षणं तासां वक्ष्यामि सचिकित्सितम् ॥
त्रिमण्डलाया दंशेऽस्रं कृष्णं स्रवति दीर्य्यते।
बाधिर्य्यं कलुषा दृष्टिस्तथा दाहश्च नेत्रयोः ॥
तत्रार्कमूलं रजनी नाकुली पृश्निपर्णिका।
मस्तकर्म्मणि शस्यन्ते पानाभ्यञ्जनाञ्जनेषु च ॥ ४७ ॥
श्वेतायाः पिड़का दंशे श्वेता कण्डूमती भवेत्।
दाहमूर्च्छाज्वरवती विसर्पक्लेदरुक्करी ॥
तत्र चन्दनरास्नैला-हरेणुनलवञ्जुलाः।
कुष्ठं लामज्जकं चक्रं नलदश्चागदो हितः ॥
आदंशे पिड़का ताम्रा कपिलायाः स्थिरा भवेत्।
शिरसो गौरवं दाहस्तिमिरं भ्रम एव च ॥
तत्र पद्मककुष्ठैला-करञ्जककुभत्वचः।
स्थिरार्कपर्ण्यपामार्ग-दूर्व्वाब्राह्मीविषापहाः ॥
आदंशे पीतिकायास्तु पिड़का जायते स्थिरा।
तथा छर्द्दिर्ज्वरः शूलं रक्ते चाताम्र लोचने ॥
तत्रेष्टाः कुटजोशीर-तुङ्गपद्मकवञ्जुलाः।
शिरीषकिणिहीशेलु-कदम्बककुभत्वचः ॥
रक्तमण्डनिभे दंशे पिड़काः सर्षपा इव।
जायन्ते तालुशोषश्च दाहश्चालविषान्विते ॥

श्वेताया इत्यादि। लामज्जकमुशीरं, नलदमलजटामांसी, तुङ्ग

तत्र प्रियङ्गुह्रीवेरं कुष्ठं लामज्जकं मधु।
तगरः शतपुष्पा च सपिप्पलवटाङ्कुरा:॥
पूतिमूत्रविषादंशो विसर्पी कृष्णशोणितः।
कासश्वासवमीमूर्च्छा-ज्वरदाहसमन्वितः॥
मनःशिलालमधुक-कुष्ठचन्दनपद्मकैः।
मधुमिश्रैः सलामज्जैरगदस्तत्र कीर्त्तितः॥
दंशश्च पाण्डुपिडको दाहक्लेदसमन्वितः।
रक्ताया रक्तपर्य्यन्तो विज्ञेयो रक्तसंयुतः॥
कार्य्यस्तत्रागदस्तोय-चन्दनोशीरपद्मकैः।
तथैवार्ज्जुनशेलुभ्यां त्वग्भिराम्रातकस्य च॥
पिच्छिलं कसनादंशाद्रुधिरं शीतलं स्रवेत्।
कासश्वासौ च तत्रोक्तं रक्तलूता-चिकित्सितम्॥
पुरीषगन्धिरल्पास्रक् कृष्णाया दंश एव तु।
ज्वरमूर्च्छावमीदाह-कासश्वाससमन्वितः॥
तत्रैलाचक्रसर्पाक्षी-गन्धनाकुलिचन्दनैः।
महासुगन्धिसहितैः प्रत्याख्यायागदः कृतः॥
दंशे दाहोऽग्निवर्णायाः स्रावोऽत्यर्थं ज्वरस्तथा।
चोषकण्डूरोमहर्षौ दाहश्च स्फोटजन्म च॥

---

पुनाग फलम्, प्रथाध्यलेनोक्तेषु सौवर्णिकादिषु मध्ये कृष्णाग्निवर्णे द्वे अहल्याय। कष्टे च कदाचित् सिध्येते इति निवेदयिष्यते तदिह क्रमं हित्वा ते उपदिश्यते पुरीषेत्यादिना। महासुगन्धिर्गन्धनाकुली,चीरपिप्पलं, पिप्पलचीर-

कृष्णाप्रशमनस्त्वाव प्रत्याख्याय प्रयोजयेत् ॥ ४८ ॥
सारिवोशीरयष्ट्याह्व-चन्दनोत्पलपद्मकम् ।
सर्व्वासामेव युञ्जीत विषे श्लेष्मातकत्वचम् ॥
भिषक् सर्व्वप्रकारेषु तथाच चीरपिप्पलम् ॥ ४९ ॥
कृच्छ्रसाध्यविषा ह्यष्टौ प्रोक्ता द्वे च यदृच्छया ।
असाध्यविषवीर्य्याणां लक्षणानि निबोध मे ॥
आतः सौवर्णिकादंशः सफेनो मत्स्यगन्धकः ।
कासश्वासौ ज्वरस्तृष्णा मूर्च्छा चात्र सुदारुणा ॥
आदंशे लाजवर्णाया आमं पूति स्रवेदसृक् ।
दाहो मूर्च्छातिसारश्च शिरोदुःखञ्च जायते ॥
घोरदंशस्तु जालिन्या राजिमानवदीर्य्यते ।
स्तब्धः श्वासस्तमोवृद्धिस्तालुशोषश्च जायते ॥
एणीपद्यास्तथा दंशो भवेत् कृष्णतिलाकृतिः ।
तृष्णामूर्च्छाज्वरच्छर्द्दि-कासश्वाससमन्वितः ॥
दंशः काकाण्डकादष्टे पाण्डुरक्तोऽतिवेदनः ॥
रक्तो मालागुणादंशो धूमगन्धोऽतिवेदनः ।
विदीर्य्यते च बहुधा दाहमूर्च्छाज्वरान्वितः ॥ ५० ॥

---

अश्वत्थचीरमित्येतत् । द्वे च यदृच्छया इति । असाध्यत्वेनोपदिष्टे अपि ये द्वे कृष्णाग्निवर्णे यदृच्छया कृच्छ्रसाध्यविषे भवतस्ते अपि प्रोक्ते इत्यर्थः । आत इत्यादि । आत आध्मातः । क्रमागतयोः कृष्णाग्निवर्णयोर्लक्षणतः प्रागुक्तत्वात् अप्रोक्तयोः अनन्तरं परिशिष्टे द्वे अधिकृत्याभिधत्ते दंश इत्यादिना ॥४८-५०॥

असाध्यानां भिषक् प्राज्ञः प्रयुञ्जीत चिकित्सितम् ।
दोषोच्छ्रायविशेषेण च्छेदकर्म्मविवर्ज्जितम् ॥
साध्याभिरपि लूताभिर्दष्टमात्रस्य देहिनः ।
वृद्धिपत्रेण मतिमान् सम्यगादंशमुद्धरेत् ।
जम्बोष्ठेनाग्नितप्तेन दहेद्वा करवारणात् ॥
अमर्म्मणि विधानज्ञो वर्ज्जितस्य ज्वरादिभिः ।
दंशस्योत् कर्त्तनं कुर्य्यादल्पश्वयथुकस्य च ॥
मधुसैन्धवसंयुक्तैरगदैर्लेपयेत् ततः ।
प्रियङ्गुरजनीकुष्ठ-समङ्गामधुकैस्तथा ॥
सारिवामधुकं द्राक्षां पयस्यां क्षीरमोरटम् ।
विदारीगोक्षुरक्षौद्रमधुकं पाययेत वा ॥
क्षीरिणां त्वक्कषायेण सुशीतेन च सेचयेत् ।
उपद्रवान् यथादोषं विषघ्नैश्च प्रसाधयेत् ॥
नस्याञ्जनाभ्यञ्जनपानधूमं तथावपीडं कवलग्रहञ्च ।
संशोधनञ्चोभयतः प्रयुञ्ज्याद्रक्तं हरेच्चापि जलायुकाभिः ॥५१
कीटदष्टव्रणान् सर्व्वानहिदष्टव्रणानपि ।
पादंशपाकं यत्नेन चिकित्सेत् सर्पदष्टवत् ॥

---

असाध्यानामिति । शाकरवारणात् समूलकायमावाधनात् । सामान्य-शीतलमर्थं पुनर्विशिनष्टि, अमर्म्मणीति पयस्या क्षीरकाकोली क्षीरमोरटम् ।

विनिहन्ते ततः शोफे कर्णिकापातनं हितम् ।
निम्बपत्रं विहद्दन्ती कुसुम्भं रजनी मधु ॥
गुग्गुलुः सैन्धवं किण्वं वर्च्चः पारावतस्य च ।
विषहृद्विकरञ्जाभ्यां हित्वा सम्भोजनं हितम् ॥
विषेभ्यः खलु सर्व्वेभ्यो कर्णिकामरुजां स्थिराम् ।
प्रच्छयित्वा मधुयुतैः शोधनीयैरुपाचरेत् ॥
सप्तषष्टश्च कीटानां शतश्चैतद्विभागशः ।
दृष्टलक्षणमाख्यातं चिकित्सा चाप्यनन्तरम् ॥ ५२ ॥
सविंशमध्यायशतमेतदुक्तं विभागशः ।
उद्दिष्टाननिर्द्दिष्टान् सर्व्वान् वक्ष्याम्यथोत्तरे ॥ ५ ॥
सनातनत्वाद् वेदानामक्षरत्वात् तथैव च ।
तथा दृष्टफलत्वाच्च हितत्वादपि देहिनाम् ॥
वाक्समूहार्थविस्तारात् पूजितत्वाच्च देहिभिः ।
चिकित्सितात् पुण्यतमं न किञ्चिदपि सुश्रुमः ॥
ऋषिरिन्द्रप्रभविस्यामृतयोनेर्भिषग्गुरोः ।

---

खनामख्यातोलताभेदः । कर्णिकावीसतोभागः । पारावतस्य चेत्यन्तं हित मिति पूर्व्वेणान्वीयते । अत्रहि अष्टादश वायव्याश्चतुर्व्विंशा आग्नेयाः त्रयोदश सौम्याःद्वादश सान्निपातिकाश्चत्वारः कणभाः पञ्च गौधेरकाः षड्मल-मालिका अष्टाशतपद्योऽष्टौ मण्डूकाः एका विश्वम्भरा एका अहिण्डुका, एका कण्डूमकाः एकाशूकवृन्ता षट्पिपीलिकाः षड्मक्षिकाः, पञ्चमशकाः त्रिविधा जलौकसः चिञ्चटिकाः षोड़श लूता उपदिष्टा स्तदिदमुपसंहरति

धारयित्वा तु विमलं मतं परमसम्मतम् ।
उक्ताहारसमाचार इह प्रेत्य च मोदते ॥ ५४ ॥

इति सुश्रुतसंहितायां कल्पस्थाने कौटकल्पो नामाष्टमोऽध्यायः ॥ ८ ॥

इति श्रीसुश्रुताचार्य्यविरचित आयुर्व्वेदशास्त्रे सुश्रुतसंहितायां कल्पस्थानं समाप्तम् ॥ ५ ॥

---

समेति । सताधिकाषष्टिः समषष्टि स्ततोऽयं आदित्वादपि समषष्टेति रूपम परिग्रिष्टं निगद व्याख्यानम् ॥ ५१—५४ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये कीटकल्पोनामाष्टमोऽध्यायः । समाप्तश्चेदं कल्पस्थानभाष्यम् ॥

# सुश्रुतसंहिता।

## उत्तरतन्त्रम्।

## प्रथमोऽध्यायः।

अथात औपद्रविकमध्यायं व्याख्यास्यामः॥ १॥

अध्यायानां शते विंशे यदुक्तमसकृन्मया।
वक्ष्यामि बहुधा सम्यगुत्तरेऽर्थानिमानिति॥
इदानीं तत् प्रवक्ष्यामि तन्त्रमुत्तरमुत्तमम्।
निखिलेनोपदिश्यन्ते यत्र रोगाः पृथग्विधाः॥

---

अवसितानि खलु कल्पान्तानि पञ्चस्थानान्यवशिष्यतेच व्याचिख्यासितत्वेनाभ्युपगतं नानार्थप्रतिपादकमुत्तरसमाख्यं तन्त्रम्। तत्र चोपदेष्टव्येष्वर्थेषु मध्ये उपद्रवा हि व्याधीनां कृच्छ्रत्वमसाध्यत्वं वाभिनिर्वर्त्तयन्तीति कृत्वा तेषां प्राधान्यं सम्प्रधार्य्य तानेवाधिकृत्योपदेशात्तन्त्रमिदमौपद्रविकेति गौणं नामविशेषं प्राप्नोति अतस्तत्सम्बन्धित्वादध्यायोऽयमौपद्रविक उच्यते। एतच्च "अधिकृत्य कृतं यस्मात्तन्त्रमेतदुपद्रवान्" इत्यादि "सू० ३ अ०" अनुशासनादध्यवसेयम्॥ १॥

येतु पुनः पाक्षविकोऽस्यासा औपद्रविकेति नाममात्रेणैव अर्थोऽयमारब्ध इति विज्ञायते प्रागातुरोपक्रमणीये उपद्रवानधिकृत्योपदेशादेवं प्रत्यवतिष्ठन्ते तान्निरस्यन् पुनः प्रतिजानीते अध्यायानामित्यादिना। विंश इति। विंशतिरधिकाऽस्मिञ्छते इति। शदन्तविंशतेश्च ५।२।४६ पा० सू० डः तिविंशतेर्डिति ६।४।

शालाक्यशास्त्राभिहिता विदेहाधिपकीर्त्तिताः ।
ये च विस्तरतो दृष्टाः कुमाराबाधहेतवः ॥
षट्सु कायचिकित्सासु ये चोक्ताः परमर्षिभिः ।
उपसर्गादयो रोगा ये चाप्यागन्तवः स्मृताः ॥
विषग्री रससंसर्गाः सुश्रुतस्तं तथैव च ।
युक्तार्था युक्तयश्चैव दोषभेदास्तथैव च ॥
यत्रोक्ता विविधा अर्था रोगसाधनहेतवः ॥ २ ॥
महतस्तस्य तन्त्रस्य दुर्गाधस्याम्बुधेरिव ।

---

१४२ पा० सू० तिस्लोपः । अध्यायानां शते विंशे विंशत्यधिकशताध्यायात्मके शास्त्रे इत्येव वक्तव्यं प्रत्यध्यायं विवक्षितार्थस्यानुपदेशात् । अत्रासक्तदिति विशेषणं "उत्तरेतन्त्रे शेषानर्थान् व्याख्यास्यामः" तथा "इहोद्दिष्टाननिर्द्दिष्टान् सर्व्वं वक्ष्याम्यथोत्तरे" इति सू० १ अ० । क० ८ अ० स्मरणाच्चानुपपन्नम् । पृथग्विधा नानाविधाः । के नाम ते रोगा य उपदिश्यन्ते ? आह शाला-क्येति । अत्र "समुद्र इव गम्भीरं नैव शक्यं चिकित्सितम्, वक्तुं निरवशेषेण" इत्युपक्रम्य "तदिदं बहुगूढार्थं चिकित्साबीजमीरितम्" इत्यादि वक्ष्यमाणा-नुशासनादेवं ब्रूमः । अतिविशालत्वादुक्तपदेशं तन्त्रमिदं विस्तरश उप-दिष्टमपि न जातु सर्व्वे भिषजो विज्ञास्यन्त्यनायासेनेति मन्वानो भगवान् सारात्-सारतमत्वेनातीव स्पृहणीयं राजर्षिप्रवरेण भगवता निमिना संगृहीतमेव शालाक्यतन्त्रमुपदेष्टुमिदमुच्यते विदेहेति । विदेहाधिपतिर्निमिः, कीर्त्तिता-यथासारं शालानादायुर्व्वेदात् सङ्कलिताः । षट्सु वात-पित्त-कफ-सन्निपात-शोणितागन्तुजविषयत्वेन षड्विधासु ; सर्व्वकायचिकित्सास्विति पाठे तु सुग-मम् । परमर्षिभिर्ब्रह्मादिभिः । अत्रोपसर्गादय इत्यनेन व्रणाद्युपद्रवभूता

आदावेवोत्तमाङ्गस्थान् रोगानभिदधाम्यहम् ।
संख्यया लक्षणैश्चापि साध्यासाध्यक्रमेण च ॥ ३ ॥
विद्याद्द्व्यङ्गुलबाहुल्यं स्वाङ्गुष्ठोदरसम्मितम् ।
द्व्यङ्गुलं सर्व्वतः सार्द्धं भिषङ्नयनबुद्बुदम् ।
सुवृत्तं गोस्तनाकारं सर्व्वभूतगुणोद्भवम् ॥

---

ज्वरादयः प्राक्शल्यत्वेनान्यलक्षणत्वेन चोपदिष्टा गुल्मादयोऽङ्गावसादादयश्चाभिप्रेयन्ते । आगन्तुशब्देनच मानसत्वेनोपदिष्टा उन्मादादयएवेत्यध्यवसेयम् । शारीराणामागन्तुकानां प्रागुपदेशात् । युक्तार्थायुक्तयस्तन्त्रयुक्तयः । उक्त मर्थं स्फोरयति यत्रेति । सम्प्रत्यधिकर्त्तव्यत्वेनोररीकृतेषूपद्रवेष्वव्याकृतेषु सत्स्वपि सूचीकटाहन्यायेनार्थान्तरमवतारयितुमिदमुच्यते अथात इति । अभिदधाम्यहं नातिविस्तरत्वेन क्रमं छित्वेति हृदयम् । वक्ष्यति हि "एतावन्तोयथास्थूलमुत्तमाङ्गगतागदाः" इति । अत्र यथास्थूलमिति विशेषणात् तल्लक्षणस्य नाति विस्तरता सूचिता इत्यनुसन्धेयम् ॥ २—३ ॥

उत्तमाङ्गगतानां रोगाणां चिकित्सासु मध्ये नेत्ररोगचिकित्सा हि चिरात्सक्तं विचिकित्साविरहितं योजयतितरां स्फीतेन यशसा अनायासेन, आतुरमपिच सूचीविद्धैस्तमोभिरभिभूतं प्रापयत्यालोकलोकं नियमेन । चमत्करोति चापरेषां चेतांसीति तद्विज्ञानायाग्रेसराणां शिष्याणा मौत्सुक्यमपाकर्त्तुं प्रथमन्तावत् नेत्ररोगचिकित्सामधिकरोति विद्यादित्यादिना । द्व्यङ्गुलबाहुल्यं व्यासतः प्रायेण स्वाङ्गुलिद्वितयपरिमितं स्वाङ्गुष्ठोदरसम्मित मिति तु बाह्यतस्तथा सति श्वेतकृष्णात्मको बाह्योभागः स्वाङ्गुष्ठोदरमानेन परिमीयत इत्यवधेयम् । अथ चेत् "सम्मितं सदृशेऽपिच" इति कोषान्तर स्मरणात् सम्मितशब्दमिमं सदृशापरपर्य्यायं अवैषि तर्ह्याकृत्या बाह्योभागः स्वाङ्गुष्ठोदरमनुकरोतीति जानीहि । तथात्वे स्वपदस्य सङ्गतिश्चिन्त्या । सर्व्वतः परिधितः परितो वेष्टनमानत इति यावत् अत्रापि स्वकीयाङ्गुलमानेनैव सार्द्धेन द्व्यङ्गुलेन परिमितत्वं परिमातारः । नयनेत्यादौतु यथा कथञ्चित् तरङ्गबुद्बुदसाम्याद्बु-

पलं भुवोऽग्नितो रक्तं वातात् कृष्णं सितं जलात्।
आकाशादश्रुमार्गाश्च जायन्ते नेत्रबुद्बुदे ॥ ४ ॥
दृष्टिञ्चात्र तथा वक्ष्ये यथा ब्रूयाद्विशारदः।
नेत्रायामत्रिभागन्तु कृष्णमण्डलमुच्यते।
कृष्णात् सप्तममिच्छन्ति दृष्टिं दृष्टिविशारदाः ॥ ५ ॥
मण्डलानि च सन्धींश्च पटलानि च लोचने।
यथाक्रमं विजानीयात् पञ्च षट् च षडेव च ॥ ६ ॥

---

बुद्बुदशब्दो यथा रोमसंस्थाने रोमावर्त्तेत्यावर्त्तशब्दस्तद्वत्, एवञ्च नयनबुद्बुदं नयनगोलक मित्यर्थनिष्कर्षः। अक्षिबुद्बुदं हि स्वात्मनि मण्डलाकारतया संसक्तेन मेदोऽन्तर्गतेन अस्थिबन्धं निबद्धेन पेशीनिचयेनैवेतस्ततश्च पूर्य्येत आकुञ्चनप्रसारणाभ्यामेवं वदन्ति परितोऽभिवीक्ष्य भिषजो बुद्धिमन्तस्तदिदं जिज्ञासामहे तदन्वितस्यास्य का नामाकृतिरुपदिश्यते यामुपलभ्य विमुक्तसन्देहा विज्ञातमविज्ञातम्वा तदध्यवस्य विधिवद्भेषजोपयोगेनातुरमुपपादयिष्याम इत्येवमनुयुयुत्सूनपाकरोति गोस्तनेति। गोस्तनाकारं क्षीरपूर्णगोस्तनसदृशम्। सर्व्वेषां भूतानां गुणा उद्भवन्त्यत्र सर्व्वभूतगुणानामुद्भवो यत्रेति वा। पञ्चभूतोत्पन्नमित्यर्थात् मन्तव्यं "कारणद्रव्य समवायिनोगुणाः कार्य्यद्रव्येषु समानजातीयं गुणान्तरमारभन्ते" इति हि वैशेषिकराद्धान्तपद्धतिः। उक्तमर्थं विवृणोति पलमिति पलं मांसम्, अत्रैव सजातीयत्वात् शिरादीनामप्यन्तर्भावः। नेत्रबुद्बुदे वर्त्माद्यनुविद्धे इत्येव ब्रूमोवर्त्म्युपक्रमेन कमेव आस्रतराश्रुमार्गदर्शनात्। विशारदोऽत्र प्रकृतत्वाद्विदेहाधिपतिरेव। नेत्रेत्यादि आतुरोपक्रमणीयेहि आयुष्यलिङ्गत्वेन नःमस्तारकांशो दृष्टिरित्युपदिष्टम्। इदन्तु कृष्णात् सप्तम मिच्छन्तीति प्रायिकत्वेनेत्यदोषः ॥ ४—५ ॥

मण्डलानीत्यादि। मण्डलसाम्यान्मण्डलशब्दस्तथाच मण्डलानि यथा क्वचिद्गोलाः। पटलानीति "पटलंच्छदिः" इत्यमरस्मरणात् स्तराइति-

पक्ष्मवर्त्मसितकृष्णादृष्टीनां मण्डलानि तु ॥ ७ ॥
पक्ष्मवर्त्मगतः सन्धिर्वर्त्मशुक्लगतोऽपरः ।
शुक्लकृष्णगतस्त्वन्यः कृष्णदृष्टिगतोऽपरः ॥
ततः कनीनकगतः षष्ठश्चापाङ्गगः स्मृतः ।
अनुपूर्व्वन्तु ते मध्याश्चत्वारोऽन्त्या यथोत्तरम् ॥ ८ ॥

---

च्छादने प्रसिद्धत्वेनोपलब्धोऽपि पटलशब्दोऽत्र कुशलोदाराशयशब्दवदाभिधा हस्यावरणमात्रे प्रवर्त्तत इत्यवश्यं वक्तव्यम्, परमतो "जायते तिमिरं येषु त्सु तेः" नचैतदसङ्गेयम् तेष्वेव हि विकृतेष्वसंशयं तिमिराणि प्रादुर्भवन्तीत्यभीक्ष्णं पश्यामः । नासासमीपवर्त्ति नेत्रान्तभागापरपर्य्यायोऽयं कनीनकशब्दस्तदितरस्त्वपाङ्ग उच्यते । नन्वभिज्ञौ निपुणं निरीक्ष्यापि वयं मन्दमात्रेणापि कृष्णदृष्टिगतं सन्धिं नोपलभामहे शुक्लकृष्णगतं वर्त्मशुक्लगतञ्चासंशयम् । तदिदं भूयोऽपि विज्ञापयतु भगवान् येनास्माकं सम्यक् प्रत्ययो जायत इत्याह अन्त्याविति । अनुपूर्व्वं यथाक्रमं मध्या मध्यवर्त्तिनस्ते पक्ष्मवर्त्मगतादयश्चत्वारः सन्धयो यथोत्तरं अन्त्या उपदेशसौकर्य्यार्थमध्यस्थत्वाभ्यन्तरतम्येन यथाकथञ्चिदद्भुतरूपत्वाच्च निहीना इत्यर्थः । एतेनैतदुक्तं भवति कृष्णमण्डलादधोविन्यासविशेषेण विन्यस्तानां सूक्ष्माणां शिराणां योऽवकाशे दृष्टिमण्डलेति संज्ञा क्रियते तस्य चापाततः सन्धित्वेनानुभवात् सन्धित्वमभ्युपेयते यथा अमत्यत्वेऽप्याकाशे तलमलिनताद्योऽभ्युपगम्यन्ते तद्वत् । शेषौ तु तरतमयोगतः सन्धित्वेनानुभूयेते । इत्युपपन्नं भवति वर्त्मशुक्लगतोऽपर इत्यादि । केचित्तु भिषक्कल्पना चरन्तो वैयाकरणपाशाः पक्ष्मवर्त्मगतेत्यादिवचनात् परं प्रमादादाश्लिष्टमर्द्धश्लोकमिमं तेनैवाभ्येतुं बहुधा प्रयतमानाः कथं देवानां प्रिया इव नापत्रपिरन् ॥ ६—८ ॥

द्वे वर्त्मपटले विद्यात्चत्वार्य्यन्यानि चाक्षिणि ।
जायते तिमिरं येषु व्याधिः परमदारुणः ॥
तेजोजलाश्रितं बाह्यं तेष्वन्यत् पिशिताश्रितम् ।
मेदस्तृतीयं पटलमाश्रितन्त्वस्थि चापरम् ॥

तेज इत्यादि । इदमत्रावधेयम् अक्षिवुद्वुदयोर्हि पश्यामः कृष्णमण्डलं कृष्णशिरावलयसहितोजलकोष्ठो दृष्टिमण्डलं मेदःप्रकोष्ठश्चाधोऽधोवर्त्तते वर्त्मनेत्रानयोर्वक्ष्यमाणप्रकारे द्वे एव भवत इत्येतेषु मध्ये दृष्टिमण्डलादीनामावरणान्येव पटलत्वेनेह व्याचिख्यासितानीति परमतो वक्ष्यो भविष्यति । तथाचैतेषु मध्ये यत् पटलं खद्योतविस्फुलिङ्गवदुज्ज्वलं स्वच्छञ्च तैजसं जलं मण्डलाकारेण पिदधत् दृष्टिमण्डलमभिनिर्व्वर्त्तयत्यभितो मेदःप्रकोष्ठनिबद्धे शिरावलये मांसाश्रये द्वितीयपटलोर्द्ध्वभागेच सव्यापसव्याभ्यां वाह्याभ्यां शिराभ्यामानमचलीकर्त्तुम्, तदेवेतरेभ्योवहिर्निहितमण्डलाश्रितत्वात् वाह्यं पटलमुच्यते । दृष्टिं प्रकृत्य वक्ष्यतिच "खद्योतविस्फुलिङ्गाभ्यां सिद्धां तेजोभिरव्ययैः । आवृतां पटलेनाक्ष्णोर्वाह्येन" इत्येवञ्चेह "तेजःशब्देन रक्तं जलशब्देनच रसोव्याख्यातः" इति यत् केनचिदनालोचिततत्त्वार्थेनानवेक्षितपटलेनोक्तं तन्ना अवतुष्व मे'च्छसि चेदन्धेन नीयमानानामन्धानां पदवीमनुसर्त्तुम् । तेष्विति । तेषु पटलेषु मध्ये अन्यत् द्वितीयं पटलं पिशिताश्रितम्, दृष्टिमण्डलस्याभ्यन्तरात् विन्यस्तं सूक्ष्मपटाभिनिर्वृत्तं मेदःप्रकोष्ठं यथावत् प्रच्छाद्यावस्थितं तृतीयं पटलं समन्तादावृत्य मांसमधिष्ठितमित्यर्थः । परमार्थतः पटलाख्यास्य द्विलेऽप्येकत्वेन विजृम्भितत्वादिदमुच्यते द्वितीयं पिशिताश्रितमित्यनुसन्धेयम् । इदृपदार्थस्याख्या बाह्यतोवर्णः श्वेतोऽभ्यन्तरेच गाढ़ः पाटल इत्यवबुध्यस्व । मेद इति । तृतीयं पटलं मेदसाश्रितं मेदसोऽस्य परमसूक्ष्मपटावृतत्वात् बाह्यादिव मेद-

पञ्चमांशसमं दृष्टेस्तेषां बाहल्यमिष्यते ॥ ८ ॥

शिराणां कण्डराणाञ्च मेदसः कालकस्य च ।

गुणाः कालात् परः श्लेष्मा बन्धनेऽक्ष्णोः शिरायुतः ॥

---

चाश्रित्यावस्थितं मेदःप्रकोष्ठावरणभूतमित्येतत् । मेदश्च तदुज्ज्वलं पाटलं चावधारय । अपरं वक्ष्यमाणाक्षिबन्धनाच्छादकत्वेन परिलक्षितं चतुर्थं पटलं ति तस्मान्मेदःप्रकोष्ठाच्छिरःसृत्य शिरःकपालं भित्त्वान्तःप्रविशत् सर्व्वतस्तदेवा- वृणोति मस्तिष्कपटमात्मन्यासज्य, तदिदं साम्प्रतमुक्तम् अस्थिचापरमिति । पञ्चनेति । बाहल्यं सान्द्रता घनतेति यावत् । वचनमिदं छलिणो गच्छन्तीति अनुपदिष्टमित्यवगन्तव्यम्, दृश्यते हि यावत् पटलं दृष्टेरष्टमांशमेवानुकरोति बाहल्येनेति ॥ ८ ॥

सम्प्रति चतुर्थपटलानुयायित्वात् पारिशेष्याच्चाक्ष्णोर्हि बन्धने विजिज्ञापयिषति शिराणामित्यादिना, इदमत्राध्यवसेयम् प्रत्येकमक्षिबुद्बुदयोरधस्ता- न्निर्गताश्च समान्तरितेन मेदसानुविद्धा द्वेधा विभक्ताः शिराधमन्यः कण्ड- राश्च फलकन्तमनुकुर्व्वत्योरन्याकारेण परिणम्य द्वे कपालास्थि विवरे प्रविश्याङ्गुलिमात्रे समियुः समेत्य च काश्चित् सव्यापसव्यविपर्य्यासेन काश्चित् पुनर्यथा विभागमेव मस्तिष्कमनुसरन्त्यो व्यपेयुर्व्यपेत्य च तद्गता शिराधमनीः कण्डराश्चाक्षिणी यथास्थानं स्थापयितुमवतिष्ठन्ते तदिदमुक्तं शिराणा- मिति । अत्राद्येन शिराशब्देन शिराधमनीनां श्लेषेण च शिराधमनीकण्ड- राणां परिग्रहः क्रियते तथैव तत्त्वपरिकलितत्वात् । कालकस्येत्यत्रोऽर्थेनाम् । कठलयति मस्तुलुङ्गमिति व्युत्पत्त्या कालशब्दश्चात्र शिरःकपालमभिधत्त- इत्यायुर्व्वेदविदो भाषन्ते तदयमर्थः शिराणां धमनीनां कण्डराणां काल- कस्य संयोगस्यतोरचिन्त्यत्वात् स्वभावतो वा किञ्चिदवात्मितवर्णस्य मेदसो-

शिरानुसारिभिर्दोषैर्विगुणैरूर्द्ध्वमागतैः ।
जायन्ते नेत्रभागेषु रोगाः परमदारुणाः ॥ १० ॥
तत्राविलं ससंरम्भमश्रुपूर्णोपदेहवत् ।
गुरूषाचोषरागाद्यैर्जुष्टं चाव्यक्तलक्षणैः ॥
सशूलं वर्त्मकोषेषु शूकपूर्णाभमेव च ।
विहन्यमानं रूपे वा क्रियास्वक्षि यथा पुरा ॥ ११ ॥
दृष्ट्वैव धीमान् बुध्येत दोषेणाधिष्ठितन्तु तत् ।
तत्र सम्भवमासाद्य यथादोषं भिषग्जितम् ।
विदध्यान्नेत्रजा रोगा बलवन्तः स्युरन्यथा ॥ १२ ॥
संक्षेपतः क्रियायोगो निदानपरिवर्ज्जनम् ।
वातादीनां प्रतीघातः प्रोक्तो विस्तरतः पुनः ॥ १३ ॥

---

गुणाद्देशाविभक्ता रज्जवः कालात् कपालात् परःपरवर्त्ती शिरःकपालगह्वरस्थ इति यावत् शिरायुतः संश्लेषानुगुणाभिः शिराधमनीकण्डराभिरन्वितः श्लेष्मा मस्तिष्कवाक्ष्णोर्बन्धने सम्भूय भवत इति शेषः सन्धिरार्थः । अञ्जसितस्तावत् नेत्रस्वरूपविवेकः इदानीन्तु लक्षणादितस्तद्गतान् रोगानेव प्रवर्त्तयिष्याम इत्यभिसन्धायाह शिरेति । तत्र रोगेषु अव्यक्तलक्षणात्वेन जायमानेष्वित्यर्थः । आविलं कलुषम् ससंरम्भमीषद्रागवेदनम् दूषिका विद्यते यस्येत्युपदेहवत् । अव्यक्तलक्षणैरीषद्व्यक्तलक्षणैः, वर्त्मकोषेषु वर्त्मान्तकोषावच्छेदेषु शूकपूर्णाभं धान्यादीनां तीक्ष्णाग्रेण प्रपूरितमिव क्लेशावहम् । रूपे शुक्लकृष्णश्यामकेस्वरूपे क्रियासु दर्शनोन्मीलनादिषु यथा पुरा लक्षितं ततो विहन्यमानं विकृतिमापद्यमानम् अक्षि दृष्ट्वैवेति अर्थ-

उष्णाभितप्तस्य जलप्रवेशाद्दूरेक्षणात् स्वप्नविपर्ययाच्च।
प्रसक्तसंरोदनशोककोप-क्लेशाभिघातादतिमैथुनाच्च॥
शुक्तारनालाम्लकुलत्थमाषनिषेवणाद्वेगविनिग्रहाच्च।
स्वेदाद्रजोधूमनिषेवणाच्च छर्द्देर्विघाताद्वमनातियोगात्।
बाष्पग्रहात्सूक्ष्मनिरीक्षणाच्च नेत्रे विकारान् जनयन्ति दोषाः॥ १४

वाताद्दश तथा पित्तात् कफाच्चैव त्रयोदश।
रक्तात् षोड़श विज्ञेयाः सर्व्वजाः पञ्चविंशतिः।
तथा बाह्यौ पुनर्द्वौ च रोगाः षट्सप्ततिः स्मृताः॥ १५॥
हताधिमन्थो निमिषो दृष्टिर्गम्भीरिका च या।
यच्च वातहतं वर्त्म न ते सिध्यन्ति वातजाः॥
याप्योऽथ तन्मयः काचः साध्याः स्युः स्यन्दमारुताः।
शुष्काक्षिपाकाधिमन्थ-स्यन्दमारुतपर्य्ययाः॥ १६॥

थान्वयः। सम्भवयस्मादिति सम्भवो वातादीनां वैगुण्यं संक्षेपत इति। चवाक्यस्थानाधिष्ठानोऽयं पुनःशब्दः, निदानपरिवर्ज्जनं विस्तरतः प्रोक्तो वातादीनां प्रतीघातश्च संक्षेपतः क्रियायोग इतियोजना॥ १०—१३॥

उष्णेति। क्लेशोऽत्र तुषारवर्षातपादिसेवाजनितं ज्वरादीनामतिसन्तापादि-जनितश्च दुःखम्। अतवेगाभिघातादित्यनेनैव छर्द्दिबाष्पवेगाभिघातयोरुप-लम्भेऽपि पृथगुपादानं नितरामात्ययिकत्वमाख्यातुम्॥ १४॥

ते पुनः षट् सप्तती रोगा यथाक्रमं नामादितो निर्द्दिश्यन्ते इत्यादिना। वातहतं वर्त्म वातवर्त्म तन्नामोवातात्मकः अन्यमारुतोऽन्यतोवातः मारुतप-

असाध्यो ह्रस्वजाड्यो यो जलस्रावश्च पैत्तिकः ।
परिम्लायी च नीलश्च याप्यः काचोऽथ तन्मयः ॥
अभिष्यन्दोऽधिमन्थोऽम्लाध्युषितं शुक्तिकाह्वया ।
दृष्टिः पित्तविदग्धा च धूमदर्शी च सिध्यति ॥ १७ ॥
असाध्यः कफजः स्रावो याप्यः काचोऽथ तन्मयः ।
अभिष्यन्दोऽधिमन्थश्च बलासग्रथितश्च यत् ॥
दृष्टिः श्लेष्मविदग्धा च पोथक्यो लगणश्च यः ।
क्रिमिग्रन्थिपरिक्लिन्न-वर्त्म शुक्लार्म्मपिष्टकाः ॥
श्लेष्मोपनाहः साध्यास्तु कथिताः श्लेष्मजेषु तु ॥ १८ ॥
रक्तास्रावोऽजकाजातं शोणितार्शोऽव्रणं स्थितम् ।
शुक्रं न साध्यं काचश्च याप्यस्तज्जः प्रकीर्त्तितः ॥
मन्थस्यन्दौ क्लिष्टवर्त्म हर्षोत्पातौ तथैव च ।
शिराजातवञ्जनाख्या च शिराजालञ्च यत् स्मृतम् ॥

---

थ्येयान्तेषु वातजेषु दशसु मध्ये निमिषो वातवर्त्म च वर्त्मगते गम्भीरिका काचश्च दृष्टिगतौ, शेषास्तु षट् सर्व्वगताः । असाध्य इति अत्र नील इति विशेषणं काचस्यास्य पैत्तिकत्वं झटित्यवगमयति । अभिष्यन्दादयस्तु प्रतिपदं सिध्यतीत्यभिनान्वेति । पित्तजेष्वेतेषु दशसु मध्ये जलस्रावः सन्धिगतः शुक्तिका शुक्लगता अभिष्यन्दादयस्त्रयः सर्व्वगताः शेषास्तु पञ्च दृष्टिगतत्वेव लक्षणीयाः । असाध्य इति श्लेष्मोपनाहान्तेष्वेतेषु कफजेषु त्रयोदशसु मध्ये कफजस्रावक्रिमिग्रन्थिःश्लेष्मोपनाहाः सन्धिगताः, अभिष्यन्दोऽधिमन्थश्च सर्व्वगतौ श्लेष्मविदग्धदृष्टिः काचश्च दृष्टिगतौ क्लिन्नवर्त्मपोथक्योलगणश्च वर्त्मगताः

पर्व्वण्यथाव्रणं शुक्रं शोणितार्म्मार्ज्जुनञ्च यः ।
एते साध्या विकारेषु रक्तजेषु भवन्ति हि ॥ १८ ॥
पूयस्रावो नाकुलान्ध्यमक्षिपाकात्ययोऽलजी ।
असाध्याः सर्व्वजा याप्याः काचः कोपश्च पक्ष्मणः ॥
वर्त्मावबन्धो यो व्याधिः शिरासु पिड़का च या ।
प्रस्तार्य्यर्म्माधिमांसार्म्म स्नाय्वर्म्मोत्सङ्गिनी च या ।
पूयालसश्चार्व्वुदञ्च श्यावकर्द्दमवर्त्मनी ।
तथार्शोवर्त्म शुष्कार्शः शर्करावर्त्म यच्च वै ॥
सशोफश्चाप्यशोफश्च पाको बहलवर्त्म च ।
अक्लिन्नवर्त्म कुम्भीका विसवर्त्म च सिध्यति ॥ २० ॥
सनिमित्तोऽनिमित्तश्च द्वावसाध्यौ तु वाह्यजौ ॥ २१ ॥
षट्सप्ततिविकाराणामेषा संग्रहकीर्त्तना ॥ २२ ॥
तत्र सन्ध्याश्रयास्तेषु वर्त्मजास्त्वेकविंशतिः ।
शुक्लभागे दशैकश्च चत्वारः कृष्णभागजाः ॥

---

शेषास्तु त्रयः शुक्लगताः । एते इत्यादि अवलम्बितं सव्रणत्वेन निम्नरूपतयावबद्धं शुक्लम्, सव्रणं शुक्रमित्येतत्, मन्थोऽधिमन्थः स्यन्दोऽभिष्यन्दः, अक्षिपाका- अञ्जननामिका योऽनुयस्तेषु *रक्तजेषु मध्ये पर्व्वणी रक्तास्रावश्च सन्धिगतौ अजकाजात मवलम्बित मव्रणञ्च शुक्रं कृष्णगतं क्लिष्टवर्त्मशोणितार्शो ऽल्प- सःस्था वर्त्मगताः काचोऽक्लिष्टमतः शिराजालशोणितार्म्मार्ज्जुनाद शुक्लगताः शेषा चत्वारः सर्व्वगताः । पूयेत्यादि काचःपक्ष्मणः कोपश्च याप्य इति

सर्व्वाश्रया सप्तदश दृष्टिजा द्वादशैव तु।
वाह्यजौ द्वौ समाख्यातौ रोगौ परमदारुणौ॥
भूय एतान् प्रवक्ष्यामि संख्यारूपचिकित्सितैः॥ २२॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे औपद्रविको
नाम प्रथमोऽध्यायः॥ १॥

---

समन्वयः। वर्त्मावबन्धादयस्तु प्रत्येकशः सिध्यतीति परीक्षान्वेयाः। एतेषु वाह्यजेन द्वितयेन सह सन्निपातजेषु पञ्चविंशतिषु मध्ये पूयस्रावोऽलजी पूयालसश्च सन्धिगताः अर्ज्जिपाकात्ययः कृष्णगतः, नाकुलान्ध्यकाचसनिमित्ता-निमित्ता दृष्टिगताः, शिराज पिडकाप्रस्तार्य्यर्म्माधिमांसार्म्म स्नाय्वर्म्माणि शुक्ल गतानि सशोफपाकोऽशोफपाकश्च सर्व्वगतौ शेषास्तु त्रयोदशवर्त्मगताः इति तु तन्त्रमिदमवगाह्योन्नेया। परिशिष्टं निगदव्याख्यातम्॥ १५—२२॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
उत्तरतन्त्रे औपद्रविको नाम प्रथमोऽध्यायः॥

# द्वितीयोऽध्यायः ।

अथातः सन्धिगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥१॥

पूयालसः सोपनाहः स्रावाः पर्व्वणिकालजी ।
क्रिमिग्रन्थिश्च विज्ञेया रोगाः सन्धिगता नव ॥ २ ॥

पक्वः शोफः सन्धिजः संस्रवेद्यः सान्द्रं पूयं पूतिपूयालसः सः ।
ग्रन्थिर्नाल्पो दृष्टिसन्धावपाकः कण्डूप्रायो नीरुजस्तूपनाहः ॥

गत्वा सन्धीनश्रुमार्गेण दोषाः
कुर्य्युः स्रावान् रुग्विहीनान् स्वलिङ्गान् ।
तान् वै स्रावान् नेत्रनाडीमथैके
तस्या लिङ्गं कीर्त्तयिष्ये चतुर्द्धा ॥

---

पूर्व्वाध्याये "नवसङ्ख्याः स्मृतास्तेषु" इत्युपक्रम्य 'भूय एतान् प्रवक्ष्यामि संख्यारूपचिकित्सितैः" इति हि समयाम्बभूव तदिदानीं प्रक्रान्तत्वात् सन्धिगत रोगविज्ञानीयमधिकरोति अथात इत्यादिना ॥ १॥

नन्वभिहितेषु हताधिमन्थादिषु मध्ये के नाम नव सन्धिगतारोगाः ? आह पूयेति । कनीनकसन्धौ जातः सन्धिजः । उक्तञ्चान्यत्र "पूयालसन्तु तं विद्यात् सन्धौ काणीनके नृणाम्" इति । ग्रन्थिरिति । दृष्टिसन्धौ दृष्टिविवरे जल-कोष्ठपटोपरीति यावत् । अपाकः पाकेनविनाकृतः । ये तु पुनर्भिषग्मानिनो रोगमिमं क्वचिदपि नापश्यंस्त एवेह नञो मुख्यार्थं तृणीकृत्य पाक ईषत्पाक-

(क) पाकः सन्धौ संस्रवेद्यस्य पूयं
पूयास्रावो नैकरूपः प्रदिष्टः ॥

(ख) श्वेतं सान्द्रं पिच्छिलं यः स्रवेच्च
श्लेष्मास्रावो नीरुजः स प्रदिष्टः ॥

(ग) रक्तास्रावः शोणितोत्थः सरक्तं
कोष्णं नाल्पं संस्रवेन्नातिसान्द्रम् ॥

(घ) पीताभासं नीलमुष्णं जलाभं
पित्तस्रावः संस्रवेत् सन्धिमध्यात् ॥ ३ ॥

ताम्रा तन्वी दाहशूलोपपन्ना रक्ताज्ज्ञेया पर्व्वणी वृत्तशोफा ।
जातासन्धौ कृष्णशुक्लेऽलजी स्यात्तस्मिन्नेवाख्यापिता पर्व्वलिङ्गैः ॥ ४
कृमिग्रन्थिर्वर्त्मनः पक्ष्मणश्च कण्डूं कुर्य्युः कृमयः सन्धिजाताः ।

---

इत्याचष्टत इत्यनुमिमीमहे । उपनाहो लेपभेदस्तत्साम्यात् पटाकारेण विन्यस्ते श्लेष्मण्युपनाहेति संज्ञा क्रियते । ताम्रेत्यादि । तस्मिन् कृष्णशुक्ल एव पूर्व्वलिङ्गैः प्रमेहनिदानाभिहितैरलजीलिङ्गैरलजी ख्यापिता स्यात् । अत्र पूर्व्वलिङ्गैरित्यनेनव्याधेरस्य त्रिदोषजत्वमपि व्याजेन सूचयाम्बभूवेति गम्यते । प्राक् तस्यास्त्रिदोषजत्वेनोपदेशात्, दोषाणामेव लिङ्गजनकत्वेनाभ्युपगमाच्च 'दोषाः प्रवृद्धाः स्वंलिङ्गं दर्शयन्ति'' इति, च० सू० १७ अ० । अहोवताऽस्मिन् टीकाकृतामसतीभीरावान्तपद्धतिभिर्भिषग् बुभूषवोऽतिवेलमाकुलीक्रियन्ते ताभिर्हि तत्त्वार्थानुपलम्भात् विषण्णमनसस्ते कितवाइवाद्यपराजिताः पौनःपौन्येन निष्क्रामन्तोऽहर्निशमतिवाहयन्तीति मत्वा ताः प्रति चेत् किञ्चन किञ्चन

नानाकृया वर्त्मशुक्लस्य सन्धौ चरन्तोऽन्तर्नयनं दूषयन्ति ॥ ५ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे सन्धिगतरोगविज्ञानीयो

नाम द्वितीयोऽध्यायः ॥ २ ॥

ब्रूमः तत्रैव्याख्यानोवक्तुमलापित्वं ख्यापयेमेति वयमिहोदास्महे । क्रिमीत्यादौ यथेत्यूह्यम् । दूषयन्ति वर्त्म भक्षणेनेत्युन्नेयम् । परिशिष्टं निगदव्याख्यातम् ॥ २—५ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे सन्धिगतरोगविज्ञानीयोनाम द्वितीयोऽध्यायः ।

---

# तृतीयोऽध्यायः ।

अथातो वर्त्मगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥१॥

पृथग्दोषाः समस्ताश्च यदा वर्त्मव्यपाश्रयाः ।

शिरा व्याप्यावतिष्ठन्ते वर्त्मस्वधिकमूर्च्छिताः ॥

विवर्द्ध्य मांसं रक्तञ्च तदा वर्त्मव्यपाश्रयान् ।

विकारान् जनयन्त्याशु नामतस्तान् निबोधत ॥

उत्सङ्गिन्यथ कुम्भीका पोथक्यो वर्त्मशर्करा ।
तथार्शोवर्त्म शुष्कार्शस्तथैवाञ्जननामिका ॥
बहलं वर्त्म यच्चापि व्याधिर्वर्त्मावबन्धकः ।
क्लिष्टकर्द्दमवर्त्माख्यौ श्याववर्त्म तथैव च ॥
प्रक्लिन्नमपरिक्लिन्नं वर्त्म वातहतन्तु यत् ।
अर्व्वुदं निमिषश्चापि शोणितार्शश्च यत् स्मृतम् ॥
लगणो विसनामा च पक्ष्मकोपस्तथैव च ।
एकविंशतिरित्येते विकारा वर्त्मसंश्रयाः ॥ २ ॥
नामभिस्ते समुद्दिष्टा लक्षणैस्तान् प्रवक्ष्महे ।
पिड़काभ्यन्तरमुखी वाह्याऽधोवर्त्मसंश्रया ।
विज्ञेयोत्सङ्गिनी नाम तद्रूपपिड़कान्विता ॥ ३ ॥
कुम्भीकवीजप्रतिमाः पिड़काः पक्ष्मवर्त्मनोः ।
आध्मायन्ते तु भिन्ना याः कुम्भीकपिड़कास्तु ताः ॥ ४ ॥
कण्डूस्रावान्विता गुर्व्यो रक्तसर्षपसन्निभाः ।
पिड़काश्च रुजावत्यः पोथक्य इति संज्ञिताः ॥ ५ ॥
पिड़काभिः ससूक्ष्माभिर्घनाभिरभिसंवृता ।
पिड़का या खरा स्थूला सा ज्ञेया वर्त्मशर्करा ॥ ६ ॥

---

प्रक्रान्तत्वादिदानीं वर्त्मगतरोगविज्ञानीय मधिकरोति अथात इत्या-दिना ॥ १—२ ॥

नामभिरिति उत्सङ्गिनी क्रोड़वती अतिशायने वतुप । तद्रूप पिड़का-

एर्व्वारुबीजप्रतिमाः पिडका मन्दवेदनाः।
सूक्ष्माः खराश्च वर्त्मस्थास्तदर्शोवर्त्म कीर्त्यते ॥ ७ ॥
दीर्घोऽङ्कुरः खरः स्तब्धो दारुणो वर्त्मसम्भवः।
व्याधिरेष समाख्यातः शुष्कार्श इति संज्ञितः ॥ ८ ॥
दाहतोदवती ताम्रा पिडका वर्त्मसम्भवा।
मृद्वी मन्दरुजा सूक्ष्मा ज्ञेया साऽञ्जननामिका ॥ ९ ॥
वर्त्मोपचीयते यस्य पिडकाभिः समन्ततः।
सवर्णाभिः समाभिश्च विद्याद्बहलवर्त्म तत् ॥ १० ॥
कण्डूमताल्पतोदेन वर्त्मशोफेन यो नरः।
न समं छादयेदक्षि भवेद्बन्धः स वर्त्मनः ॥ ११ ॥
मृद्वल्पवेदनं ताम्रं यद्वर्त्म सममेव च।
अकस्माच्च भवेद्रक्तं क्लिष्टवर्त्म तदादिशेत् ॥ १२ ॥
क्लिष्टं पुनः पित्तयुक्तं विदहेच्छोणितं यदा।
तदा क्लिन्नत्वमापन्नमुच्यते वर्त्मकर्दमम् ॥ १३ ॥
यद्वर्त्म बाह्यतोऽन्तश्च श्यावं शूनं सवेदनम्।
दाहकण्डूपरिक्लेदि श्याववर्त्मेति तन्मतम् ॥ १४ ॥
अरुजं बाह्यतः शूनमन्तःक्लिन्नं स्रवत्यपि।
कण्डूनिस्तोदभूयिष्ठं क्लिन्नवर्त्म तदुच्यते ॥ १५ ॥

---

न्विता स्वानुरूपपिडकासंसक्तमध्या। कुम्भीकः पुन्नागः, एर्व्वारुः कर्कटी कर्दमवर्त्मान्तेष्वेतेषु मध्ये वर्त्मावबन्धव्यतिरिक्ताः सर्व्व एवाभ्यन्तरा इत्यव-सेयम् ॥ ३—१५ ॥

यस्य धौतानि धौतानि सम्बध्यन्ते पुनःपुनः ।
वर्त्मान्यपरिपक्वानि विद्यात्क्लिन्नवर्त्म तत् ॥ १६ ॥
विमुक्तसन्धि निश्चेष्टं वर्त्म यस्य निमील्यते ।
एतद्वातहतं विद्यात् सरुजं यदि वाऽरुजम् ॥ १७ ॥
वर्त्मान्तरस्थं विषमं ग्रन्थिभूतमवेदनम् ।
विज्ञेयमर्व्वुदं पुंसां सरक्तमवलम्बितम् ॥ १८ ॥
निमेषिणीः शिरा वायुः प्रविष्टो वर्त्मसंश्रयाः ।
चालयेदति वर्त्मानि निमेषः स गदो मतः ॥ १९ ॥
छिन्नाश्छिन्ना विवर्द्धन्ते वर्त्मस्था मृदवोऽङ्कुराः ।
दाहकण्डूरुजोपेतास्तेऽर्शः शोणितसम्भवम् ॥ २० ॥
अपाकः कठिनः स्थूलो ग्रन्थिर्वर्त्मभवोऽरुजः ।
सकण्डुः पिच्छिलः कोलप्रमाणो लगणस्तु सः ॥ २१ ॥
शूनं यद्वर्त्म बहुभिः सूक्ष्मैश्छिद्रैः समन्वितम् ।
विसमन्तर्जलमिव विसवर्त्मेति तन्मतम् ॥ २२ ॥

---

यस्येत्यादि । अपरिपक्वान्यसम्यक्पक्वान्यपि वर्त्मानि पुनः पुनः सम्बध्यन्ते पूयाकारेण श्लेष्मणान्योन्यं दृढमाश्लिष्यन्त इत्यर्थः। अतहि वर्त्मनामपरिपक्वत्वात्मनाङ् निःसृतेनैव तथाविधेन श्लेष्मणा संश्लेषो भवतीति साम्प्रतमुक्तमक्लिन्नवर्त्मेति । विमुक्तेति यस्य वर्त्मनिमील्यते एकान्तत उन्मीलनशक्त्या परिहीयत इत्यर्थः । यन्न निमील्यत इत्येवन्त्वशाब्दिकानुमोदितः पाठः । वर्त्मेति अवलम्बितं नितरां वर्त्माश्रितम् न पुनर्मुष्कादिवल्लम्बमानमित्य-

पक्ष्माशयगता दोषास्तीक्ष्णाग्राणि खराणि च ।
निर्वर्त्तयन्ति पक्ष्माणि तैर्घृष्टञ्चाक्षि दूयते ॥
उत्पाटितैः पुनः शान्तिः पक्ष्मभिश्चोपजायते ।
वातातपानलद्वेषी पक्ष्मकोपः स उच्यते ॥ २३ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे वर्त्मगतविज्ञानीयो
नाम तृतीयोऽध्यायः ॥ ३ ॥

सुगम् । एष्वपि शोणितार्शः प्रभृतयस्त्रय आभ्यन्तरत्वेन लक्षणीयाः, निर्वर्त्तयन्ति नेत्रान्तः प्रवेशयन्ति । परिशिष्टमतिरोहितार्थम् ॥ १६—२३ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
उत्तरतन्त्रे वर्त्मगतरोगविज्ञानीयोनाम तृतीयोऽध्यायः ।

---

# चतुर्थोऽध्यायः ।

अथातः शुक्लगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥ १ ॥
प्रस्तारिशुक्लक्षतजाधिमांसस्नायर्म्मसंज्ञाः खलु पञ्च रोगाः ।

---

सम्प्रत्यनुक्रमागतत्वात् शुक्लगतरोगविज्ञानीयमधिकरोति अथात इत्यादिना ॥ १ ॥

स्युः शुक्तिका चार्ज्जुनपिष्टकौच जालं शिराणां पिडकाश्च याः स्युः ॥
रोगा वलासग्रथितेन सार्द्धमेकादशाच्णोः खलु शुक्लभागे ॥ २ ॥
प्रस्तारि प्रथितमिहार्म्म शुक्लभागे विस्तीर्णं तनु रुधिरप्रभं सनीलम्।
शुक्लाख्यं मृदु कथयन्ति शुक्लभागे सश्वेतं सममिह वर्द्धते चिरेण॥

यन्मांसं प्रचयमुपैति शुक्लभागे
पद्माभं तदुपदिशन्ति लोहितार्म्म ॥
विस्तीर्णं मृदु बहलं यकृत् प्रकाशं
श्यावं वा तदधिकमांसजार्म्म विद्यात्।
शुक्ले यत् पिशितमुपैति वृद्धिमेतत्
स्नाय्वर्म्मेत्यभिपठितं खरं प्रपाण्डु ॥
श्यावाः स्युः पिशितनिभास्तु विन्दवो ये
शुक्तिर्वा सितनयने स शुक्तिसंज्ञः।
एको यः शशरुधिरोपमः सुविन्दुः
शुक्लस्थो भवति तमर्ज्जुनं वदन्ति ॥
उत्सन्नः सलिलनिभोऽथ पिष्टशुक्लो
विन्दुर्यः सम्भवति पिष्टकः सुवृत्तः।

---

प्रस्तारीति। पिड़काश्चेति चकारेण शिराणामित्याक्षिप्यान्वीयते। सनीलमिति ईषद्योगेनाप्राधान्यादीषन्नीलमित्यर्थः। शुक्ले इति यत्पिशितं वृद्धिमुपैति खरं स्नायुव्ययवाहुल्यात् कर्कशं प्रपाण्डु च तन्मांसस्नाय्वर्म्मेति परिपठितं पूर्व्वाचार्य्यैरिति शेषः। श्यावा इति। शुक्तिर्व्वा शुक्त्याकारो विन्दुर्व्वा

जालाभः कठिनशिरो महान् सरक्तः

सन्तानः स्मृत इह जालसंज्ञितस्तु ॥

शुक्लस्थाः सितपिड़काः शिरावृता या-

स्ताविद्यादसितसमीपजाः शिराजाः ।

कांस्याभो भवति शिरावृतः सिते यो

विन्दुर्वा स तु निरुजो वलासकाख्यः ॥ ३ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे शुक्लगतरोगविज्ञानीयो नाम चतुर्थोऽध्यायः ॥ ४ ॥

अत्र शुक्तिसंज्ञाविधानाच्छुक्त्याकारो विन्दुरेव प्रायेण भवतीति व्याजेन सूचयां मास। उन्नत उन्नतः सलिलनिभः सलिलवत् स्वच्छः तण्डुलपिष्टवच्छुक्लः पिष्टकः। परिशिष्टमतिरोहितार्थम् ॥ २—३ ॥

इति श्रीनारायणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे शुक्लगतरोगविज्ञानीयोनाम चतुर्थोऽध्यायः ॥

# पञ्चमोऽध्यायः ।

अथातः कृष्णगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥१

यत् सव्रणं शुक्रमथाव्रणं वा पाकात्ययश्चाप्यजका तथैव ।
चत्वार एतेऽभिहिता विकाराः कृष्णाश्रयाः संग्रहतः पुरस्तात् ॥२
निमग्नरूपं हि भवेत्तु कृष्णे सूच्येव विद्धं प्रतिभाति यद्वै ।
स्रावं स्रवेदुष्णमतीव रुक् च तत् सव्रणं शुक्रमुदाहरन्ति ॥
दृष्टेः समीपे न भवेत्तु यच्च न चावगाढ़ं न च संस्रवेद्धि ।
अवेदनावन्न च युग्मशुक्रं तत् सिद्धिमाप्नोति कदाचिदेव ॥
सितं यदा भात्यसितप्रदेशे स्यन्दात्मकं नातिरुगश्रुयुक्तम् ।
विहायसीवाभ्रदलानुकारि तदव्रणं साध्यतमं वदन्ति ॥

---

सम्प्रति चत्वारः कृष्णभागजा इत्युनुक्रमागतं समासेनोक्तमर्थं स्फुटीकृत्यावगमयन् कृष्णगतरोगविज्ञानीयं नामाधिकरोति अथात इत्यादिना ॥१

यदिति । च शब्दस्यानाधिष्ठानोऽयमथशब्दः, तथाचाव्रणञ्च शुक्रमित्यर्थनिष्कर्षः । यत् यस्मादेते चत्वारो रोगाः कृष्णाश्रया अभिहिताः पूर्व्वाचार्य्यैस्तस्मात् पुरस्तात् संग्रहतः संक्षेपतः चत्वारः कृष्णभागजा इत्युक्तमिति शेषः ॥ २ ॥

निमग्नेति । निमग्नमस्वच्छत्वेनान्तःप्रविष्टमिवानुभूतं रूपं कृष्णमण्डलगत उज्ज्वलः कृष्णोवर्णोऽस्मात्तन्निमग्नरूपम् । वा इति निपातस्तार्थमेवात्मीकरोति । कृष्णे कृष्णैकदेशे यच्च पुनः सूच्या विद्धमिव प्रतिभातीत्यर्थः । स्राव-

गम्भीरजातं बहलञ्च शुक्रं चिरोत्थितञ्चापि वदन्ति कृच्छ्रम् ॥
विच्छिन्नमध्यं पिशिताहृतं वा चलं शिरासक्तमदृष्टिकृच्च ।
द्वित्वग्गतं लोहितमन्ततश्च चिरोत्थितञ्चापि विवर्ज्जनीयम् ॥
उष्णाश्रुपातः पिड़का च कृष्णे यस्मिन् भवेन्मुद्गनिभञ्च शुक्रम् ।
तदप्यसाध्यं प्रवदन्ति केचिदन्यच्च यत् तित्तिरिपक्षतुल्यम् ॥
संछाद्यते श्वेतनिभेन सर्व्वं दोषेण यस्यासितमण्डलन्तु ।
तमक्षिपाकात्ययमक्षिकोपसमुत्थितं तीव्ररुजं वदन्ति ॥

---

मेष्वात्मकमास्रावं स्रवेत् स्रावयेत् । सितमिति । अभिष्यन्द एवहि प्रवृद्धो ऽधिमन्थेति संज्ञां लभते तदिह परमार्थतोऽभेदात् स्यन्दशब्देनैवाधिमन्थानामपि परिग्रहः क्रियते अभिष्यन्दात्मकम् अभिष्यन्दाधिमन्थाभिनिर्वृत्तमित्यर्थः । किमिवासितप्रदेशे सितमाभाति आह विहायसीति । विहायसि आकाशे अभ्रं नामोपधातु विशेषः, तच्च श्वेतमेवेह प्रत्येतव्यम्, सितदृष्टान्तानुगतत्वेनोपात्तत्वात् । तस्य दलं पत्रं तदनुकारि शीलमस्येत्यभ्रदलानुकारि श्वेताभ्रमिवेति निष्कर्षः । एतेनैतदुक्तं भवति स्वभावादुपर्य्युपरिविन्यस्तत्वेन फलकभूतस्योपधातुविशेषस्याभ्रस्य पत्राकारस्तनुकोयोऽयंशस्तत्प्रतिकाशं मेघखण्डं यथा नीलत्वेन गोलत्वेन चाध्यस्ते आकाशे प्रतिभाति तथैवासितप्रदेशे कृष्णमण्डले यत्सितमाभाति तदेवाव्रणं शुक्रमुच्यत इति । गम्भीरेति । गम्भीरजातं चतुर्थपटाश्रितं तृतीयपटाश्रितमित्येतत् पिशिताहृतं मांसाहृतत्वेनावभातं, चलं विसर्पि दैनन्दिनं वर्द्धनशीलमिति यावत् । शिरासक्तं कृष्णमण्डलादधस्तात् कृष्णशिरावनद्धं तथात्वन्तु कृष्णसिरावलयस्यातिसङ्कुचितत्वेनैकान्ततः सङ्कोचविकाशरहितत्वेनच बोद्धव्यम् । द्वित्वग्गतं द्वितीय पटाश्रितम् । संछाद्यत इति । श्वेतनिभेन रजतप्रभेण "श्वेतं रूप्येऽपि" इत्यमरः

अजापुरीषप्रतिमो रुजावान् सलोहितो लोहितपिच्छिलास्रः ।
विदार्य्य कृष्णं प्रचयोऽभ्युपैति तच्चाजकाजातमिति व्यवस्येत् ॥३

इति सुश्रुतसंहितायामुत्तरतन्त्रे कृष्णगतरोगविज्ञानीयो नाम पञ्चमोऽध्यायः ॥ ५ ॥

पूयभावमापन्नेन दोषवितरेणेत्यर्थनिष्कर्षः । अक्षिकोपसमुत्थितम् अभिष्यन्दाधिमन्थमूलम् । अत्र संजायत इति संशब्दोपादानादसितगपक्षे सर्व्वेश: पूयाच्छन्नएव प्रागुक्तमसाध्यत्वमस्याध्यवसितव्यम् । अजेत्यादि सलोहित ईषल्लोहितावभासः, अस्रमश्रु चेति पर्य्यायौ । प्रचयशब्देनेह न्याय्यत्वात् कृष्णशिरावलय समूह एव प्रत्येतव्यः । अभ्युपैति वहिर्निगच्छति परिशिष्टं निगदव्याख्यातम् ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे कृष्णगतरोगविज्ञानीयोनाम पञ्चमोऽध्यायः ॥

---

## षष्ठोऽध्यायः ।

---

अथातः सर्व्वगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥१॥

---

सम्प्रत्युद्देशक्रमागतं सर्व्वगतरोगविज्ञानीयं नामाधिकरोति अथात इत्यादिना ॥ १ ॥

स्यन्दास्तु चत्वार इहोपदिष्टास्तावन्त एवेह तथाधिमन्थाः।
शोफान्वितोऽशोफयुतश्च पाकावित्येवमेते दश सम्प्रदिष्टाः॥
हताधिमन्थोऽनिलपर्य्ययश्च शुष्काक्षिपाकोऽन्यत एव वातः।
दृष्टिस्तथाम्लाध्युषिता शिराणामुत्पातहर्षावपि सर्व्वभागाः॥
प्रायेण सर्व्वे नयनामयास्ते भवन्त्यभिष्यन्दनिमित्तमूलाः।
तस्मादभिष्यन्दमुदीर्य्यमाणमुपाचरेदाशु हिताय धीमान्॥२॥
निस्तोदनं स्तम्भनरोमहर्ष-सङ्घर्षपारुष्यशिरोऽभितापाः।
विशुष्कभावाः शिशिराश्रुता च वाताभिपन्ने नयने भवन्ति॥
दाहप्रपाकौ शिशिराभिनन्दा धूमायनं वाष्पसमुच्छ्रयश्च।
उष्णाश्रुता पीतकनेत्रता च पित्ताभिपन्ने नयने भवन्ति॥
उष्णाभिनन्दा गुरुताक्षिशोफः कण्डूपदेहौ सितताऽतिशैत्यम्।
स्रावो मुहुः पिच्छिल एव चापि कफाभिपन्ने नयने भवन्ति॥

---

स्यन्दादीति। स्यन्दा अभिष्यन्दाः अत्र हि दशाद्या यथाऽनेकधा वैरूप्यमापादयितुमर्हन्ति न तथा शेषाः समेति द्वेधा विभज्योपदेशो नानुपपन्नः। सर्व्वभागाः सर्व्वाधिष्ठाना एव प्रायेणेत्यभिष्यन्दान् व्यावर्त्तयति तेऽपि मिथ्याहारविहारत एवाभिनिर्व्वर्त्तन्ते न पुनरभिष्यन्दतः। अभिष्यन्दस्य तन्त्राणि लिङ्गानि मूलं येषामित्यभिष्यन्दनिमित्तमूलाः, निमित्तं लिङ्गमित्यनर्थान्तरम्। एवञ्चातो निमित्तशब्दोऽसम्पूर्णलिङ्गस्याभिष्यन्दस्याधिमन्थादीन् प्रत्यमूलत्वमाख्यापयति। हितायाधिमन्थादीनामुत्पत्तिप्रतिघाताय कारणं विना कार्य्यानुत्पत्तेरित्याकूतम्। चतुरोऽभिष्यन्दान् लक्षणतः क्रमशो निर्द्दिशति। निस्तोदनमिति। निस्तोदनं सूचीविद्धवद्व्यथनम्, स्तम्भनं जड़ीभावः, रोमहर्षोऽत्र हृष्टपक्ष्मतेति-

ताम्राश्रुता लोहितनेत्रता च राज्यः समन्तादतिलोहिताश्च ।
पित्तस्य लिङ्गानि च यानि तानि रक्ताभिपन्ने नयने भवन्ति ॥३

वृद्धैरेतैरभिष्यन्दैर्नराणामक्रियावताम् ।
तावन्तस्त्वधिमन्थाः स्युर्नयने तीव्रवेदनाः ॥
उत्पाट्यत इवात्यर्थं नेत्रं निर्मथ्यते तथा ।
शिरसोऽर्द्धन्तु तं विद्यादधिमन्थं स्वलक्षणैः ॥
नेत्रमुत्पाट्यत इव मथ्यतेऽरणिवच्च यत् ।
सङ्घर्षतोदनिर्भेद-मांससंरब्धमाविलम् ॥
कुञ्चनास्फोटनाध्मान-वेपथुव्यथनैर्युतम् ।
शिरसोऽर्द्धञ्च येन स्यादधिमन्थः स मारुतात् ॥ ४ ॥

---

श्लेष्मं प्रत्यक्षपरिकलितत्वात् । सङ्घर्षोनाम दोषप्रपूरितत्वेन स्फीतासु सिरासु वर्त्मसञ्चालनाद् वन्धनानुशायी सिकतासम्पातवद्वेदनाविशेषः । पारुष्यं वर्त्मादीनां कर्कशता । दाहेत्यादि । प्रपाकोऽत्यर्थं दोषप्रकोपादक्ष्णोऽभ्यन्तरतः प्रकर्षेण पाकः । धूमायनं उष्माभिवृद्धया नेत्रतोधूमोद्गमनमिवानुभवः । वाष्पसमुच्चयोऽश्रुभिवृद्धिः "वाष्पमुष्माश्रु" इत्यमरः, उपदेहो दूषिकालिप्तता "राजीराजीरेखा" चेतिपर्य्यायाः ॥ २—३ ॥

वृद्धैरिति । अधिमन्थसमासलक्षणन्तावदभिधत्ते उत्पाट्यत इति । निर्मथ्यते मन्थानेनेवालोड्यते तुकारेण क्रियापदद्वयमाक्षिप्य शिरसोर्द्धमित्यनेनान्वीयते । स्वलक्षणैः यथास्वं वाताद्यभिष्यन्दालिङ्गैः । समासेनोक्तमर्थं प्रपञ्चेनोपदिदिक्षति नेत्रमिति । सङ्घर्षादिभिः कुपितं सङ्घर्षतोदनिर्भेदमांस-

रक्तराजिचितं स्रावि वह्निनेवावदह्यते ।
यकृत्पिण्डोपमं दाहि क्षारेणाक्तमिव क्षतम् ॥
प्रपक्वोच्छूनवर्त्मान्तं सस्वेदं पीतदर्शनम् ।
मूर्च्छाशिरोदाहयुतं पित्तेनाक्ष्यधिमन्थितम् ॥ ५ ॥
शोफवन्नातिसंरब्धं स्रावकण्डूसमन्वितम् ।
शैत्यगौरवपैच्छिल्यदूषिकाहर्षणान्वितम् ॥
रूपं पश्यति दुःखेन पांशुपूर्णमिवाविलम् ।
नासाध्मानशिरोदुःखयुतं श्लेष्माधिमन्थितम् ॥ ६ ॥
बन्धुजीवप्रतीकाशं ताम्यति स्पर्शनाक्षमम् ।
रक्तास्रावं सनिस्तोदं पश्यत्यग्निनिभा दिशः ॥
रक्तमग्नारिष्टवच्च कृष्णभागश्च लक्ष्यते ।
यद्दीप्तं रक्तपर्य्यन्तं तद्रक्तेनाधिमन्थितम् ॥ ७ ॥
हन्याद्दृष्टिं सप्तरात्रात् कफोत्थो-
ऽधीमन्थोऽसृक्सम्भवः पञ्चरात्रात् ।

---

संरब्धम्, निर्भेदः कुठारेण दारणवत् वेदनाविशेषः । मांससंरब्धता च शूनमांसत्वेन लक्षणीया । कुम्भेनेति आध्मानसाम्यादाध्मानं शिराधमनीनां विस्फारणम् स्रावि स्राववत् । अथचेद्वर्णतोनेत्रं यकृत्पिण्डोपमं स्यात् तर्हि क्षारेणाक्तं क्षतमिव दाहि दाहवद्भवतीत्यर्थः । पाकशोथाभिभूते वर्त्म वर्त्मप्रान्ते यस्य तत् प्रपक्वोच्छूनवर्त्मान्तं वर्णान्तमित्यनक्षरपरिपठितः पाठः । शोफवदिति । नातिसंरब्धं नात्यर्थरागवेदनम् । दूषिका नेत्रमलः हर्षणमत

षड्भावाद्या मारुतोत्थो निहन्या-

न्मिथ्याचारात् पैत्तिकः सद्य एव ॥ ८ ॥

कण्डूपदेहाश्रुयुतः पक्वोदुम्बरसन्निभः ।

दाहसंहर्षताम्रत्वशोफनिस्तोदगौरवैः ॥

जुष्टो मुहुः स्रवेदास्रमुष्णशीताम्बु पिच्छिलम् ।

संरम्भी पच्यते यश्च अक्षिपाकः स शोफजः ॥

शोफहीनानि लिङ्गानि नेत्रपाके त्वशोफजे ॥ ९ ॥

अन्तःशिराणां श्वसनः स्थितो दृष्टिं प्रतिक्षिपन् ।

हताधिमन्थं जनयेत् तमसाध्यं विदुर्बुधाः ॥ १० ॥

पक्ष्मद्वयाक्षिभुवमाश्रितस्तु यत्रानिलः सञ्चरति प्रदुष्टः ।

पर्य्यायशश्चापि रुजः करोति तं वातपर्य्यायमुदाहरन्ति ॥ ११ ॥

यत् कूणितं दारुणरूक्षवर्त्म विलोकने चाविलदर्शनं यत् ।

---

दृष्टिपक्वेतीति नेयम् । पांशुपूर्णं पांशुप्रपूरितम् धूलिसङ्कुलमिति तात्पर्य्यम् श्लेष्मानद्धत्वेन नासादिस्तम्भीनत्वं नासाध्मानम् । बन्धूजीवेति बन्धूजीवं बन्धूककुसुमम् "बान्धुली" इति प्रसिद्धस्य पुष्पमिति यावत् । ताम्यति खिद्यति । अरिष्टं नाम "रिठा" इति विज्ञायते तस्य बीज मत्राभिप्रेयत इति निश्चीयते वर्णतः कृष्णमण्डलसाम्यात् । दीप्तं दाहेनाभिभूतम् ॥४—८॥

कण्ड्वित्यादि उपदेहोऽत्र दूषिकैव । अन्तरित्यादि प्रतिक्षिपन् बहिर्निरस्यन् एतावता हताधिमन्थोनाम नेत्रबुद्बुदनिर्गमादनन्य इत्यायातम् । पक्ष्मेति । पर्य्यायशः क्रमशः "पर्य्यायोऽवसरे क्रमे" इत्यमरः । यदित्यादि ।

सुदारुणं यत् प्रतिबोधने च शुष्काक्षिपाकोपहतं तदक्षि ॥१२॥
मन्यावटूकर्णशिरोहनुस्थो मन्यागतो वाप्यनिलोऽन्यतो वा ।
कुर्य्याद्रुजोऽति भ्रुवि लोचने वा तमन्यतोवातमुदाहरन्ति ॥१३
अम्लेन भुक्तेन विदाहिना च सञ्छाद्यते सर्व्वत एव नेत्रम् ।
शोफान्वितं लोहितकैः सनीलैरेतादृगम्लाध्युषितं वदन्ति ॥१४॥
अवेदना वापि सवेदना वा यस्याक्षिराज्यो हि भवन्ति ताम्राः ।
मुहुर्विरज्यन्ति च ताः समन्ताद्व्याधिः शिरोत्पात इति प्रदिष्टः ॥१५
मोहाच्छिरोत्पात उपेक्षितस्तु जायेत रोगस्तु शिराप्रहर्षः ।
ताम्राच्छमस्रं स्रवति प्रगाढ़ं तथा न शक्नोत्यभिवीक्षितुञ्च ॥१६॥

---

कूणितं निमीलितं सत् दारुणं कठिनं वर्त्म यस्य तत् तथोक्तम् । प्रतिबोधने उन्मीलने यत् सुदारुणं क्लेशावहं कष्टोन्मीलनमित्येतत् पूयरहितेनाक्षिपाकलिङ्गेनोपहतं शुष्काक्षिपाकोपहतम् । एतेन पूयादिमाक्षिपाकलिङ्गान्यत्रोत्पद्यन्त इत्यध्यवसितव्यम् । यस्येत्यादि । अवट्विति दीर्घश्छान्दस संसिद्धो वा द्वैरूप्यात् । अवटुवटुः कृकाटिकाश्चेति पर्य्यायाः, तच्चोच शिरोग्रीवयोः सन्धानद्वितीयमित्यर्थनिष्कर्षः । मन्येनाम शा० ६ अ० व्याहृते मर्म्मविशेषे अन्यतोऽन्यत्र तत्र तत्रोपदिष्टासु नीलाशिरामातृकादिषु गतो वेत्यर्थः । अत्र शिरोग्रहणेनैवेतरेषामुपलम्भेऽपि पृथगुपादानं प्रपञ्चार्थम् व्याधेरस्यावट्वादिनानादेशावस्थितवातमूलत्वे सत्यपि भगन्दरवदेकदेशेन संज्ञा क्रियते अन्यतोवात इति । अम्लेनेति । विदाहिना च कोपितेन पित्तेनेत्यर्थाक्षिप्तं भवति दोषान् प्रत्याख्याय रोगोत्पत्तेरनभ्युपगमात् सनीलैरीषन्नीलैः

इति सुश्रुतसंहितायामुत्तरतन्त्रे सर्व्वगतरोगविज्ञानीयो नाम षष्ठोऽध्यायः ॥ ६ ॥

लोहितकैः शिराजालैरितिशेषः। अल्पेनातितरां दग्धमल्पाध्युषितम्। परिश्लिष्टमतिरोहितार्थम् ॥ ८—१६ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे सर्व्वगतरोगविज्ञानीयो नाम षष्ठोऽध्यायः ॥

---

# सप्तमोऽध्यायः।

अथातो दृष्टिगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥१॥

मसूरदलमात्रान्तु पञ्चभूतप्रसादजाम्।
खद्योतविस्फुलिङ्गाभां सिद्धां तेजोभिरव्ययैः ॥

---

सम्प्रति परिपाटीपरिप्राप्तं दृष्टिगतरोगविज्ञानीयं नामाधिकरोति अथात इत्यादिना ॥ १ ॥

प्रथमन्तावत् प्रकृतानुयायित्वात् "कृष्णात् सप्तममिच्छन्ति दृष्टिम्" इति सामान्येन प्राग्युक्तमर्थं स्फुटीकृत्य प्रपञ्चेनावगमयति मसूरेति। मसूरदल-मात्रां निस्तुषविश्लिष्टमसूरैकभागप्रमाणां दृष्टेस्तैजसत्वेन विवक्षितत्वेपि सर्व्वं द्रव्यं पाञ्चभौतिकमिति कारणात् पञ्चभूतप्रसादजामित्युक्तमित्युन्नेयम्, तैजसत्वमप्यास्यूपदिदिक्षति खद्योतेति खद्योतोज्योतिरिङ्गणः विस्फुलिङ्गो

आवृतां पटलेनाक्ष्णोर्बाह्येन विवराकृतिम्।
शीतसात्म्यां नृणां दृष्टिमाहुर्नयनचिन्तकाः॥
रोगांस्तदाश्रयान् घोरान् षट् च षट् च प्रचक्ष्महे।
पटलानुप्रविष्टस्य तिमिरस्य च लक्षणम्॥ २॥
शिराभिरभिसम्प्राप्य विगुणोऽभ्यन्तरे भृशम्।
प्रथमे पटले दोषो यस्य दृष्टौ व्यवस्थितः॥
अव्यक्तानि स रूपाणि सर्व्वाण्येव प्रपश्यति॥ ३॥
दृष्टिर्भृशं विह्वलति द्वितीयं पटलं गते।
मक्षिकान् मशकान् केशान् जालकानि च पश्यति॥

---

ऽग्निकण: तयोरिवाभा दीप्तिर्यस्यास्तां तथोक्ताम्। नहि तावत् खद्योतो विस्फुलिङ्गश्च निरन्तरभासुरावुपलभ्येते तदिदं पुनर्विशिनष्टि सिद्धामिति अव्ययैर्निर्व्विकारैः शश्वदेव दीप्तैस्तेजोभिः सिद्धाम् निष्पन्नाम्। अक्ष्णोर्बाह्येन पटलेन "उ० १ अ०" व्याकृतेनावृताम्। विवरस्याकृतिरिवाकृतिरस्या इति विवराकृतिम्। अन्तर्निर्हितजलकोष्ठवद् विवरात्मिकामिति यावत्। दृष्टिं दृष्टिमण्डलम्। पटलानुप्रविष्टस्य दृष्टिशक्तेरपचयं कुर्व्वत आद्यं पटलत्रितयं प्रविष्टस्य दोषस्येति तात्पर्य्यम्, तिमिरस्य वक्ष्यमाणस्य, लक्षणैः तदाश्रयान् दृष्ट्याश्रयान् षट्च षट्च द्वादश, घोरानतीव क्लेशावहान् रोगान् प्रचक्ष्महे इति योजना। अत्र "तिमिराख्यः स वै दोषश्चतुर्थं पटलं गतः" इत्यनन्तरोक्तत्वात् पटलानुप्रविष्टस्येति सिद्धे तिमिरस्येति पृथगुपादानं प्रपञ्चार्थं तिमिरस्यातितरां प्राधान्यख्यापनार्थञ्चेति ज्ञेयम्। आमूलमुररीकृतमर्थं प्रवर्त्तयति शिराभिरिति। प्रथमे पटले दृष्टिमण्डलस्यावरणत्वेन प्रतिष्ठिते बाह्ये पटले इत्यर्थः। प्रपश्यति दृष्टिमण्डलस्यादुष्टत्वेन स्वरूपेणावस्थानादित्या

मण्डलानि पताकाश्च मरीचीः कुण्डलानि च ।
परिप्लवांश्च विविधान् वर्षमभ्रं तमांसि वा ॥
दूरस्थान्यपि रूपाणि मन्यते च समीपतः ।
समीपस्थानि दूरे च दृष्टेर्गोचरविभ्रमात् ॥
यत्नवानपि चात्यर्थं सूचीपाशं न पश्यति ॥ ४ ॥
ऊर्द्ध्वं पश्यति नाधस्तात् तृतीयं पटलं गते ।
महान्त्यपि च रूपाणि च्छादितानीव वाससा ॥
कर्णनासाक्षियुक्तानि विपरीतानि वीक्षते ।
यथादोषञ्च रज्येत दृष्टिर्दोषे बलीयसि ॥
अधःस्थिते समीपस्थं दूरस्थञ्चोपरिस्थिते ।
पार्श्वस्थिते तथा दोषे पार्श्वस्थानि न पश्यति ॥
समन्ततः स्थिते दोषे सङ्कुलानि च पश्यति ।
दृष्टिमध्यगते दोषे स एकं मन्यते द्विधा ।
द्विधास्थिते त्रिधा पश्येद्बहुधा चानवस्थिते ॥ ५ ॥

---

कृतम् । द्वितीयं पटलं "उ० १ अ०" यथावद्व्याख्यातम् मांससंश्रितं पटलम् ॥ २—३ ॥

विह्वलति विचलति विपरीतं पश्यतीत्यर्थनिष्कर्षः । विह्वलताप्रकारं दर्शयति मक्षिकानिति, माक्षिकादयोऽत्रासन्त एव प्रत्येतव्याः मरीचीम् चन्द्रादिकिरणान् परिप्लवांश्चलाम् नक्षत्रादीन् गोचरविभ्रमादृविषयविभ्रमात् । ऊर्द्ध्वमित्यादि । तृतीयं पटलं प्राङ्निवेदितं मेद आश्रितं पटलम् । विपरीतानि कर्णादिहीनानि । यथादोषं रज्येत रागेण संयुज्येत यथा

तिमिराख्यः स वै दोषश्चतुर्थपटलं गतः ।
रुणद्धि सर्व्वतो दृष्टिं लिङ्गनाशः स उच्यते ।
तस्मिन्नपि तमोभूते नातिरूढ़े महागदे ।
चन्द्रादित्यौ सनक्षत्रावन्तरीक्षे च विद्युतः ॥
निर्म्मलानि च तेजांसि भ्राजिष्णूनि च पश्यति ।
स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः ॥ ६ ॥
तत्र वातेन रूपाणि भ्रमन्तीव स पश्यति ।
आविलान्यरुणाभानि व्याविद्धानि च मानवः ॥
पित्तेनादित्यखद्योतशक्रचापतड़िद्गुणान् ।
शिखिवर्हविचित्राणि नीलकृष्णानि पश्यति ॥ ७ ॥
कफेन पश्येद्रूपाणि स्निग्धानि च सितानि च ।

---

दोषवर्णी भवति दोपशके रचिन्त्यत्वादिति हृदयम् । समन्ततः स्थितेविचित्राकारेण सर्व्वत्रावस्थिते स्तङ्गानि परस्परोपहतानि अनवस्थिते वहुधावस्थितत्वेन संख्यामतिक्रान्ते । पटलानुप्रविष्टस्य दोषस्य लिङ्गानि तावद्व्याहृतानीत्यनुक्रमागतं तिमिरं व्याहर्त्तुमुपक्रमते तिमिराख्य इति, तस्यैव लिङ्गनाशं पुनरवस्थाविशेषे विशिनष्टि तस्मिन्निति । तमोभूते तमःस्वरूपे । अन्तरीक्षे वर्त्तमानौ सनक्षत्रौ चन्द्रादित्यावित्यर्थः । अत्रान्तरीक्षे इति विशेषणं द्वितीय पटलगतदोषवदसतां नक्षत्रादीनां दर्शनप्रतीतिशङ्कानिरासार्थम् । निर्म्मलानिच तेजांसि दीपशिखादीनि । भ्राजिष्णूनि दीप्तिमन्ति मरकतादीनीति यावत् । अस्यैव पर्य्यायौ नीलिकाकाचश्चेति व्याहर्त्तुमिदमुच्यते स एवेति ॥ ४—६ ॥

तमेव पुनर्लिङ्गनाशं दोषविशेषेण षोढ़ा विभज्य लक्षणतो निवेदयति तत्रेति

गौरचामरगौराणि श्वेताभ्रप्रतिमानि च ।
पश्येदसूक्ष्माण्यर्थं व्यभ्रे चैवाभ्रसंप्लवम् ॥
सलिलप्लावितानीव परिजाड्यानि मानवः ॥ ८ ॥
तथा रक्तेन रक्तानि तमांसि विविधानि च ।
हरितश्यावकृष्णानि धूमधूम्राणि चेक्षते ॥ ९ ॥
सन्निपातेन चित्राणि विप्लुतानीव पश्यति ।
बहुधा वा द्विधा वापि सर्व्वाण्येव समन्ततः ।
हीनाधिकाङ्गान्यथवा ज्योतींष्यपि च पश्यति ॥ १० ॥
पित्तं कुर्य्यात् परिम्लायि मूर्च्छितं रक्ततेजसा ।
पीता दिशस्तथोद्यन्तमादित्यमिव पश्यति ।
विकीर्य्यमाणान् खद्योतैर्वृक्षांस्तेजोभिरेव च ॥ ११ ॥

---

तत्र लिङ्गनाशे वातेन जाते व्याविद्धानि कुटिलानि । पित्तेनेति । आदित्य-शब्देनेह तत्किरण एवाभिप्रेयते शक्रचापमिन्द्रधनुः तड़िद्गुणोविद्युल्लता पश्यत एवैतान्, सन्त्यपि च रूपाणि शिखित्वादिना वक्ष्यमाणप्रकारेण विपर्य्यस्त-वर्णानि पश्यति दृष्टेर्गोचराविभ्रमादित्यभिसन्धिः । शिखिवर्हविचित्राणि शिखिवर्हवत्कर्वूराणि । कफेनेति । अभ्रसंप्लवं मेघानां सञ्चारं परिजाड्यानि परितस्तिमितानि । सन्निपातेनेत्यादि । विप्लुतानि परस्परं व्याविद्धानि "अविप्लुतं ब्रह्मचर्य्यम् इति स्मृतिः । पित्तमिति रक्ततेजसा रक्तप्रभावेण मूर्च्छितं प्रवृद्धं पित्तं परिम्लायि परिम्लायिसमाख्यं तिमिरं कुर्य्यात् कृतेच तस्मिन् उद्यन्तमादित्यमिव पीता रक्तानुविद्धपीतवर्णा दिशस्तथा खद्योतै स्तेजोभिश्च विकीर्य्यमाणानाच्छादितानिव वृक्षान् पश्यतीत्यर्थः ॥ ७ — ११ ॥

वक्ष्यामि षड्विधे रागैर्लिङ्गनाशमतः परम्॥ १२॥

रागोऽरुणो मारुतजः प्रदिष्टः पित्तात् परिम्लाय्यथवापि नीलः।
कफात् सितः शोणितजस्तु रक्तः समस्तदोषेऽथ विचित्ररूपः॥१३

रक्तजं मण्डलं दृष्टौ स्थूलकाचारुणप्रभम्।
अरुणं मण्डलं वाताच्चञ्चलं परुषं तथा।
पित्तान्मण्डलमानीलं कांस्याभं पीतमेव वा॥ १४॥
श्लेष्मणा बहलं स्निग्धं शङ्खकुन्देन्दुपाण्डुरम्॥
चलत्पद्मपलाशस्थः शुक्लबिन्दुरिवाम्भसः।
मृद्यमाने च नयने मण्डलं तद्विसर्पति॥ १५॥

---

दृश्यतेऽहि लिङ्गनाशे प्रादुर्भूते तत्तद्दोषप्रभावात् दृष्टिमण्डल मरुणादिभिस्तैस्तैर्वर्णविशेषै रज्यते तच्च लिङ्गनाशस्यैव लक्षणान्तरं नत्वन्यदित्यावेदयितुं प्रतिजानीते वक्ष्यामीति। रागो दृष्टिमण्डलवर्णः। पित्तात्लिङ्गनाशजनकाद्दृष्टि रागः परिम्लायी रक्तपित्तजलिङ्गनाश सम्बन्धी दृष्टिरागश्च नीलः, अथवेति यद्युवेति वत् निपातसमुदायः समुच्चयार्थः अपि शब्दश्च निश्चयार्थः। नहि तावत् प्रकृतिज्ञानमन्तरेण विकृतिज्ञानं सम्भवतीति पूर्व्वं खद्योतविस्फुलिङ्गाभमित्यादिना यद्दृष्टिमण्डलस्वरूपमुपदिष्टं तदेव पुनर्व्यवसाया व्यवसायाभिहृदये प्रपञ्चेनावगमयन्नाह रक्तजमिति। रक्तजं "सर्व्वं द्रव्यं पाञ्चभौतिकम्" इति स्मरणात् प्राधान्याद्रक्तप्रसादजं स्थूलकाचारुणप्रभं प्रान्तावनतगोल स्थूलारुणवर्णकाचसदृशं स्वाभाविकं मण्डलं गोलः दृष्टौ दृष्टिविवरे प्रथम पटलेनाच्छादितं सदवतिष्ठत इति शेषः। तदेव मण्डलं लिङ्गनाशाभिनिर्वर्त्तकाद् वातादितो दुष्टिमापद्येत तर्हि यादृग्वर्णं भवति क्रमशस्तदुपदिदिक्षति

दृष्टिरागो भवेच्चित्रो लिङ्गनाशे त्रिदोषजे ॥ १६ ॥
प्रवालपद्मपत्राभं मण्डलं शोणितात्मकम्।
परिम्लायिनि रोगे स्यान्म्लाय्यानीलञ्च मण्डलम् ॥
दोषक्षयात् कदाचित् स्यात् स्वयं तत्र च दर्शनम्।
यथास्वंदोषलिङ्गानि सर्व्वेष्वेव भवन्ति हि ॥ १७ ॥

---

अरुणमित्यादिना ग्रन्थसन्दर्भेण। मण्डलं दृष्टिमण्डलं परुषं कठोरं पित्ता-दिति। कांस्याभं पीतमेवेति कादाचित्कविषयमिति गम्यते उपक्रमे पित्तात्-परिम्लाय्यथवापि नील इति नीलमात्रस्यैवोपदेशात्। मृद्यमान इति। विस-र्पति कृष्णशिरावलय सङ्कोचेन प्रसारिततया विसर्पतीव प्रतिभाति चकारा-दातपसंसर्गेऽपीति नैयम् "उष्णे सङ्कोच मायाति छायायां परिसर्पति" इति तन्त्रान्तरीय स्मरणात् प्रत्यक्षपरिकल्पितत्वाच्च। परिसर्पणञ्चैतदधिमन्थादितः कृष्णशिरावलयानवबद्धमण्डलविषयम् अवबद्धं हि मण्डलं स्थिरीभवति। रक्तात्मके रागे मण्डलस्य प्रवालपद्मपत्राभत्वमत्यर्थरक्तदृष्टिविषयमित्यध्यवसेयम् प्राक्पित्तान्मण्डलमानील मित्युक्तेः। परीति परिम्लायिनि रक्तपित्तजे लिङ्ग-नाशे म्लायि चयि कदाचित् स्वलिङ्गतोविनाकृतं भवतीति यावत्। अतः साम्प्रतमुक्तं दोषक्षयादिति। एतावता परिम्लायिनि पित्तजेच लिङ्गनाशे प्रायेण दृष्टिमण्डलगतस्य नीलसमाख्यरागस्य म्लायित्वाम्लायित्वाभ्यां भेदः कल्प्यत इत्यायातम्। यथास्वेति यथास्वदोषलिङ्गानि शिरःशूलोष्णगौरवा-दीनि। नन्वेते रागास्वेल्लिङ्गनाशस्यावान्तराणि लिङ्गानि स्युः कथन्तर्हि तैर्षिके लिङ्गनाशे मूलं लिङ्गनाशं प्रति किमपि प्रतीकारक्रममनुपदिश्य केवलं स्वभा-गुणेन रागेणानुगतं दृष्टिमण्डल माहृत्यापसार्य्य वाऽऽतुरानन्धतामिस्राद-लोकालोकमानेतुमुपदिशन्त्याचार्य्याः शस्त्रोपयोगेनेति वाच्यम्, लिङ्गनाशस्य तथाविधरागमात्र जनकत्वेनाभ्युपगमात् ॥ १२—१७ ॥

षड्लिङ्गनाशाः षड़िमे च रागा दृष्ट्याश्रयाः षट् च षड़ेव च स्युः ।
तथा नरः पित्तविदग्धदृष्टिः कफेन चान्यस्त्वथ धूमदर्शी ।
यो ह्रस्वजात्यो नकुलान्धता च गम्भीरसंज्ञा च तथैव दृष्टिः ॥१८
पित्तेन दुष्टेन गतेन दृष्टिं पीता भवेद् यस्य नरस्य दृष्टिः ।
पीतानि रूपाणि च मन्यते यः स मानवः पित्तविदग्धदृष्टिः ।
प्राप्ते तृतीयं पटलन्तु दोषे दिवा न पश्येन्निशि वीक्षते च ॥१९
तथा नरः श्लेष्मविदग्धदृष्टिस्तान्येव शुक्लानि हि मन्यते तु ॥
त्रिषु स्थितोऽल्पः पटलेषु दोषो नक्तान्ध्यमापादयति प्रसह्य ।
दिवा स सूर्य्यानुगृहीतदृष्टिर्वीक्षेत रूपाणि कफाल्पभावात् ॥२०
शोकज्वरायासशिरोऽभितापैरभ्याहता यस्य नरस्य दृष्टिः ।
स धूमकान् पश्यति सर्व्वभावांस्तं धूमदर्शीति वदन्ति रोगम् ॥२१
स ह्रस्वजात्यो दिवसेषु कृच्छ्राद् ह्रस्वानि रूपाणि च यो न पश्येत्
रात्रौ स शीतानुगृहीतदृष्टिः पित्ताल्पभावादपि तानिपश्येत् ॥२२
विद्योतते येन नरस्य दृष्टिर्दोषाभिपन्ना नकुलस्य यद्वत् ।
दृष्टिर्विरूपा श्वसनोपसृष्टा सङ्कुच्यतेऽभ्यन्तरतश्च याति ।

---

येतु पुनर्भिषजोरागानेतान् सहसा लिङ्गनाशानां लिङ्गविशेषत्वेनानव-बुध्य संख्यातिपाताद्विभ्यति तानाश्वासयन्निहैवोपसंहरति षड़िति । षट् चेति चशब्दोहेतौ तदयमर्थः-यस्मात् षड्लिङ्गनाशा व्यस्तसमस्तदोष-रक्त रक्त-पित्तज भेदात् । तेषामेव लिङ्गभूताः षड़िमे दृष्ट्याश्रयारागास्तथा पित्त-विदग्धदृष्ट्यादयश्च षट् अतः षट् षट् च द्वादशैव स्युरित्यर्थः । कफेन चान्यः कफविदग्धदृष्टिरिति निष्कर्षः । पित्तविदग्धदृष्ट्यादीन् लक्षयतोविवृणोति

चित्राणि रूपाणि दिवा स पश्येत्स वै विकारो नकुलान्ध्यसंज्ञः। २३

दृष्टिर्विरूपा श्वसनोपसृष्टा सङ्कुच्यतेऽभ्यन्तरतश्च याति।
रुजावगाढ़ा च तमक्षिरोगं गम्भीरिकेति प्रवदन्ति तज्ज्ञाः॥२४

बाह्यौ पुनर्द्वाविह सम्प्रदिष्टौ निमित्ततश्चाप्यनिमित्ततश्च।
निमित्ततस्तत्र शिरोऽभितापाज्ज्ञेयस्त्वभिष्यन्दनिदर्शनश्च॥
सुरर्षिगन्धर्व्वमहोरगाणां सन्दर्शनेनापि च भासुराणाम्।
हन्येत दृष्टिर्मनुजस्य यस्य स लिङ्गनाशस्त्वनिमित्तसंज्ञः॥
तत्राक्षि विस्पष्टमिवावभाति वैदूर्य्यवर्णा विमला च दृष्टिः।
विदीर्य्यते सीदति हीयते वा नृणामभीघातहता तु दृष्टिः॥२५

इत्येते नयनगता महाविकाराः
संख्याताः पृथगिह षट् च सप्ततिश्च॥
एतेषां पृथगिह विस्तरेण सर्व्वं
वक्ष्येऽहं तदनु चिकित्सितञ्च तावत्॥ २६॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे दृष्टिगतरोगविज्ञानीयो
नाम सप्तमोऽध्यायः॥ ७॥

---

पित्तेनेति। दृष्टिरिति। सङ्कुच्यतेऽधिमन्थनः स्फीतेन प्रसारितेन च कृष्ण-शिरावलयेन प्रथमपटलसंश्लेषादित्याकूतम्। अनिमित्ततः अशारीरनिमि-त्ततः प्रसङ्गादिष्टकाद्यभिघातोपहतदृष्टिलक्षणमाह विदीर्य्यत इति। प्रस्तुत-मर्थं समापयति इत्येत इति। सर्व्वं चिकित्सितप्रविभागमित्यध्यवसितव्यम्। परमत स्तथैवोपदेशात् तदनु तदनन्तरम्। परिशिष्टं निगदव्याख्यातम्।

इति श्रीडल्हणाचार्य्यचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
उत्तरतन्त्रे दृष्टिगतरोगविज्ञानीयोनाम सप्तमोऽध्यायः॥

# अष्टमोऽध्यायः ।

अथातश्चिकित्सितप्रविभागविज्ञानीयमध्यायं व्याख्यास्यामः ॥१॥

षट्सप्ततिर्येऽभिहिता व्याधयो नामलक्षणैः ।
चिकित्सितमिदं तेषां समासाद्व्यासतः शृणु ॥
छेद्यास्तेषु दशैकश्च नव लेख्याः प्रकीर्त्तिताः ।
भेद्याः पञ्च विकाराः स्युर्व्यध्याः पञ्चदशैव तु ॥
द्वादशाऽशस्त्रकृत्याश्च याप्याः सप्त भवन्ति हि ।
रोगा वर्ज्जयितव्याश्च दश पञ्च च जानता ।
असाध्यौ वा भवेतान्तु याप्यौ वागन्तुसंज्ञितौ ॥ २ ॥

---

व्याहृतानि खलु नेत्ररोगनिदानानि इदानीन्तु पारिशेष्याच्चिकित्सिता-न्येवैषां व्याहर्त्तव्यानीति मन्वानो भगवान् व्याससमासाभ्यामुपदिष्टं हि शास्त्रं सद्यः प्रत्ययकरं भवतीति सम्प्रधार्य्य 'एतेषां पृथगिहविस्तरेणासर्व्वम्" इत्या-दिना यथैतान् व्याहर्त्तुं समयाञ्चभूव तथैव व्याहरन् प्रथमन्तावत् चिकित्सित-प्रविभागविज्ञानीयं नामाधिकरोति अथात इत्यादिना । चिकित्सितार्थं-ञ्छेद्यत्वादिना साध्यासाध्यत्वादिनाच विभागश्चिकित्सितप्रविभागः । प्रकृत-मनुसरति षड़िति । अभिहिताः शारीरागन्तुकसमन्वयेनेतिशेषः । छेद्याइति-दशैकश्शारीरा इत्युन्नेयम्, परमतो "याप्यौवागन्तुसंज्ञितौ" इतुरुक्तेः । एतेन दशपञ्चेत्यत्रं व्याख्यातम् । एकैकशञ्छेद्यत्वादिभिःसप्तभिर्धर्म्म-विशेषैश्चतुःसप्ततिं शारीरान् व्याधीन् संख्यामात्रेण विभज्य परिशिष्टौ द्वाभ्या-

अर्शोऽन्वितं भवति वर्त्म तु यत् तथार्शः
शुष्कं तथार्व्वुदमथो पिड़काः शिराजाः ।
जालं शिराजमपि पञ्चविधं तथार्म्म
छेद्या भवन्ति सह पर्व्वणिकामयेन ॥ ३ ॥
उत्सङ्गिनी बहलकर्द्दमवर्त्मनी च
श्यावञ्च यच्च पठितन्त्विह बद्धवर्त्म ।
क्लिष्टञ्च पोथकियुतं खलु यच्च वर्त्म
कुम्भीकिनी च सह शर्करया च लेख्याः ॥ ४ ॥
श्लेष्मोपनाहलगणौ च विसञ्च भेद्याः
ग्रन्थिश्च यः क्रिमिकृतोऽञ्जननामिका च ॥ ५ ॥
आद्यौ शिरा निगदितास्च ययोः प्रयोगे
पाकौ च यौ नयनयोः पवनोऽन्यतश्च ।
पूयालसानिलविपर्य्ययमन्यसंज्ञाः
स्यन्दास्तु यान्युपशमं हि शिराव्यधेन ॥ ६ ॥

---

गन्तुकौ तु असाध्ययाप्याशस्त्रकृत्यत्वेन निर्द्दिदिक्षति असाध्याविति । आगन्तु संज्ञितौ द्वावसाध्यावनुपक्रमणीयौ याप्यौ वा नातिप्ररूढ़दोषौतु ताविति शेषः । पुनर्वाशब्दादशस्त्रकृत्यौचेति नेयम् आगन्तुनामय युगेनच दूषितायाम् । दृष्टौ न शस्त्रेत्यादिवक्ष्यमाणानुशासनमभिवीक्ष्य ॥ २ ॥

उद्दिष्टमपरिस्फुट मर्थजातं कथञ्चित्स्फुटीकृत्यावगमयति अर्श इति । अव्याभाह आदाविति अत्र आदावित्यादिनार्द्धश्लोकेन शिराहर्षशिरोत्पातौ, पाकौ चेत्यादिनाच सशोफपाकोऽशोफपाकश्चाद्यौ । अन्यसंज्ञा अधिमन्याः

शुष्काक्षिपाककफपित्तविदग्धदृष्टि-
ष्वम्लाख्यशुक्रसहितार्ज्जुनपिष्टकेषु ।
अक्लिन्नवर्त्म हुतभुग्ध्वजदर्शिशुक्ति-
प्रक्लिन्नवर्त्मसु तथैव बलाससंज्ञे ।
आगन्तुनामययुगेन च दूषितायां
दृष्टौ न शस्त्रपतनं प्रवदन्ति तज्ज्ञाः ॥ ७ ॥
सम्पश्यतः षडपि येऽभिहितास्तु काचा-
स्ते पक्ष्मकोपसहितास्तु भवन्ति याप्याः ॥ ८ ॥
चत्वार एव पवनप्रभवास्त्वसाध्या
द्वौ पित्तजौ कफनिमित्तज एक एव ।

---

स्यन्दा अभिष्यन्दाः । अशस्त्रकृत्यानाह शुष्केति अम्लाख्योऽम्लाध्युषितः शुक्र-मत्राव्रणमेव बोध्यम्, सव्रणस्यासाध्यत्वेन व्याचिख्यासितत्वात् । आगन्तु-नामययुगेन वाह्यजद्वितयेन दूषितायां दोषेणानुविद्धायां मनागुपहतायामिति यावत् । शस्त्रपतनं शस्त्रपातनं । याप्यानाह सम्पश्यत इति अपिरयं समुच्चयार्थः । येतुपुनः षट् वातपित्त-कफरक्त-सन्निपातज-परिम्लायि-संज्ञाः काचा लिङ्गनाशविशेषा अभिहिता "उ० ७ अ०" "तस्मि-न्नपि तमोभूते" इत्यादिना चन्द्रादिदर्शनशक्तिमवलम्ब्येति शेषः । सम्प-श्यतः सम्यक् चन्द्रादीन् निरीक्षमाणस्य ते पक्ष्मकोपसहिता याप्या इत्यन्वयः । एतेनार्थाक्षिप्तं भवति असम्यक् चन्द्रादीन् पश्यतस्तु ते असाध्या इति । एवञ्च दृष्टेः समूलघातमुपहन्तारं लिङ्गनाशन्त्वसाध्यत्वेन वाला अप्यध्यवस्यन्तीति भगवांस्तं प्रति न किञ्चन प्रोवाचेति बुद्धिविषयमारोहय । असाध्यानाह चत्वार इति । चत्वारः पवनप्रभवा हताधिमन्थनिमिषगम्भीरिकावातहतवर्त्म-

अष्टाक्षिका रुधिरजाश्च गदास्त्रिदोषा-
स्तावन्त एव गदितावपि बाह्यजौ द्वौ ॥ ९ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे चिकित्सितप्रविभाग-
विज्ञानीयो नामाष्टमोऽध्यायः ॥ ८ ॥

---

अंशकाः, द्वौ पित्तजौ ह्रस्वजात्यजलस्रावौ कफनिमित्तश्च एकः कफजस्रावः अष्टाक्षिकारुधिरजा रक्तस्रावोऽजकाजातं शोणितार्शः सव्रणशुक्रञ्चेत्येते चत्वारः त्रिदोषजास्तावन्तः पूयास्रावो नाकुलान्ध्यमक्षिपाकात्ययोलजी चेति चत्वारः। एवं पञ्चदशासाध्या इति योजना। अत्राविशेषेऽपि गम्भीरिका सव्रणशुक्राक्षि-पाकात्ययालजी नामतिस्रस्त्व एवासाध्यत्वं प्रत्येतव्यम्। माभूत् "असाध्यौ वा भवेतामुभयाप्यौ वागन्तुसंश्रितौ" इति प्रागुक्तेनागन्तुशब्देन दण्डाद्यभि-घातजस्याग्नेयसम्पर्कादिजनितस्य च प्रतीतिरित्यतो विशिनष्टि गदि-ताविति गदितौ आगन्तुशब्देन कथितौ बाह्यजौ "सनिमित्तोऽनिमित्तश्च द्वावसाध्यौ तु बाह्यजौ" इत्याद्यतिक्रान्तावेषणान्निमित्तानिमित्तजसमाख्यौ द्वावप्यसाध्यावनुपक्रमणीयौ याप्यौ चेत्येवं वचनव्यत्यासेन व्याख्येयम् प्रागु-क्तानुगमात् ॥ १—९ ॥

इति श्रीडारणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
उत्तरतन्त्रे चिकित्सितप्रविभागविज्ञानीयो नामाष्टमोऽध्यायः ॥

# नवमोऽध्यायः ।

अथातो वाताभिष्यन्दप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

पुराणसर्पिषा स्निग्धौ स्यन्दाधिमन्थपीड़ितौ ।
स्वेदयित्वा यथान्यायं शिरामोक्षेण योजयेत् ॥
सम्पादयेद्वस्तिभिश्च सम्यक्स्नेहविरेचितौ ।
तर्पणैः पुटपाकैश्च धूमैराश्चोतनैस्तथा ॥
नस्यस्नेहपरीषेकैः शिरोवस्तिभिरेव च ।
वातघ्नानूपजलज-मांसाम्लक्काथसेचनैः ॥
स्नेहैश्चतुर्भिः कोष्णैश्च तत्पीताम्बरधारणैः ।
पयोभिर्वेशवारैश्च साल्वणैः पायसैस्तथा ॥
भिषक् सम्पादयेदेतावुपनाहैश्च पूजितैः ।
तथाचोपरि भक्तस्य सर्पिःपानं प्रशस्यते ॥

---

दृश्यन्ते हि नयनामयेषु मध्येऽभिष्यन्दाधिमन्थास्तन्मूलाश्चामयाः प्रायेण प्रादुर्भवन्त्यविसङ्ख्येन दुःखेनातुरमलं क्लेशयितुम् । तदिदानीमुद्देशक्रमं हित्वा तेषामेव प्रतीकारक्रमं प्रपञ्चेनोपदिशन् दोषक्रमापेक्षया प्रथमन्तावद् वाताभिष्यन्द प्रतिषेधं नामाधिकरोति अथात इत्यादिना । शास्त्रेऽस्मिन्नभिष्यन्दानां ग्रहणेनैवाधिमन्थानामपि परिग्रहः क्रियत इत्यवोचाम । तथाचाभिष्यन्दाधिमन्थप्रधानः प्रतिषेधोऽभिष्यन्दप्रतिषेधः । षष्ठीसमासेऽत्वन्यतो वातादीना-

त्रिफलाक्वाथसंसिद्धं केवलं जीर्णमेव वा ।
सिद्धं वातहरैः क्षीरं प्रथमेन गणेन वा ॥ २ ॥
स्नेहास्तैलादिना सिद्धा वातघ्नैस्तर्पणे हिताः ।
स्नैहिकः पुटपाकश्च धूमो नस्यञ्च तद्विधम् ॥
नस्यादिषु स्थिराक्षीरमधुरैस्तैलमिष्यते ॥
एरण्डपल्लवे मूले त्वचि वाजं पयः शृतम् ।
कण्टकार्य्याश्च मूलेषु सुखोष्णं सेचने हितम् ॥
सैन्धवोदीच्यषष्ट्याह्व-पिप्पलीभिः शृतं पयः ।
हितमर्द्धोदकं सेके तथाश्च्योतनमेव च ॥

---

सिद्धचिकित्सितोपदेशः प्रासङ्गिकः । पुराणेत्यादि शिराव्यधविधिमनतिक्रम्येति यथान्यायम् । तर्पणैरिति आश्चोतनं पूरणम् तर्पणादयस्त्ववक्ष्यमाणं क्रियाकल्पं प्रागुक्तं धूमनस्यकवलग्रहचिकित्सितं वातव्याधिचिकित्सितञ्चाभिवीक्ष्य यावदारोग्यदर्शनाद्विधिवदुपयोगमर्हन्तीत्याविदयितुं बहुवचनमुपात्तमित्यवधेयम् । तत्पीताम्बरधारणैर्वातेत्यादिनोक्त सेचनद्रव्यधौतशुष्कक्षौमसिक्तकवलिकाकारवस्त्रखण्डं चक्षुषो उपरि निधाय वस्त्रपट्टेन बन्धनैरित्यर्थः शेषैश्च विमृश्य यथायोगं सेचनैः स्वेदनैः लेपनैश्चैतावभिष्यन्दाधिमन्थपीडितौ सम्पादयेदित्युपदेशः । सिद्धमिति । वातहरैः सू० ३८अ० उक्तैः भद्रदार्व्वादिभिर्वातसंशमनैर्द्रव्यैः प्रथमेन गणेन सू० ३८ अ० उक्तेन विदारिगन्धादिनेत्यर्थः ॥ २ ॥

स्नेहा इति । स्नैहिकः पुटपाकः क्रियाकल्पे निवेदयिष्यते स्नैहिको धूमो नस्यञ्च चि० ४०अ० अभिसमीक्ष्य प्रयोज्ये । सम्प्रति नस्यस्नेहेत्यादिना प्रागुक्तमर्थं स्फुटीकृत्यावगमयति नस्यादिष्विति । स्थिरा शालपर्णी मधुरः सू०

ह्रीवेरवक्रमञ्जिष्ठोडुम्बरत्वक्षु साधितम्।
साम्भक्षाजं पयो वापि शूलाश्च्योतनमुत्तमम्॥
मधुकं रजनीं पथ्यां देवदारु च पेषयेत्।
आजेन पयसा श्रेष्ठमभिष्यन्दे तदञ्जनम्॥
गैरिकं सैन्धवं कृष्णां नागरञ्च यथोत्तरम्।
द्विगुणं पिष्टमद्भिस्तु गुटिकाञ्जनमिष्यते॥
स्नेहाञ्जनं हितञ्चात्र वक्ष्यते तद्यथाविधि।
रोगो यश्चान्यतोवातो यश्च मारुतपर्य्ययः॥
अनेनैव विधानेन भिषक् तावपि साधयेत्।
पूर्व्वभक्तं हितं सर्पिः क्षीरं वाप्यथ भोजने॥
वृषादन्यां कपित्थे च पञ्चमूले महत्यपि।
सक्षीरं कर्कटरसे सिद्धञ्चात्र घृतं पिबेत्॥
सिद्धं वा हितमत्राहुः पत्तूरार्त्तगलाग्निकैः।
सक्षीरं मेषशृङ्ग्या वा सर्पिर्वीरतरेण वा॥ ३॥
सैन्धवं दारु शुण्ठी च मातुलुङ्गरसे घृतम्।

---

४२ अ० उपादिष्टो मधुरोवर्गः। उदीच्यो ह्रीवेरः वक्रं तगरपुष्पं स्नेहाञ्जनमिति। वक्ष्यते क्रियाकल्प इति शेषः। भक्तस्य पूर्व्वं पूर्व्वभक्तं भोजनात् प्रागिति यावत्। कर्कटः कुलिरोनाम जलजन्तुभेदः "कांकड़ा" इति विज्ञायते पत्तुरः शालिञ्चशाकः आर्त्तगलो नीलझिण्टी, वीरतरं वीरण मूलम्॥ ३॥

स्तन्योदकाभ्यां कर्त्तव्यं शुष्कपाके तदञ्जनम् ॥
पूजितं सर्पिषश्चात्र पानमक्ष्णोश्च तर्पणम् ।
घृतेन जीवनीयेन नस्यं तैलेन चाणुना ॥
परिषेके हितञ्चात्र पयः शीतं ससैन्धवम् ।
रजनीदारुसिद्धं वा सैन्धवेन समायुतम् ॥
सर्पिर्युतं स्तन्यघृष्टमञ्जनञ्च महौषधम् ॥
वसा वानूपजलजा सैन्धवेन समायुता ।
नागरोन्मिश्रिता किञ्चिच्छुष्कपाके तदञ्जनम् ॥ ४ ॥
पवनप्रभवा रोगा ये केचिद्दृष्टिनाशनाः ।
बीजेनानेन मेधावी तेषु कर्म्म प्रयोजयेत् ॥ ५ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे वाताभिष्यन्दप्रतिषेधो नाम नवमोऽध्यायः ॥ ९ ॥

---

सैन्धवमित्यादि । सैन्धवादीनि त्रीणि घृतेन संमिश्य मातुलुङ्गरसे पिष्ट्वा संशोष्य स्तन्योदकाभ्यां पुनर्द्रवीकृत्याञ्जनं दातुमिदमुच्यते सैन्धवमिति । अणुतैलं वातव्याधावुपदिष्टम् । वसेति । किञ्चिन्नागरोन्मिश्रितेतिसमन्वयः । परिशिष्टं निगदव्याख्यातम् ॥ ४—५ ॥

इति श्रीडल्हणाचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे वाताभिष्यन्दप्रतिषेधोनाम नवमोऽध्यायः ॥

# दशमोऽध्यायः ।

अथातः पित्ताभिष्यन्दप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

पित्तस्यन्दे पैत्तिके चाधिमन्थे
रक्तास्रावः स्रंसनञ्चापि कार्य्यम् ।
अक्ष्णोः सेकालेपनस्याञ्जनानि
पैत्ते च स्याद्‌यद्विसर्पे विधानम् ॥ २ ॥

गुन्द्रां शालिं शैवलं शैलभेदं
दार्व्वीमेलामुत्पलं रोध्रमभ्रम् ।
पद्मात् पत्रं शर्करा दर्भमिक्षुं
तालं रोध्रं वेतसं पद्मकञ्च ॥

द्राक्षां क्षौद्रं चन्दनं यष्टिकाह्वं
योषित्क्षीरं रात्र्यनन्ते च पिष्ट्वा ।
सर्पिःसिद्धं तर्पणे सेकनस्ये
शस्तं क्षीरं सिद्धमेतेषु वाजम् ॥

---

दोषक्रमागतत्वात् पित्ताभिष्यन्दप्रतिषेधं नामाधिकरोति अथात इत्यादिना ॥ १ ॥

पित्तेत्यादि । सेकादीनि प्रकृतत्वात् पित्तहराण्येव कार्य्याणीति नेयम् । यच्च विधानमालेपनादीनां तदपि कार्य्यमिति शेषः । गुन्द्रा एरका "होगला" इति परिचीयते शैलभेदं पाषाणभेदम्, अभ्रं मुस्तकं वेतसो नामवञ्जुल

योज्यो वर्गो व्यस्त एषोऽन्यथा वा
सम्यङ्नस्येऽष्टार्द्धसङ्ख्येऽपि नित्यम् ।
क्रियाः सर्व्वाः पित्तहर्य्यः प्रशस्ता-
स्त्र्याहाच्चोर्द्धं क्षीरसर्पिश्च नस्यम् ॥
पालाशं स्याच्छोणितञ्चाञ्जनार्थे
शल्लक्या वा शर्कराक्षौद्रयुक्तम् ।
रसक्रियां शर्कराक्षौद्रयुक्तां
पालिन्द्यां वा मधुके वापि कुर्य्यात् ॥
मुस्ता फेनः सागरस्योत्पलञ्च
कृमिघ्नैलाधात्रिबीजाद्रसश्च ।
तालीशैलागैरिकोशीरशङ्खै-
रेवं युञ्ज्यादञ्जनं स्तन्यपिष्टैः ॥
चूर्णं कुर्य्यादञ्जनार्थे रसो वा
स्तन्योपेतो धातकीचन्दनाभ्याम् ।

---

"वेत" इति विज्ञायते । तर्पणेशस्तमित्यन्वयः । नस्ये प्रधान्यात् "चि' ४० अ" यः स्नेहनार्थमित्यादिनोक्तो वैशेषिकनस्यशब्दवाच्ये नस्ये इत्यर्थः । अष्टार्द्धसङ्ख्ये इहानौपयोगिके सत्यपि व्याध्यन्तरप्रतिषेधकृते कर्त्तव्ये परिशिष्टे शिरोविरेचन–प्रतिमर्शावपीड़-प्रधमन–समाख्ये नस्यचतुष्टयेऽपीत्यर्थः । त्र्यहाच्चोर्द्धमित्यामावस्थापरिहारार्थमिति गम्यते तथाच पक्वावस्थायामित्याख्यातम्, क्षीरोत्थं सर्पिः क्षीरसर्पिः । पालाशमिति पालाशं पलाशपुष्पोद्भवम्, शोणितसारूप्याच्छोणितं स्वरसमिति यावत् । शल्लकी गजभक्ष्या लताभेदः रसक्रियां घनीभूतक्वाथं अत्राप्यञ्जनार्थं इत्याकृष्याभ्योयते, पालिन्दी श्यामा-

योषित्स्तन्यं शातकुम्भं विघृष्टं
क्षौद्रोपेतं कैंशुकञ्चापि पुष्पम् ॥
रोध्रं द्राक्षां शर्करामुत्पलञ्च
नार्य्याः क्षीरे यष्टिकाह्वं वचाञ्च ।
पिष्ट्वा क्षीरे वर्णकस्य त्वचं वा
तोयोन्मिश्रे चन्दनोडुम्बरे च ॥
कार्य्यः फेनः सागरस्याञ्जनार्थे
नारीस्तन्ये माक्षिके चापि घृष्टः ॥
योषित्स्तन्ये स्थापितं यष्टिकाह्वं
रोध्रं द्राक्षां शर्करामुत्पलञ्च ।
क्षौमावद्धं पथ्यमाश्च्योतने वा
सर्पिर्घृष्टं यष्टिकाह्वं सरोध्रम् ॥
तोयोन्मिश्राः काश्मरीधात्रिपथ्या-
स्तद्वच्चाहुः वाट्यालस्याम्बुनैव ॥ ३ ॥
एषोऽम्लाख्ये ऽनुक्रमश्चापि शुक्ते
कार्य्यः सर्व्वः स्यात् शिरामोक्षवर्ज्जः ।
सर्पिः पेयं त्रैफलं तैल्वकं वा
पेयं वा स्यात् केवलं यत् पुराणम् ॥ ४ ॥

---

लता धात्रिवीजात् चात्रीवीजमज्जनः स्यन्दनस्तिनिशः शातकुम्भं सुवर्णम् तच्चजारितमेवादेयम् । वर्णकशब्देन फलत्रिकमेव ग्राहयन्ति कुमता:

दोषेऽधस्ताच्छुक्तिकायामपास्ते
शीतैर्द्रव्यैरञ्जनं कार्य्यमाशु ॥
वैदुर्य्यं यत् स्फाटिकं वैद्रुमञ्च
मौक्तं शाङ्खं राजतं शातकुम्भम् ।
चूर्णं सूक्ष्मं शर्कराक्षौद्रयुक्तं
शुक्तिं हन्यादञ्जनञ्चैतदाशु ॥ ५ ॥
युञ्ज्यात् सर्पिर्धूमदर्शी नरस्तु
शेषं कुर्य्याद्रक्तपित्ते विधानम् ।
यच्चैवान्यत् पित्तहृच्चापि सर्व्वं
यद्वीसर्पे पैत्तिके वै विधानम् ॥ ६ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे पित्ताभिष्यन्दप्रतिषेधो नाम दशमोऽध्यायः ॥ १० ॥

---

चन्दनोडुम्बरे घृष्टे चन्दनोडुम्बरकाष्ठे । आश्चोतनचतुष्कमुपदिशति योषिदित्यादिना सार्द्धश्लोकेन ॥ २—४ ॥

शुक्तिकायां किञ्चिद्विशिनष्टि दोष इति । शुक्तिकायामधस्ताद् दोषेऽपास्ते विरेचनेन दोषे निर्हृते शीतैर्द्रव्यैःस्तन्यघृष्टै र्यष्टिकादिभि रास्त्रञ्जनं कार्य्यम् अधिगतदोषशेषमुच्छेत्तुं पुनरावृत्तिभयादित्याकूतम् । युञ्ज्यादिति । सर्पिः पित्तहरद्रव्यसंसिद्धमिति हृदयम् । रक्ते पित्तेचेति रक्त-पित्ते । परिशिष्टं निगदव्याख्यातम् ॥ ५—६ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे पित्ताभिष्यन्दप्रतीषेधोनाम दशमोऽध्यायः ॥

# एकादशोऽध्यायः ।

अथातः श्लेष्माभिष्यन्दप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

स्यन्दाधिमन्थौ कफजौ प्रवृद्धौ जयेच्छिराणामथ मोक्षणेन ।
स्वेदावपीडाञ्जनधूमसेकप्रलेपयोगैः कवलग्रहैश्च ।
रूक्षैस्तथाश्च्योतनसंविधानैस्तथैव रूक्षैः पुटपाकयोगैः ॥ २ ॥
आशात् आशाच्चाप्यपतर्पणान्ते प्रातस्तयोस्तिक्तघृतं प्रशस्तम् ।
तदन्नपानञ्च समाचरेद्धि यत् श्लेष्मणो नैव करोति वृद्धिम् ॥३॥
कुटन्नटास्फोतफणिज्झकबिल्व-पत्तूरपील्वर्ककपित्थभङ्गैः ।
स्वेदं विदध्यादथवानुलेपं वर्हिष्ठशुण्ठीसुरकाष्ठकुष्ठैः ॥
सिन्धूत्थहिङ्गुत्रिफलामधूकप्रपौण्डरीकाञ्जनतुत्थताम्रैः ।
पिष्टैर्जलेनाञ्जनवर्त्तयः स्युः पथ्याहरिद्रामधुकाञ्जनैर्वा ॥

---

अनुक्रमागतं श्लेष्माभिष्यन्दप्रतिषेधमधिकरोति अथात इत्यादिना ॥१॥

स्यन्देत्यादि। शिराणां मोक्षणं "शा ८ अ०" स्वेदादिकन्तु स्वेदनस्य विधौ क्रियाकल्पञ्चाभिसमीक्ष्य कार्य्यम्। तिक्तघृतं कुष्ठचिकित्सिते निरदिक्षत्। कुटन्नटः श्योनाकः आस्फोतः श्वेतार्कः पत्तुरः शालिञ्चशाकः पीलुः कोङ्कणदेशप्रसिद्धोगुड़फलोऽहच्च: "आखरोट" इति विज्ञायते। पल्लवापर-पर्य्यायोऽयं भङ्गशब्दः कुटन्नटादिभिः सर्व्वैरेवसम्बध्यते वर्हिष्ठं ह्रीवेरम्। सम्प्रति समाञ्जनान्युपदिदिक्षति सिन्धूत्थेत्यादिना नयनामयेष्वित्यन्तेन ग्रन्थसन्दर्भेण। ताम्रैरिति ताम्रमत्र माक्षयितुं प्रदेयं सिन्धुत्थं जलेन द्रवीकृत्याहोरात्रं

श्रीण्यूषणानि त्रिफलाहरिद्राविडङ्गसाराश्च समानि च स्युः ।
बर्हिष्ठकुष्ठामरकाष्ठशङ्खपाठानलव्योषमनःशिलाश्च ।
पिष्टाम्बुना वा कुसुमानि जातीकरञ्जशोभाञ्जनजानि युञ्ज्यात् ॥
फलं प्रकीर्य्यादथवापि शिग्रोः पुष्पञ्च तुल्यं बृहतीद्वयस्य ।
रसाञ्जनं चन्दनसैन्धवञ्च मनःशिलाले लशुनञ्च तुल्यम् ।
पिष्टाञ्जनार्थं कफजेषु धीमान् वर्त्तीर्विदध्यान्नयनामयेषु ॥ ४ ॥
रोगे बलासग्रथितेऽञ्जनैस्तैः कर्त्तव्यमेतत् सुविशुद्धकाये ॥ ५ ॥
नीलान् यवान् गव्यपयोऽनुपीतान् शलाकिनः शुष्कतनून् विदह्य ।
तथार्ज्जकास्फोतकपित्थविल्वनिर्गुण्डिजातीकुसुमानि चैव ॥
तत्क्षारवत् सैन्धवतुल्यरोचनं पक्वं विदध्यादथ लोहनाड्याम् ।
एतद्बलासग्रथितेऽञ्जनं स्यादेषोऽनुकल्पस्तु फणिज्झकादौ ॥६

---

ताम्रपात्रे स्थापयन्ति कुशलाः । त्रीणीत्यादौ नपुंसकानपुंसकयोर्द्वन्द्वे नपुंसकशेषात् समानीति नपुंसकत्वं, समान्यञ्जनवर्त्तयः स्युरिति योजना । बर्हिष्ठादीनि वा शब्दादथवा जाती कुसुमादीनि पिष्ट्वा युञ्ज्यादञ्जनवर्त्तिं कारयितुमिति शेषः । फलमिति । अथवेति योगान्तरसंसूचनार्थः अपि शब्दश्च समुच्चयार्थः । प्रकीर्य्यात् पूतिकरञ्जात् शिग्रोश्च फलं बृहतीद्वयस्य पुष्पञ्च तुल्यं युञ्ज्यादिति पूर्व्वेणान्वयः एवं सिन्धुत्थपथ्योषणबर्हिष्ठजातीकुसुम प्रकीर्य्य फलरसाञ्जनादीनि समाञ्जनानि व्याख्यातानि ॥ २—५ ॥

नीलानिति सैन्धवतुल्यरोचनमित्यकारो मत्वर्थीय स्तथाच शलाकिनः सशूकान् नीलान् दुष्टत्वेन निसर्गतोवा नीलवर्णान् यवान् गव्यपयोऽनुपीतान् अहोरात्रं गव्यपयोवासितान् सैन्धवाद्यावापं क्षारवत् पक्वं

महौषधं मागधिकाश्च मुस्तां ससैन्धवं यन्मरिचञ्च शुक्लम् ।
तन्मातुलुङ्गस्वरसेन पिष्टं नेत्राञ्जनं पिष्टकमाशु हन्यात् ॥
फलं बृहत्या मगधोद्भवानामादाय कल्कं फलपाककाले ।
स्रोतोजयुक्तं खलु सप्तरात्रात्तदुद्धृतं स्यात्तु तथैव पथ्यम् ॥
वार्त्ताकुशिग्र्विन्द्रसुरापटोलकिराततिक्तामलकीफलेषु ॥ ७ ॥
कासीससामुद्ररसाञ्जनानि जात्यास्तथा कोरकमेव चापि ।
प्रक्लिन्नवर्त्मन्युपदिश्यते तु योगाञ्जनं तन्मधुनावघृष्टम् ॥ ८ ॥
नादेयमग्र्यं मरिचञ्च शुक्लं नेपालजाता च समप्रमाणा ।
समातुलुङ्गद्रव एष योगः कण्डूं निहन्यात् सकृदञ्जनेन ॥
सशृङ्गवेरं सुरदारु मुस्तं सिन्धुप्रसूतं मुकुलानि जात्याः ।
सुरासुपिष्टन्त्विदमञ्जनं हि कण्ड्वाञ्च शोफे च हितं वदन्ति ॥ ९

---

विदध्यादञ्जनविधिनेति हृदयम् । अञ्जनस्यास्यासम्भवे एष एव विधिः फणिज्झकादावतिदिश्यते, फणिजझकादिः "सू० ३८ अ०" उक्तः सुरसाद्यङ्गविशेषः । फणिज्झकादावेष कल्पोगौणत्वेनानुकल्प उच्यते । महौषधमिति । शुक्लं मरिचं शोभाञ्जनबीजं । फलमिति । फलपाककाले बृहत्यामगधोद्भवानाञ्च फलमादाय कल्कं कुर्य्यात्, स्रोतोजयुक्तं समसौवीराञ्जनं तत् सप्तरात्रात् परमुद्धृतं अञ्जनार्थं शलाकया गृहीतं सत् तथैव पथ्यं पिष्टकहितं स्यादित्यर्थः । इन्द्रसुरा गोरक्षकर्कटी कोरकः कलिकेति पर्य्यायौ । वार्त्ताकुप्रभृतिफलेषु कासीसादीनि संयुज्य मधुनावघृष्टं तद्योगाञ्जनं संयोगाभिनिर्वृत्तं तदञ्जनं प्रक्लिन्नवर्त्मन्युपदिश्यते । अग्र्यं विशदं नादेयं

स्यन्दाधिमन्थक्रममाचरेच्च सर्व्वेषु चैतेषु सदाऽप्रमत्तः ॥ १० ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे श्लेष्माभिष्यन्दप्रतिषेधो नामैकादशोऽध्यायः ॥ ११ ॥

---

श्रोतोऽञ्जनम् । सिन्धुप्रसूतं सैन्धवम् । स्यन्देत्यादि । एतेषु बलासग्रथितादिषु सर्व्वेष्वित्यर्थः । परिशिष्टं निगदव्याख्यातम् ॥ ६—१० ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे श्लेष्माभिष्यन्दप्रतिषेधोनामैकादशोऽध्यायः ।

## द्वादशोध्यायः ।

अथातो रक्ताभिष्यन्दप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

स्यन्दं मन्थं शिरोत्पातं शिराहर्षञ्च रक्तजम् ॥

एकेनैव विधानेन चिकित्सेच्चतुरो गदान् ।

---

आयुर्व्वेदे हि परमार्थतो दूष्यमपि रक्तं क्वचिद्दोषत्वेनातिशयत उपदेश्यं लोकार्थम् तदिदानीं पारिशेष्याद् व्याचिख्यासितत्वेन बुद्धिविषयमारूढं रक्ताभिष्यन्दप्रतिषेधं नामाधिकरोति अथात इत्यादिना समानं पूर्व्वेण । स्यन्देत्यादि

व्याध्यार्त्तांश्चतुरोऽप्येतान् स्निग्धान् कौम्भेन सर्पिषा ।
रसैरुदारैरथवा शिरामोक्षेण योजयेत् ॥
विरिक्तानां प्रकामञ्च शिरांश्चैषां विशोधयेत् ।
वैरेचनिकसिद्धेन सितायुक्तेन सर्पिषा ॥
ततः प्रदेहाः परिषेचनानि नस्यानि धूमाश्च यथास्वमेव ।
आश्च्योतनाभ्यञ्जनतर्पणानि स्निग्धाश्च कार्य्याः पुटपाकयोगाः ॥
नीलोत्पलोशीर-कटङ्कटेरी-कालीययष्टीमधुमुस्तरोध्रैः ।
सपद्मकैर्धौतघृतप्रदिग्धै- रक्ष्णोः प्रलेपं परितः प्रकुर्य्यात् ॥
रुजायाञ्चाप्यतिभृशं स्वेदाश्च मृदवो हिताः ।
अक्ष्णोः समन्ततः कार्य्यं पातनञ्च जलौकसाम् ॥
घृतस्य महती मात्रा पीता चार्त्तिं नियच्छति ।
पित्ताभिष्यन्दशमनो विधिश्चाप्युपपादितः ॥
कसेरुमधुकाभ्यां वा चूर्णमम्बरसंहतम् ।
न्यस्तमप्स्वान्तरिक्षासु हितमाश्च्योतनं भवेत् ॥

---

अत्र रक्तजमिति विशेषणं स्यन्दमन्थावेव विशिनष्टीति नेयम्, शिराहर्ष-शिरोत्पातयोरक्तजमात्रत्वेनोपदेशात्। अपरिस्फुटमर्थं स्फोरयति व्याध्यार्त्तानिति कौम्भेन एकादशवर्षोषितेन "एकादश शतश्चैव × × × कौम्भसर्पिः स्यात्"—इति सू० ४५ अ० अनुशासनञ्च। अथवा उदारैः प्रचुरैः रसैः ससर्पिष्कैः स्निग्धशीतैर्मांसरसैः स्निग्धानीति समन्वयः। वैरेचनिकसिद्धेन "सू० ३९ अ०" उपदिष्टेन त्रिवृतादिना विपक्केन रक्तदोषहराञ्जनतिक्तस्येति यथास्वं कटङ्कटेरी दारुहरिद्रा धौतघृतप्रदिग्धैः शतधौतघृतमिश्रैः। जलौ-

पाटल्यर्ज्जुनश्रीपर्णी-धातकीधात्रिविल्वत: ।
पुष्पाख्यथ वृहत्योश्च विम्बीलोटाच्च तुल्यश: ॥
समञ्जिष्ठानि मधुना पिष्टानीक्षुरसेन वा ।
रक्ताभिष्यन्दशान्त्यर्थमेतदञ्जनमिष्यते ॥
चन्दनं कुमुदं पत्रं शिलाजतु सकुङ्कुमम् ।
अयस्ताम्ररजस्तुत्थं निम्वनिर्य्यासमञ्जनम् ।
त्रपुकांस्यमलञ्चापि पिष्ट्वा पुष्परसेन तु ।
विपुला या: कृता वर्त्य: पूजितास्त्वाञ्जने सदा ॥
स्यादञ्जनं घृतं क्षौद्रं शिरोत्पातस्य भेषजम् ।
तद्वत् सैन्धवकासीसं स्तन्यघृष्टञ्च पूजितम् ॥
मधुना शङ्खनेपालि-तुत्थदार्व्य: समैन्धवा: ।
रस: शिरीषपुष्पाच्च सुरामरिचमाक्षिकै: ।
युक्तान्तु मधुना वापि गैरिकं हितमञ्जनम् ॥ ३ ॥

---

कर्षो पातनं सद्य: प्रशमनमित्यध्यवसेयम् । कर्षैस्त्रिभि अम्बरसंहतं पुट्टलिकाकारेण वस्त्रावबद्धम् । न्यस्तं क्षिप्तमाप्लुत मित्येतत् । आन्तरिक्षाभि आकाश गुणवहुला आप एव ग्रहीतव्या प्राय: समान गुणत्वेनोपदेशात् । श्रीपर्णी गाम्भारी लोटशब्देनेह धुस्तूरमेवादिन्सन्ति कुशला: "लोट उन्मादे" इति धात्वर्थस्मरणात्, पुष्पाणीति समन्वय: चन्दनमिति अयस्ताम्ररजो लौहताम्रभस्म अञ्जनं रसाञ्जनं त्रपुसीसकं मलञ्चोभयोरेव । पुष्परसेन मधुना पिष्टा कृता त्रिपुला विपुलक्रियत्वाद् विपुलाभिधाना या वर्त्ती वर्त्तयस्ता: सदा अञ्जने पूजिता भवन्तीति शेष: ॥ २ ॥

शिराहर्षेऽञ्जनं कुर्य्यात् फाणितं मधुसंयुतम् ॥
मधुना तार्क्ष्यजं वापि कासीसं वा ससैन्धवम् ।
वेत्राम्लं स्तन्यसंयुक्तं फाणितन्तु ससैन्धवम् ॥ ४ ॥
पैत्तं विधिमशेषेण कुर्य्यादर्ज्जुनशान्तये ।
इक्षुक्षौद्रसितास्तन्य-दार्व्वीमधुकसैन्धवैः ॥
सेकाञ्जनञ्चाव हितमम्लै राश्च्योतनं तथा ॥ ५ ॥
सितामधुककट्वङ्ग-मस्तुक्षौद्राम्लसैन्धवैः ।
वीजपूरककोलाम्ल-दाड़िमाम्लैश्च युक्तितः ।
एकशो वा द्विशो वापि योजितं वा त्रिभिस्त्रिभिः ॥
स्फटिकं विद्रुमं शङ्खो मधुकं मधु चैव हि ।
शङ्खक्षौद्रसितायुक्तः सामुद्रः फेन एव च ।
द्वाविमौ विहितौ योगावञ्जनेऽर्ज्जुननाशनौ ॥
सैन्धवक्षौद्रकतकाः सक्षौद्रं वा रसाञ्जनम् ।
कासीसं मधुना वापि योज्यमत्राञ्जने सदा ॥
लौहचूर्णानि सर्व्वाणि धातवो लवणानि च ।
रत्नानि दन्ताः शृङ्गाणि गणश्चाप्यवसादनः ॥

---

प्रत्येकशोऽर्द्धश्लोक समापनानि पञ्चाञ्जनान्युपदिदिक्षति स्यादित्यादिना । मैपालीमनःशिला । शिरिति फाणितोऽर्द्धावशेषेक्षुरसः तार्क्ष्यजं रसाञ्जनं वेत्राम्ल मम्लवेतसम्, अम्लैः सू० ४२ अ० अम्लवर्गाभिहितैर्दाड़िमादिभिः । सितेति कट्वङ्गः स्योनाकः वीजपूरकं मातुलुङ्गफलम्, कतकोनामौषधिः "निर्म्मली"

कुक्कुटाण्डकपालानि लशुनं कटुकत्रयम् ।
करञ्जबीजमेलाञ्च लेखाञ्जनमिदं स्मृतम् ॥
पुटपाकावसानेन रक्तविस्रावनादिना ।
सम्पादितस्य विधिना कृत्स्नेन शुन्दघातिना ॥ ६ ॥
अनेनापहरेच्छुक्रमव्रणं कुशलो भिषक् ।
उत्तानमवगाढ़ं वा कर्कशं वापि सव्रणम् ॥
शिरीषबीजमरिच-पिप्पलीसैन्धवैरपि ।
शुक्रस्य घर्षणं कार्य्यमथवा सैन्धवेन तु ॥
कुर्य्यात् ताम्ररज:शङ्ख-शिलामरिचसैन्धवैः ।
अन्त्याद् द्विगुणितैरेभिरञ्जनं शुक्रनाशनम् ॥
कुर्य्यादञ्जनयोगौ वा सम्यक्श्लोकार्द्धकाविमौ ।
शङ्खकोलास्थिकतक-द्राक्षामधुकमाक्षिकैः ॥
क्षौद्रदन्तार्णवमल शिरीषकुसुमैरपि ।
क्षाराञ्जनं वा वितरेद् बलासग्रथितापहम् ॥

---

इति विज्ञायते पुंस्त्वनिर्द्देशे सत्यपि फलप्राधान्यात् फलमेवात्रोपयुञ्जन्ति कुशला: । लौह चूर्णानि मारितपुटितलौहताम्रादीनि तैजसद्रव्याणि, धातवो हरितालादय:, आमनन्तिहि "हरितालं मन:शिला गैरिकाञ्जन कासीससीस लौह सहिङ्गुलं गन्धकोऽभ्रकमित्याद्याधातवो गिरि सम्भवा:" इति लवणानि सू० ४६ अ० लवणवर्गोपदिष्टानि सैन्धवादीनि रत्नानि हीरकादीनि दन्ता गजादीनाम्, अवसादनो लेखनेनाभिहतमांसाद्यवध्वंसन: ॥ ३—६ ॥

उपदिष्टेन विधिना यथा योगं सव्रण मव्रणञ्च शुक्रं प्रतिकर्म्मुपदिशति

मुद्गान् वा निस्तुषान् भृष्टान् शङ्खक्षौद्रसितायुतान्।
मधूकसारं मधुना योजयेच्चाञ्जने सदा॥
विभीतकास्थिमज्जा वा सक्षौद्रः शुक्रनाशनः॥
शङ्खशुक्तिमधुद्राक्षा-मधूककतकानि च।
द्वित्वग्गते सशूले वा वातघ्नं तर्पणं हितम्॥
वंशजारुष्करौ तालं नारिकेलञ्च दाहयेत्।
विस्राव्य क्षारवच्चूर्णं भावयेत् करभास्थिजम्।
बहुशोऽञ्जनमेतत् स्याच्छुक्रवैवर्ण्यनाशनम्॥ ७॥
अजकां पार्श्वतो विद्ध्वा सूच्या विस्राव्य चोदकम्।
व्रणं गोमांसचूर्णेन पूरयेत् सर्पिषा सह।

---

पुटेति रक्तविस्रावणादिना पुटपाकावसानेन पुटपाकान्तेनैकोक्तेन कर्म्मणा सम्पादितस्यातुरस्यानेन कृत्स्नेन स्यन्दघातिना विधिना अव्रणं शुक्रमुक्तविधं सव्रणमपि वा अपहरेच्चिकित्सेदित्यर्थः अत्र कुशल इति विशेषणेन कर्त्तुः समीक्ष्यकारित्वमाहतेति व्याजेन सूचयाम्बभूव। शुक्रनाशनान्यष्टावञ्जनान्युपदिशति कुर्य्यादित्यादिना श्लोकपञ्चकेन। जारितं ताम्रं ताम्ररजः शिलामनःशिला। इमावनन्तरं वक्ष्यमाणौ। अर्णवमलः समुद्रफेनः। बलास ग्रथितापहं क्षाराञ्जनम् "नीलान् यवान्" इत्यादिना उ० ११ अ० व्याकृतम्। द्वित्वगिति वातघ्नं तर्पणं क्रियाकल्पे निर्द्देक्ष्यते वंशजः करीरो वंशाङ्कुर इत्यनर्थान्तरं क्षारद्रव्यत्वेन नारिकेलान्तानामेषां सर्व्वाण्यङ्गानि गृह्यन्ते। करभः करिशावकः बहुशो भावयेदित्यन्वयः शुक्रजनितं वैवर्ण्यं मन्दशुक्रमित्येतत्॥ ७॥

बहुशोऽवलिखेच्चापि वर्त्मास्योपगतं यदि ॥
सशोफश्चाप्यशोफश्च द्वौ पाकौ यौ प्रकीर्त्तितौ ।
स्नेहस्वेदोपपन्नस्य तत्र विद्ध्वाशिरां भिषक् ।
सेकाश्च्योतननस्यानि पुटपाकांश्च कारयेत् ॥
सर्व्वतश्चापि शुद्धस्य कर्त्तव्यमिदमञ्जनम् ।
ताम्रपात्रस्थितं मांसं सर्पिःसैन्धवसंयुतम् ॥
मैरेयं वापि दध्येवं दध्युत्तरकमेव च ।
घृतं कांस्यमलोपेतं स्तन्यं वापि ससैन्धवम् ॥
मधूकसारं मधुना तुल्यांशं गैरिकेण वा ।
सर्पिःसैन्धवताम्राणि योषित्स्तन्ययुतानि च ॥ ८ ॥
दाड़िमारेवताश्मन्त-कोलाम्लैश्च ससैन्धवम् ।

---

अजकामिति अथचेदजकाया महत्वान्निमीलयतो वर्त्मनी आस्येन तामुभयतः पीड़यत स्तर्हि कागति रित्याह बहुश इति यद्यास्येन तामुपगतं वर्त्म वर्त्मद्वितयं तर्हि बहुशोऽवलिखेदुदकसञ्चयावरोधार्थं लिखन्निव विध्येच्चकारात् प्रोतेनाच्छाद्य वस्त्रपट्टेन बद्धानन्तरात् तहाम्बु स्वेत्यर्थः। अत्र विशेषयति तन्त्रान्तरं "सर्व्वथाऽनुपशान्तान्तु दहेत् स्वर्णशलाकया। अजकां पार्श्वतो विद्ध्वा ततोरन्ध्रं समाचरेत्" इति। सशोफ इति। इदं वक्ष्यमाणं नवकम्। ताम्रेति ताम्रपात्रस्थितमिति विशेषणं यथा योगं वचनव्यत्यासेन सर्व्वत्रैवान्वेयं सर्पिः सैन्धवसंयुतमितितु मैरेयमित्यादावर्द्धश्लोक एव, मैरेयोनाम सू० ४५अ० व्याहृतः दध्युत्तरकं दधिसरः। इदमत्रावधेयं ताम्रपात्रस्थितं सर्पिः सैन्धव संयुतं मांसं, मैरेयो, दधि, दध्युत्तरकञ्च तथा ताम्रपात्रस्थितं कांस्यमलोपेतं

रसक्रियां वा वितरेत् सम्यक् पाकजिघांसया ॥
मांसं सैन्धवसंयुक्तं स्थितं सर्पिषि नागरम् ।
आश्च्योतनाञ्जनं योज्यमवलाक्षीरसंयुतम् ॥
जात्याः पुष्पं सैन्धवं शृङ्गवेरं कृष्णाबीजं कीटशत्रोश्च सारम् ।
एतत् पिष्टं नेत्रपाकेऽञ्जनार्थं क्षौद्रोपेतं निर्व्विशङ्कं प्रयोज्यम् ॥९
पूयालसे शोणितमोक्षणञ्च हितं तथैवाप्युपनाहनञ्च ।
कृत्स्नो विधिश्चेत्रणपाकघाती यथाविधानं भिषजा प्रयोज्यः ॥
कासीससिन्धुप्रभवार्द्रकैस्तु हितं भवेदञ्जनमेव चात्र ।
क्षौद्रान्वितैरेभिरथोपयुञ्ज्यादन्यत्तु ताम्रायसचूर्णयुक्तैः ॥ १० ॥
स्नेहादिना सम्यगपास्य दोषांस्तृप्तिं विधायाथ यथास्वमेव ।
प्रक्लिन्नवर्त्मानमुपक्रमेत सेकाञ्जनाश्च्योतननस्यधूमैः ॥
मुस्ताहरिद्रामधुकं प्रियङ्गुसिद्धार्थरोध्रोत्पलसारिवाभिः ।
क्षुण्णाभिराश्च्योतनमेव कार्य्यमथाञ्जनञ्चाञ्जनमाक्षिकं स्यात् ॥

---

घृतं, ससैन्धवं स्तन्यं, मधुना गैरिकेन तुत्थो मधूकसारः, स्तन्ययुतानि सर्पिः सैन्धव ताम्रभस्मानि चेति नवाञ्जनानि व्याख्यातानि ॥ ८ ॥

रसक्रिया माह दाड़िमेति । आयुर्व्वेदे फाणितीभूतः क्वाथोरसक्रियोच्यते । सैन्धवसंयुतं मांसं मांसस्वरस स्तथा सर्पिषि स्थितमवलाक्षीरसंयुतं नागरञ्च यथा क्रममाश्चोतनाञ्जनम् । जात्या इति अञ्जन मेतन्नेत्रपाके सद्यः प्रत्यय कारकम् ॥ ९

पूयालस इति ताम्रायस चूर्णयुक्तैः क्षौद्रान्वितै रेभिः कासीसादिभि

पथ्यं फलत्रयामलकस्य पक्वा क्रियां विदध्यादथवाञ्जनार्थे ।
वंशस्य मूलेन रसक्रियां वा वर्त्तीकृतां ताम्रकपालपक्वाम् ॥
रसक्रियां वा त्रिफलाविपक्वां पलाशपुष्पैः खरमञ्जरेर्वा ॥ ११ ॥
पिष्टाच्छगल्याः पयसा मलं वा कांस्यस्य दग्ध्वा सह तान्तवेन ।
प्रत्यञ्जने तन्मरिचैरुपेतं चूर्णेन ताम्रस्य सहोपयोज्यम् ॥ १२ ॥
समुद्रफेनं लवणोत्तमञ्च शङ्खोऽथ मुद्गो मरिचञ्च शुक्लम् ।
चूर्णाञ्जनं योज्यमथापि कण्डूमक्लिन्नवर्त्मान्युपहन्ति शीघ्रम् ॥ १३ ॥
प्रक्लिन्नवर्त्मन्यपि चैत एव योगाः प्रयोज्याश्च समीक्ष्य दोषान् ।
सकज्जलं ताम्रघटे च घृष्टं सर्पिर्युतं तुल्यकमञ्जनञ्च ॥ १४ ॥

---

रित्यर्थः । चेहेत्यादि व्रणं तर्पणेनोपपन्नम् । पक्वमिति क्रियां रसक्रियाम् । वंशस्य मूलेन रसक्रियां कृत्वा तामेव पुनस्ताम्रपात्रे पक्त्वा वर्त्तीकृत्य चाञ्जनेनोपयोक्तुमिदमुच्यते वर्त्तीति । त्रिफलाविपक्वां त्रिफलाकृतां तथा पलाश पुष्पैःखरमञ्जरैरपामार्गैर्वा विपक्वां रसक्रियामित्यन्वयः ॥ १०—११ ॥

अञ्जनप्रधानतोऽत्यर्थमुपयुक्तेन तीक्ष्णेनाञ्जनेन वातितरां रागादयश्चेत्-प्रादुर्भवन्ति तर्हि छागतिरित्याह पिष्टेति, तान्तवेन द्विगुणेन वस्त्रखण्डेन ताम्रस्य चारितस्येति ज्ञेयम् । एतेनैतदुक्तं भवति कांस्यमलं तद्द्विगुण-कार्पासवस्त्रखण्डेनान्तर्धूमं दग्ध्वा तदष्टमांशेन मरिचचूर्णेन ताम्रभस्म-नाच यथावत् संमिश्र्य छागक्षीरेणाञ्जनं कार्य्यमिति प्रतिकूलमञ्जनं प्रत्यञ्जनम् । समुद्रेति शुक्लं मरिचं शोभाञ्जनबीजं ताम्रघटे ताम्रपात्रे

इति सुश्रुतसंहितायामुत्तरतन्त्रे रक्ताभिष्यन्दप्रतिषेधो नाम द्वादशोऽध्यायः ॥ १२ ॥

सर्पिर्युतं घृष्टं सकज्जलं तुत्थकमञ्जनं रसाञ्जनञ्च प्रक्लिन्नवर्त्मन्यञ्जन मिति हृदयम् । परिशिष्टमतिरोहितार्थम् ॥ १२—१४ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे रक्ताभिष्यन्दप्रतिषेधोनाम द्वादशोऽध्याय ॥

# त्रयोदशोऽध्यायः ।

अथातो लेख्यरोगप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

नव येऽभिहिता लेख्याः सामान्यस्तेष्वयं विधिः ।

स्निग्धवान्तविरिक्तस्य निवातातपसद्मनि ॥

सुखोदकप्रतप्तेन वाससा सुसमाहितः ।

शेषत्वादिना भिन्नेष्वामयेषु मध्ये व्याधानां प्रतीकारक्रमोऽभिष्यन्दचतुष्क-प्रतिषेधेषूपदिष्टो निरवशेषेण, इदानीमुपदिदिक्षितत्वेनोपस्थितेषु लेख्यानामि-षधि प्रतीकारविधिः सुखमुपदेष्टुमुपधारयितुं वा युज्यते इत्यतः सूचीकटाह-न्यायानुसारी भगवान् व्युत्क्रमेण तमेवोपदिशन् लेख्यरोगप्रतिषेधं

स्वेदयेद्वर्त्म निर्भुज्य वामाङ्गुष्ठाङ्गुलिस्थितम् ॥
अङ्गुल्यङ्गुष्ठकाभ्यान्तु निर्भुग्नं वर्त्म यत्नतः ।
प्लोतान्तरीकृतं नैव चलति स्रंसतेऽपि वा ॥
ततः प्रमृज्य प्लोतेन वर्त्म शस्त्रपदाङ्कितम् ।
लिखेच्छस्त्रेण पत्रैर्वा ततो रक्ते स्थिते पुनः ॥
स्विन्नं मनोह्वाकासीसव्योषाञ्जनकसैन्धवैः ।
श्लक्ष्णपिष्टैः समाक्षीकैः प्रतिसार्य्योष्णवारिणा ॥
प्रक्षाल्य हविषा सिक्तं व्रणवत् समुपाचरेत् ।
स्वेदावपीड़प्रभृतींस्त्र्यहाद्दूर्द्ध्वं प्रयोजयेत् ॥
व्यासतस्ते समुद्दिष्टं विधानं लेख्यकर्म्मणि ॥ २ ॥
असृगास्रावरहितं कण्डूशोफविवर्ज्जितम् ।
समं नखनिभं वर्त्म लिखितं सम्यगिष्यते ॥ ३ ॥

---

मामाधिकरोति अथात इत्यादिना । १ । नवेत्यादि । सामान्यो दोषादिसम्बन्धिविशेषानपेक्षितत्वेन साधारणः निर्भुज्य उत्तानीकृतत्वेन कुटिलीकृत्य उक्तमर्थं पुनर्विशिनष्टि अङ्गुलीति । यथा नैव न कथमपि चलति पिच्छिलत्वेनाङ्गुल्यङ्गुष्ठतः स्खलति, स्रंसते नापिचाधःपतति निमीलतीति यावत् । तथाप्लोतान्तरीकृतं तूलकच्छन्नं वर्त्म अङ्गुल्यङ्गुष्ठकाभ्यां निर्भुग्नं कुर्य्यादितिशेषः । शस्त्रपदाङ्कितमिति क्रियाविशेषणम् । पत्रैः कर्कशैर्दार्व्वीकाकोडुम्बरिकाशेफालिकादिजैरेव । मनोह्वा मनःशिला प्रतिसार्य्यं विघृष्य समुपाचरेत् बन्धनमोचनधावनप्रतिसारणादीनि सम्यक्समीक्ष्यावचारयेदित्यर्थः । समाक्षीकैरितिच्छन्दोऽनुरोधाद्दीर्घः । २ ।

ततः क्षौद्रघृतं दत्त्वा सम्यग्बन्धमुपाचरेत् ॥ २ ॥
रोचनाक्षारतुल्यानि पिप्पल्यः क्षौद्रमेव च ।
प्रतिसारणमेकैकं भिन्ने लगणे इष्यते ॥
महत्यपि च युञ्जीत क्षाराग्निविधिकोविदः ॥ ३ ॥
स्विन्नां भिन्नां विनिष्पीड्य भिषगञ्जननामिकाम् ।
शिलैलानतसिन्धुत्थैः सक्षौद्रैः प्रतिसारयेत् ॥
रसाञ्जनमधुभ्यां वा भिन्नां वा शस्त्रकर्म्मवित् ।
प्रतिसार्य्याञ्जनैर्युञ्ज्यादुष्णैर्दीपशिखोद्भवैः ॥ ४ ॥
सम्यक्स्विन्ने कृमिग्रन्थौ भिन्ने स्यात् प्रतिसारणम् ।
त्रिफलातुत्थकासीस-सैन्धवैस्तु रसक्रियाम् ॥
भित्त्वोपनाहं कफजं पिप्पलीमधुसैन्धवैः ।
लेखयेन्मण्डलाग्रेण समन्तात् प्रच्छयेदपि ॥
संस्विद्य पत्रभङ्गैश्च स्वेदयित्वा यथासुखम् ॥ ५ ॥
आ पाकाद्विधिनोक्तेन पञ्च भेदानुपाचरेत् ।
सर्व्वेष्वेतेषु विहितं विधानं स्नेहपूर्व्वकम् ।

---

पुष्पं रसाञ्जनम् । रोचनेति क्षारोयवक्षारः भिन्ने विदारिते । महति तस्मिन् विशिनष्टि महत्यपीति । सू० ११ अ० उक्तः प्रतिसारणीयो मृदुः क्षारोऽग्नि-तप्ताशलाका चेति क्षाराग्नी माभूत् क्षाराग्न्योर्विभ्रमादप्रतिवार्य्यौ इत्युप-चारत इत्याह विधिकोविद इति २—४ ॥

सम्यगिति । पत्रभङ्गैः कुट्टितैर्निम्बार्कादि पत्रैः पञ्चभेदान् श्लेष्मोपनाह

सम्यक्तो प्रयतो भूत्वा कुर्व्वीत व्रणरोपणम् ॥ ६ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे भेद्यरोगप्रतिषेधो नाम चतुर्द्दशोऽध्याय ॥ १४ ॥

---

लगणविसवर्त्म क्रिमिग्रन्थ्यञ्जननामिकासमाख्यान् । परिशिष्टं निगद व्याख्यातम् ॥ ५—६ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये भेद्यरोगप्रतिषेधोनाम चतुर्द्दशोऽध्यायः ॥

---

# पञ्चदशोऽध्यायः ।

अथातश्छेद्यरोगप्रतिषेधं व्याख्यास्यामः ॥ १

स्निग्धं भुक्तवतो ह्यन्नमुपविष्टस्य यन्त्रतः ।
संरोषयेत्तु नयनं भिषक् चूर्णैस्तु लावणैः ॥
ततः संरोषितं तूर्णं सुस्विन्नं परिघट्टितम् ।
वर्त्म यत्र वलीजातं तच्चैतल्लगयेद्भिषक् ॥

---

अथो उद्देशवशात् प्रथमन्तावत् व्याकर्त्तव्यं छेद्यानां प्रतिषेधं हित्वा सुदूरमाक्षिप्तोऽस्मि कथाप्रसङ्गेन भास्तां तावत् इदानीन्तु तमेवार्थं प्रवर्त्त-यिष्याम इत्यभिसन्धाय छेद्यानां रोगाणां प्रतिषेधमधिकरोति अथात इत्यादिना । १ ।

अपाङ्गं प्रेक्षमाणस्य वडिशेन समाहितः।
मुचुण्ड्याग्रगृह्य मेधावी सूचीसूत्रेण वा पुनः॥
न चोत्थापयता क्षिप्रं कार्य्यमभ्युन्नतन्तु तत्।
शस्त्रपातभयाच्चास्य वर्त्मनी धारयेद्दृढम्॥
ततः प्रशिथिलीभूतं त्रिभिरेव विलम्बितम्।
उल्लिखन् मण्डलाग्रेण तीक्ष्णेन परिशोधयेत्॥
विमुक्तं सर्व्वतश्चापि कृष्णाच्छुक्लाच्च मण्डलात्।
नीत्वा कनीनकोपान्तं छिन्द्यान्नाति कनीनकम्॥
चतुर्भागस्थिते मांसे नास्ति व्यापत्तिमर्हति।
कनीनकवधादस्रं नाड़ी चाप्युपजायते॥
हीनच्छेदात् पुनर्वृद्धिं शीघ्रमेवाधिगच्छति॥ २॥

---

स्निग्धमिति उपविष्टस्येत्युपपूर्व्वो विशिरिह शयने प्रवर्त्तत इतिगम्यते पश्चाम्मोहि बद्धो दृष्टकर्म्माणोऽपि शस्त्रकुशलाभिषजः शयानस्यैव कर्म्मेदं सुखमञ्जसा सम्पादयितुमुत्सहन्ते। संरोषयेत् कोपयेदर्म्मोत्थापनार्थं सन्धवागादिना योजयेदिति यावत्। संरोषितं कुपितत्वेन स्फीतम् परिघट्टितं शिथिलतामापादयितुम् सन्दंशाघेषितस्ततश्चालितम्, अर्म्म यत्नावच्छेदे वलीजातं शिथिलं चर्म्मैव व्यक्तं "जातव्यलीकवज्ज्ञास" इति मेदिनी, अपाङ्गं प्रेक्षमाणस्यातुरस्य तत्र एतदर्थं समाहितोऽस्योर्ध्वाद्यावरण जिज्ञासयाऽविनाशतोभिषक् वडिशेन लगयेत् संयोजयेत् अभ्युन्नमयितुमित्याकूतम्, अथवैत् वडिशं नासाद्यते तर्हि कागतिरित्येवमनुयुयुक्षूनपाकुर्व्वन् पक्षान्तरमवतारयति मुचुण्डेरति मुचुण्ड्या सूक्ष्मकण्टकमुखेन सन्दंशविशेषेणाक्रम्याप्य मेधावी यथावद्रक्षणतत्परः सूचीसूत्रेण लगयेदिति पूर्व्वेणान्वयः।

चर्म यच्चालवद्वापि तदप्यन्त्याऽवलम्बितम् ॥
छिन्द्यादक्षेव शस्त्रेण वर्त्म शुक्लान्तमाश्रितम् ॥
प्रतिसारणमक्ष्णोस्तु ततः कार्य्यमनन्तरम् ।
यवनालस्य चूर्णेन त्रिकटोर्लवणस्य च ॥
स्वेदयित्वा ततः पश्चाद्बध्नीयात् कुशलो भिषक् ।

---

लगयेदिति लगीसक्ते चेति धातुघंटादिः। माभूत्तरितमुन्ममनेनार्म्मणोऽन्तच्छेदोऽयन्त्रितत्वेन कर्म्मकाले चर्म्मणोऽर्म्मा सम्पातदत्यतः त्रिभिरष्टि नवेति न शस्त्रपातभयात् शस्त्रोपयोगभयात् वर्त्मनी चात्र पिपतिषन्ती इत्यर्थादाक्षिप्यते चाहवेदृक् इत्युक्तः, पाटयेद्द्व्यङ्गुलेति हृदयम् । शस्त्रपातेति सप्तमी समासवेलायां सुगमम् । त्रिभिः संरागस्वेदनपरिघट्टनैः प्रशिथिलीभूतं विलम्बितं सावशेषातिच्छेदभयादद्भुतमुक्तिक्रियेति परेणान्वयः, उत्क्षिप्योद्गाचम् विमुच्यदिति यावत् परिशोधयेदर्म्मणा वियोजयेदित्यर्थः । मतावदेतावतैव विदितवेदितव्यास्य इत्याह निमुक्तमिति । नातिकनीनकं कनीनकानतिक्रान्तं छिन्द्यादस्त्रोर्व्यापत्तिभयादित्याकूतम् । भगवन् त्रिभागं पुनरायर्तं कियति मांसे संरक्षिते कनीनकं संरक्षितं भवतीत्याह चतुरिति । नाक्षि व्यापत्तिमर्हतीति यथावत् कनीनकावस्थानादित्यभिसन्धिः चतुरंशम् ।२।

चर्माविशेषे पुनर्विशिनष्टि चर्मेति उन्माज्जोत्थापनार्थं सैन्धवचूर्णेनावघृष्य लम्बितं प्रागवत् बडिशादिभिर्गृहीत्वेति शेषः, दक्षेव शस्त्रेणेति शस्त्रप्रचार सौकर्य्यार्थमुपदिश्यत इति मन्यते कार्त्स्न्यादिनापि च्छेदोपपत्तेः ततः शस्त्रकर्मणनन्तरमाचूर्णमित्युपदेशः यवनालस्य चूर्णेन यवक्षारेण ; स्वयन्तु यवक्षारेणैव तुल्यकल्पेनैव प्रतिसारयामो निरावाधमातुरमारोग्येणोपयोजयितुम् । स्वेदयित्वा च्छेदप्रतिसारणानिमित्तानां वेदनानामुपशमार्थं स्वेदेनोपचार्य ततस्तद्वेदनोपशमनात् पश्चात् कुशलोऽभ्यसे व्रतयोग्यो-

देशर्त्तुबलकालज्ञः स्नेहं दत्त्वा यथाहितम् ॥
व्रणवत् संविधानन्तु तस्य कुर्य्यादतः परम्।
वाताद्मुक्त्वा कर्णस्वेदं दत्त्वा शोधनमाचरेत् ॥३॥
काश्मरीआमलक-मधुकैः साधितं पयः।
हितमाश्चोतनं शूले शिरसः क्षौद्रसंयुतम् ॥
मधुकोत्पलकिञ्जल्क-दुर्व्वाकल्कैश्च मूर्द्धनि।
प्रलेपः सघृतः शीतः क्षीरपिष्टः प्रशस्यते ॥ ४ ॥
लेख्याञ्जनैरपहरेदर्म्मशेषं भवेद्यदि ॥ ५
अर्म्म चाल्पं दधिनिभं नीलं रक्तमथापि वा।
धूसरं तनु यच्चापि शुक्रवत् तदुपाचरेत् ॥६॥
चर्म्माभं बहलं यत्तु स्नायुमांसघनावृतम्।
छेद्यमेव तदर्म्म स्यात् कृष्णमण्डलगञ्च यत् ॥ ७ ॥
विशुद्धवर्णमक्लिष्टं क्रियास्वक्षि गतक्लमम्।
छिन्नेऽर्म्मणि भवेत् सम्यक् यथास्वमनुपद्रवम् ॥८॥

भिषग्बध्नीयात्। अथातनवेत् पाठस्तत्रातनोऽविदनत्वेन निराबाधं निमेषो-न्मेषकृती अतनं सातत्यगमनं यथादित्येवं व्याख्येयम्, अत सातत्य गमने इति धात्वर्थस्मरणात्। बध्नीयादित्यपरिस्फुटमर्थं स्फोरयति देशेति. यथाहितं यथायोगद्रव्यसंस्कृतत्वेनोपयोगिकं स्नेहं सर्पिरित्येवोपदेष्टव्यम्। शुक्लविभिन्नच्छिन्नव्रणवदिति व्रणवत् संविधानं पञ्चवल्कलक्वाथसेचनादिकम् तमर्थं विशदयति वाताहादिति आश्चोतनं पूरणम् लेख्याञ्जनैः क्रियाकल्पे

सिराजाले सिरा यास्तु कठिनास्ताश्च बुद्धिमान्।
उद्धृत्य मण्डलाग्रेण बडिशेनावलम्बिताः॥
सिरासु पिड़का जाता या न सिध्यन्ति भेषजैः।
अर्म्मवन्मण्डलाग्रेण तासां छेदनमिष्यते॥
रोगयोरेतयोः कार्य्यमशीतं प्रतिसारणम्।
विधिश्चापि यथादोषं लेखनद्रव्यसम्भृतः॥९॥
सन्धौ संस्वेद्य शस्त्रेण पर्व्वणीकां विचक्षणः।
उत्तरे च त्रिभागे च बड़िशेनावलम्बिताम्॥
छिन्द्यात् ततोऽर्द्धमग्रे स्यादश्रुनाड़ी ह्यतोऽन्यथा।
प्रतिसारणमत्रापि सैन्धवक्षौद्रमिष्यते॥
लेखनीयानि चूर्णानि व्याधिशेषस्य भेषजम्॥१०॥
शङ्खं समुद्रफेनञ्च मण्डूकीञ्च समुद्रजाम्।
स्फटिकं कुरुविन्दञ्च प्रवालाश्मन्तकं तथा॥

---

वक्ष्यमाणैर्लेख्यरोगप्रतिषेधे उपदिष्टैर्लेख्यैः। सम्यक्छिन्नामीलक्षणमाह विशुद्धेति। ९।८।

सिरेति। एतयोः सिराजालसिराजपिड़कयोः। लेखनद्रव्यसंभृतो-लेखनद्रव्यनिष्पादितो विधिर्लेखनविधिरित्यर्थः। कार्य्य इत्येवं क्रिया-ध्याहारेणान्वयः। पर्व्वणिकाप्रतिकारकममाह। सन्धाविति, उत्तरे त्रिभागे उपरितनभागत्रितये बडिशेनावलम्बितां पर्व्वणिकां ततः भागत्रितयस्याग्रे भागमित्येतत्, अथ उपरिष्टाच्छिन्द्यात् अताग्र इति विशेषणं भागत्रितय-

वैदुर्य्योपलकं मुक्तामयस्ताम्ररजांसि च ।
समभागानि सञ्चिन्त्य सार्द्धं स्रोतोऽञ्जनेन तु ॥
चूर्णाञ्जनं कारयित्वा भाजने मेषशृङ्गजे ।
संस्थाप्योभयतः कालमञ्जयेत् सततं बुधः ॥
पक्ष्माणि पिडकां हन्यात् सिराजालानि तेन वै ।
अर्मांस्तथा यच्च नाम्ना शुष्कार्शोऽर्व्वुदमेव च ॥
अभ्यन्तरं वर्त्मशया विधानं तेषु वक्ष्यते ॥
वर्त्मोपस्वेद्य निर्भुज्य सूच्योत्क्षिप्य प्रयत्नतः ।
मण्डलाग्रेण तीक्ष्णेन मूले छिन्द्याद्भिषग्वरः ॥
ततः सैन्धवकासीस-कृष्णाभिः प्रतिसारयेत् ।
स्थिते च रुधिरे वर्त्म दहेत् सम्यक् शलाकया ॥
क्षारेणावलिखेच्चापि व्याधिशेषो भवेद्यदि ।
तीक्ष्णैरुभयतोभागैस्ततो दोषमधिक्षिपेत् ॥

---

[illegible]धः सार्द्धं भागं परिकर्त्तुं तत्कन् हि [illegible] पञ्चेस्तत्र पिष्टे पादप[illegible] [illegible]न्याक्सर्व्वेर्ता सुकुमारोजलकोष्ठपरः शुक्लकृष्णमण्डलप्रान्ततः मणीक्षितो- मनाक्छिद्यते राजिन्द्रियं अलमान्वयितुम् तदिदमुच्यते स्यादन्नाड़ीति अत्र चक्षुर्लग्नं तदर्थाः शुक्लकृष्णसन्धिगतनाड़ी अत्र नाड़ी अमुकामण्डुकी अमुकमण्डुकी शक्तिरिति यावत् । कुरुविन्दं पद्मरागमणिः [illegible] मणिविशेषम् यत्तु पुनर्लोके "कर्पूरादि" इति विज्ञायते वैदूर्य्योपलं वैदूर्य्यम् विड़ालनेत्रतुल्यं मणिविशेषमिति यावत् अर्म्मोवर्त्मशयः वर्त्माभ्यन्तराणां रोगाणां प्रतीकारक्रममुपदिदिक्षति अभ्यन्तरमिति । मण्डलकं [illegible] कृष्ण-

वितरेच्च यथादोषमभिष्यन्दक्रियाविधिम् ।
शस्त्रकर्मण्युपरते मासन्तु स्यात् सुयन्त्रितः ॥ ११ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे छेद्यरोगप्रतिषेधो
नाम पञ्चदशोऽध्यायः ॥ १५ ॥

---

यथैषा व्याधिरुपरम इति तात्पर्य्यम् । इत्यन्तो हिताहारविहारनिरतः परिशिष्टमतिरोहितार्थम् । ८—११ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे छेद्यरोगप्रतिषेधोनाम पञ्चदशोऽध्यायः

---

## षोड़शोऽध्यायः ।

अथातः पक्ष्मकोपप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

याप्यस्तु यो वर्त्मभवो विकारः
पक्ष्मप्रकोपोऽभिहितः पुरस्तात् ।
तत्रोपविष्टस्य नरस्य चर्म्म
वर्त्मोपरिष्टादनुतिर्य्यगेव ॥

---

पक्ष्मकोपो हि च्छेद्यत्वेन व्याधिव्याख्यातया छेद्यरोगप्रतिषेधस्य आवश्यं सुतोऽप्यपरिहार्य्यत्वेन याप्यत्वेन च निदानादुक्तत्वेनेदानीं पक्ष्मकोपप्रतिषेधं मधिकरोति अथात इत्यादिना । १ ॥

भ्रुवोरधस्तात् परिमुच्य भागौ
पक्ष्माश्रितस्त्वेवमतोऽवकृन्तेत् ।
कनीनकापाङ्गसमं समन्ताद्-
यथाकृति स्निग्धतनोर्नरस्य ॥
उत्कृत्य शस्त्रेण यवप्रमाणं
बालेन सीव्येद्भिषगप्रमत्तः ।
दग्ध्वा च सर्पिर्मधुनावशेषं
कुर्य्याद्विधानं विहितं व्रणे यत् ॥

---

याप्य इति पुरस्तादीषद्रविके चिकित्साप्रविभागविज्ञानीये चेति नियम् तत्र पक्ष्मकोपे जाति यतो वर्त्मनश्चर्म्म चतुर्थिंशतिमिव यवमव-कृन्तेत् अत्र संशयः किन्तु खलु परिहार्य्यमंशं परिहाय सर्व्वं वर्त्मचर्म्माव-कृन्तेन चाहोस्वित् यथाकर्णं विध्येदित्यनुशासनात् कर्णैकदेशो विध्यते तथैवोक्तेष्ववकाशेषु कस्मिंश्चित् किञ्च वर्त्मचर्म्मावकृन्तेन उताहो क्रिन्नावत् स्निग्धमथ भुक्तवत एव कर्म्मेदं प्राग्वदभिनन्दन्ति भिषजः क्रिया-नियमादभुक्तवतोपीत्येवमनुयुञ्जानपाकुर्व्वन्नौपयोगिकत्वेनार्थान्तरमवतारयति कनीनकेति । कनीनकापाङ्गसममिति सर्व्वपर्य्यायोऽयं समशब्दः "समं सर्व्वसमानयो" इति कोषान्तरञ्च । पदमिदं शाकपार्थिवादिषु द्रष्टव्यम् । तथाच कनीनकापाङ्गसीमं सर्व्वमित्यर्थः एतेनेदमुक्तं भवति स्निग्धतनोः स्निग्धमङ्गं भुक्तवतोनरस्य कनीनकापाङ्गाववधीकृत्य समन्तात् सर्व्वतः परिहार्य्येतरस्मिन् सर्व्वं चर्म यथाकृति यथायथं तथैव शस्त्रेणोत्कृत्य यवप्रमाणं प्रान्तद्वयं हित्वा मध्यतो यवपरिमितं छिन्नावकाशम् अप्रमत्तः "नातिदूरे निकृष्टेव सूचीं कर्म्माणि पातयेत्" इत्याद्यनुशासने अवधानात्

ललाटदेशे च निबध्य पट्टं
प्राक्स्यूतमप्राप्यपरञ्च बद्धा ।
स्थैर्यं गते चाप्यथ शस्त्रमार्गे
बालान् विमुञ्चेत् कुशलोऽभिवीक्ष्य ॥ २ ।
एवं नचेच्छाम्यति तस्य वर्त्म
निर्भुज्य दोषोपहतां वलिञ्च ।
अतोऽग्निना वा प्रतिसारयेत् तां
क्षारेण वा सम्यगवेक्ष्य धीरः ॥ ३ ॥

---

भिषक् बालेन अश्वपुच्छलोम्ना तदनुरूपेण सूत्रेणवा सीव्येत् । चकारादनन्तरं रक्ते स्रुते मधुमासह सर्पिर्दत्त्वा अवशेषं विधानं बन्धनमोक्षणप्रक्षालनादिकं व्रणे यद्विहितं तदेवकुर्य्यादिति । कुर्य्यादित्यादिनातिदेशपरिप्राप्तेष्वर्थेषु मध्ये प्राधान्याद्बन्धं प्रकारतो निवेदयति ललाट इति । पट्टं चतुरङ्गुल-परिणाहं चतुर्हस्तायतं वस्त्रखण्डं ललाटदेशे निबध्य प्राक्स्यूतं पूर्व्वपीड़ित-तया सीवनेन लब्धारोग्यं चकारात् स्वस्थतया प्रागस्यूतञ्चापरमपि वर्त्म अत्र पक्ष्मकोप प्रतीकारार्थं कर्त्तव्ये बन्धे बद्धा कर्णयोरुपरि मस्तकाञ्च व्यत्यासेन छित्त्वाविष्टावबध्य तस्मात्तस्मात् विधिवन्मुञ्चेत् बध्नीयाच्च यावत्सम्यग्रूढ़-भावादितिशेषः । अत्र प्रतीकारार्थं छिन्नस्यूतस्य बन्धे कर्त्तव्ये अपरस्य बन्धनं सर्व्वथावर्त्म स्रावावरोधार्थमित्यनुसन्धेयम् ॥ अथानन्तरम् शस्त्रमार्गे स्थैर्य्यं गते पक्ष्म रूढ़त्वेन दृढ़तामापन्ने कुशलो बहुशो दृष्टकर्म्मा भिषक् अभिवीक्ष्य परितः संहितं निरीक्ष्य बालान् सूत्राणि वा विमुञ्चेत् ॥ २ ॥

नचेच्छाम्यति पुनर्वलेः प्रादुर्भावादित्याकूतम् । निर्भुज्य तर्ज्जन्यङ्गुष्ठाभ्यां वक्रीकृत्य दोषोपहतां तां वलिं दोषवशात् वक्रीभूतं तत् स्थवर्त्म अग्निना

छित्वा समं चाप्युपपक्ष्ममालां
सम्यग्गृहीत्वा बडिशैस्त्रिभिश्च ।
पथ्याफलेन प्रतिसारयेत् तु
पिष्टेन वा तौवरकेण सम्यक् ॥ ४ ॥
चत्वार एते विधयो विहन्तुं
पक्ष्मोपरोधं पृथगेव शस्ताः ।
विरेचनाश्च्योतननस्यधूम-
लेपाञ्जनस्नेहरसक्रियाश्च ॥ ५ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे पक्ष्मकोपप्रतिषेधो
नाम षोड़शोऽध्यायः ॥ १६ ॥

---

अग्नितप्तया शलाकया: क्षारेण वा सम्यगवेक्ष्य नाधिकं नापि च हीनं यथा स्यात् तथा विदग्धं प्रतिसारयेत् । पक्षान्तरमाह छित्वेति पक्ष्मणां समीप उपपक्ष्ममालां मालाशब्दोऽपीति पर्य्यायो त्रिभिर्बडिशै गृहीत्वेत्युक्तेऽपि वयन्तु षोड़शमुखेन वर्त्मसंदंशेनैव सुखं ग्राहयामः । तौवरिकं फलं मधुमेहचिकित्-सित समुक्ताय ग्राहयत्व्यम् । परिशिष्टं निगदव्याख्यातम् । २—५

इति श्रीहाराणचन्द्र चक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
उत्तरतन्त्रे पक्ष्मकोप प्रतिषेधोनाम षोड़शोऽध्यायः ॥१६॥

# सप्तदशोऽध्यायः।

—०○०—

अथातो दृष्टिगतरोगप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

त्रयः साध्यास्त्रयोऽसाध्या याप्याः षट् च भवन्ति हि ॥२

---

आद्येऽस्मिन् षट्सप्तति र्नेत्ररोगा नामलक्षणत निर्दिष्टास्तेषु त्रि वातजौ स्यन्दाधिमन्थावन्यतोवातो वातपर्य्ययः शुष्काक्षिपाकश्चेति पञ्च वाताभिष्यन्दप्रतिषेधे, तथा पित्तजौ स्यन्दाधिमन्थावम्लाध्युषितःशुक्ति धूमदर्शी चेति पञ्च पित्ताभिष्यन्दप्रतिषेधे, तथा श्लेष्मजौ स्यन्दाधिमन्थौ बलासग्रथितं पिष्टकः प्रक्लिन्नवर्त्म चेति पञ्च श्लेष्माभिष्यन्दप्रतिषेधे, तथा रक्तजौ स्यन्दाधिमन्थौ शिरोत्पातः शिराहर्षोऽर्जुनोऽव्रणशुक्रः सव्रणशुक्रोऽजकाजातं सशोफपाकोऽशोफपाकःपूयालसोऽक्लिन्नवर्त्म चेति द्वादश प्रसङ्गात् प्रक्लिन्नवर्त्मापि रक्ताभिष्यन्दप्रतिषेधे, तथा उत्सङ्गिनी बहलवर्त्म कर्द्दमवर्त्म श्याववर्त्म वद्धवर्त्म क्लिष्टवर्त्म पोथकी कुम्भिकिनी शर्करावर्त्म चेति नव लेख्यरोगप्रतिषेधे, तथा विषग्रन्थि र्लगणोऽञ्जननामिका क्रिमिग्रन्थिः श्लेष्मोपनाहश्चेति पञ्च भेद्यरोगप्रतिषेधे, तथार्म्मपञ्चकं शिराजालं शिराजपिड़का पर्व्वणीका वर्त्मार्शः शुष्कार्शोऽर्बुदश्चेत्येकादश छेद्यरोगप्रतिषेधे, पक्ष्मकोपस्त्वेकस्तु पक्ष्मकोपप्रतिषेधे प्रपञ्चेन प्रतीकारक्रमतो निवेदिताः। शेषेषु च सन्धिवर्त्म कृष्णसर्व्वगतत्वेनोपदिष्टाः स्रावचतुष्टयालजीनिमिषवातवर्त्मशोणितार्शोऽक्षिपाकात्ययहताधिमन्थास्तु दशासाध्याः, नातस्तान् प्रतिकिञ्चिद्वक्तव्यमस्ति तदिदानीं पारिशेष्याद् धूमदर्शिव्यतिरिक्तानां साध्यानां

तत्रैकस्य प्रतीकारः कीर्त्तितो धूमदर्शिनः ।
दृष्टौ पित्तविदग्धायां विदग्धायां कफेन च ॥
पित्तश्लेष्महरं कुर्य्याद्विधिं शस्त्रक्षताद्दृते ।
नस्यसेकाञ्जनालेप-पुटपाकैः सतर्पणैः ॥
आद्ये तु त्रैफलं पेयं सर्पिस्त्रैवृतमुत्तरे ।
तैल्वकं चोभयोः पथ्यं केवलं जीर्णमेव वा ॥
गैरिकं सैन्धवं कृष्णा गोदन्तस्य मसी तथा ।
गोमांसं मरिचं बीजं शिरीषस्य मनःशिला ॥
वृन्तं कपित्थान्मधुना स्वयंगुप्ताफलानि च ।
चत्वार एते योगाः स्युरुभयोरञ्जने हिताः ॥ ३ ॥

---

याप्यानाञ्च दृष्टिगतानां रोगाणां प्रतिषेधमधिकरोति अथात इत्यादिना ॥ १ ॥

माकार्षीत् स्मृतिविभ्रमात् साध्ययाप्यप्रत्याख्येयान् विपर्य्यासेनाध्यवस्य यशःप्रभृतीनामपचयमित्यतः प्रागुक्तं स्मारयति त्रय इति । त्रयः पित्तविदग्धदृष्टिः श्लेष्मविदग्धदृष्टिर्धूमदर्शी चेति साध्याः षट् काचा याप्याः । कीर्त्तितः पित्ताभिष्यन्दप्रतिषेध इतिशेषः । शस्त्रक्षताद्दृते शिराव्यधं विना यथादोषं नस्यादिभिः सह पित्तश्लेष्महरं यथाक्रमं पित्ताभिष्यन्दहरं श्लेष्माभिष्यन्दहरञ्चेत्यर्थः । त्रिफलाक्वाथकल्कसिद्धं घृतं त्रैफलं एवमेव त्रैवृतं तैल्वकञ्चावगन्तव्यम् । केचित्तु तैल्वकशब्देनेह "चिं ४ अ" उपदिष्टं तिल्वकघृतमेव ग्राहयन्ति । गैरिकमिति । योगोक्तेष्वेषु श्लोकसमापनावाप्या-

कुब्जकाशोकशालाम्र-प्रियङ्गुनलिनोत्पलैः ।
पुष्पैर्हरेणुकृष्णाह्वा-पथ्यामलकसंयुतैः ॥
सर्पिर्मधुयुतैश्चूर्णैर्वेणुनाड्यामवस्थितैः ।
अञ्जयेद्द्वावपि भिषक् पित्तश्लेष्मविभावितौ ॥ ४ ॥
आम्रजम्बूद्भवं पुष्पं तद्रसेन हरेणुकाम् ।
पिष्ट्वा क्षौद्राज्यसंयुक्तां प्रयोज्यमथवाञ्जनम् ॥
नलिनोत्पलकिञ्जल्क-गैरिकैर्गोशकृद्रसैः ।
गुडिकाञ्जनमेतद्वा दिनरात्र्यन्धयोर्हितम् ॥ ५ ॥
रसाञ्जनरसक्षौद्र-तालीशस्वर्णगैरिकम् ।
गोशकृद्रससंयुक्तं पित्तोपहतदृष्टये ॥ ६ ॥
शीतं सौवीरकं वापि पिष्ट्वाथ रसभावितम् ।
कूर्म्मपित्तेन मतिमान् भावयेद्रौहितेन वा ॥
चूर्णाञ्जनमिदं नित्यं प्रयोज्यं पित्तशान्तये ॥ ७ ॥

---

वपि मधुनैव प्रयुज्येते। कुब्जकेति। कुब्जको ह्रस्वपुष्पः कण्टकाढ्योऽलिकुल सङ्कुल इति पर्य्याया: "गोलाप" इति परिचीयते। तस्य पुष्पं कुब्जकं पित्तश्लेष्मभ्यां प्राप्तदृष्टिविकारौ पित्तश्लेष्मविभावितौ पित्तश्लेष्मविदग्ध दृष्टिकाविति यावत्। आम्रेति आम्रजम्बूद्भवं पुष्पं तद्रसेनाम्रजम्बूपुष्परसेन पिष्ट्वा अथवा क्षौद्राज्य संयुक्तां हरेणुकां पित्तोभयोरञ्जनं प्रयोज्यम्। रसाञ्जनेति रसशब्देनेह छाग-यकृद्रसमेव प्राहयन्ति साद्गुण्यमभिसमीक्ष्य। पीतवर्णगैरिकं स्वर्णगैरिकम्, पित्तोपहतदृष्टिः पित्तविदग्धदृष्टिः ॥ २—६ ॥

काश्मरीपुष्पमधुक-दार्व्वीरोध्ररसाञ्जनैः।
सक्षौद्रमञ्जनं तद्धितं नेत्रामये सदा ॥ ८ ॥
स्रोतजं सैन्धवं कृष्णां रेणुकाञ्चापि पेषयेत्।
अजमूत्रेण ता वर्त्यः क्षणदान्ध्याञ्जने हिताः ॥
कालानुसारिवां कृष्णां नागरं मधुकं तथा।
तालीशपत्रं क्षणदे गाङ्गेयञ्च शकृद्रसे।
कृतास्ता वर्त्तयः पिष्टाश्छायाशुष्काः सुखावहाः ॥
मनःशिलाभयाव्योषबलाकालानुसारिवाः।
सफेना वर्त्तयः पिष्टाश्छागक्षीरसमन्विताः ॥ ९
गोमूत्रपित्तमदिरा-शकृद्धात्रीरसे पचेत्।
क्षुद्राञ्जनं रसे चान्यत्यकृतस्त्रैफलेऽपि वा ॥

---

शीतमिति। वा शब्देनात्र पक्षान्तरं सूचयाम्बभूव। तथाच शीतं रसाञ्जनं सौवीरकं सौवीराञ्जनं वा पिष्ट्वा चूर्णीकृत्य रसभावितं सप्ताहं छागमांसरसभावितं तत् कूर्म्मपित्तेन रोहितेन पित्तेन वा पुनः सप्ताहं भावयेदित्यायातम्। पित्तशान्तये पित्तोपहतदृष्टिदोषोपशमायेत्यर्थ-निष्कर्षः। काश्मरीति। तद्धितं नेत्रामये पित्तविदग्धदृष्टावित्यर्थः। कालेति। कालानुसारिवा तगरम् क्षणदे हरिद्रे गाङ्गेयं मुस्तकम् शकृद्गोमयम्। सुखावहाः प्रकृतत्वात् क्षणदान्ध्यानामेवेति ज्ञेयम्। मनःशिलेति। वर्त्तयः प्राग्वत् सुखावहा इत्यवगन्तव्यम्। यकृच्छब्देन चेह च्छागयकृदेव ग्राहयन्ति कुशला नितरामौपयौगिकत्वात्। गोमूत्रेति गोमूत्रादीनां चतुर्णां समाहारो गोमूत्र-पित्तमदिरा शकृत् क्षुद्राञ्जनं पचेदिति समन्वयः। इदमत्रावधेयम् गोमूत्रा-

गोमूत्राज्यार्णवमल-पिप्पलीक्षौद्रकट्‌फलम्।
सैन्धवोपहितं युञ्ज्यान्निहितं वेणुगह्वरे ॥ १० ॥
मेदोयकृत्‌घृतञ्चाजं पिप्पल्य: सैन्धवं मधु।
रसमामलकञ्चापि पक्वं सम्यङ्‌निधापयेत् ॥
कोषे खदिरनिर्म्माणे तद्वत् क्षुद्राञ्जनं हितम् ॥११॥
हरेणुमगधाजास्थि-मज्जैलायकृदन्वितम्।
शकृद्रसेनाञ्जनं वा श्लेष्मोपहतदृष्टये ॥ १२ ॥

विपाच्य गोधायकृदर्द्धपाटितं सुपूरितं मागधिकाभिरग्निना।
निषेवितं तत् सकृदञ्जनेन निहन्ति नक्तान्ध्यमसंशयं खलु ॥
तथा यकृच्छागभवं हुताशने विपाच्य सम्यङ्‌मगधासमन्वितम्।
प्रयोजितं पूर्व्ववदाश्वसंशयं जयेत् क्षपान्ध्यं सकृदञ्जनान्नृणाम् ॥

---

दिकं धात्रीरसेऽग्निसंयोगतो विपाच्य क्षुद्रया मात्रयाऽज्यतेइति व्युत्पत्त्या क्षुद्राञ्जनं क्षुद्राञ्जनसमाख्यमञ्जनमभिनिवर्त्तयेत् क्षणदान्ध्यानामञ्जनायेति शेष:। अपि शब्दात् तदेव पुनर्गोमूत्रादिकं यकृतस्त्रैफले वा रसे क्वाथे तथा विपाच्य अन्यदन्यविधं क्षुद्राञ्जनमभिनिवर्त्तयेदित्युक्तं भवति। गोमूत्रेति अर्णवमल: समुद्रफेन: युञ्ज्यात् क्षणदान्ध्यानामञ्जनायेति शेष:। मेद इति अत्र तद्वदिति विशेषणं प्रागुक्तेन क्षुद्राञ्जनेन सर्व्वथा साम्यमाख्यापयति। हरेण्वेति,अत्र अजास्थीति सामान्येनोक्तमपि सव्यस्थमेव तत् जलेन शीलातले घृष्ट्वा आहयन्त्यायुर्व्वेदविद: प्रयोगसौष्ठवमभिसमीक्ष्य ॥ ७—१२ ॥

प्लीहा यकृच्चाप्युपभक्षिते उभे प्रकल्प्य शूल्ये घृततैलसंयुते ।
ते सार्षपस्नेहसमायुतेऽञ्जनं नक्ताध्यमाष्वेव हतः प्रयोजिते ॥
नदीजशिम्बीकटुकान्यथाञ्जनं मनःशिला द्वे च निशे यकृद्रसे ।
सचन्दनेयं गुटिकाथवाञ्जनं प्रशस्यते वै दिवसेष्वपश्यताम्॥ १४॥
भवन्ति याप्याः खलु ये षडामयाहरेदसृक्तेषु शिराविमोक्षणैः ।
विरेचयेच्चापि पुराणसर्पिषा विरेचनाङ्गोपहितेन सर्व्वदा ॥ १५
पयोविमिश्रं पवनोद्भवे हितं वदन्ति पञ्चाङ्गुलतैलमेव तु ।
भवेद्घृतं त्रैफलमेव शोधनं विशेषतः शोणितपित्तरोगयोः ॥ १६
विरेहिरेकः कफजे प्रशस्यते त्रिदोषजे तैलमुशन्ति तत्कृतम् ।
पुराणसर्पिस्तिमिरेषु सर्व्वतो हितं भवेदायसभाजनस्थितम् ॥
हितञ्च विद्यात् त्रिफलाघृतं सदा कृतञ्च यन्मेषविषाणनामभिः

---

विपाच्येति । अग्निना विपाच्य पुटपाकविधिनेति शेषः । अत्रोपसर्ज्जनीभूतां मागधिकामेवोपयुञ्जन्ति भिषजः प्रायेणोदर्कं सौष्ठव मव्याहतमभिसमीक्ष्य एतेनानन्तरोक्त श्लोकोऽपि व्याख्यातः । प्लीहेति । प्लीहा यकृच्च छागी एव नेये । शूल्ये शूलाकृते शूलसंस्कृते इति यावत् । सार्षपस्नेह समायुते उपयोग काले सार्षपस्नेहेन सह पिष्टे इत्यर्थः । युतेऽञ्जन मिति सन्धिरार्षः । नदीति । नदीजं सौवीराञ्जनम्, शिम्बीनामौषधि 'बरवटी' इति विख्यायते । तस्या बीजमत्र ग्राह्यम् । अञ्जनन्तु रसाञ्जनम् । यकृच्छागमेव ग्राहयन्ति कुशलाः प्रायेणास्योपयोगदर्शनात् । अथवाञ्जनं यकृद्रसे समकल्को भावितं सचन्दनमेतच्चूर्णाञ्जनं वेत्यर्थः । षट् काचानधि

सदावलिह्यात् त्रिफलां सुचूर्णितां घृतप्रगाढ़ां तिमिरेऽथ पित्तजे।
समीरजे तैलयुतां कफात्मके मधुप्रगाढ़ां विदधीत युक्तितः॥१८
गवां शकृत्क्वाथविपक्वमुत्तमं हितन्तु तैलं तिमिरेषु नावनम् ।
हितं घृतं केवलमेव पैत्तिके त्वजाविकं यन्मधुरैर्विपाचितम् ॥
तैलं स्थिरादौ मधुरे च यद्गणे तथाणुतैलं पवनासृगुत्थयोः ।
सहाश्वगन्धातिबलावरीशृतं हितञ्च नस्ये त्रिवृतं यदीरितम् ॥
जलोद्भवानूपजमांससंस्कृताद् घृतं विधेयं पयसो यदुत्थितम् ॥१९
ससैन्धवः क्रव्यभुगेणमांसयोर्हितः ससर्पिः समधुः पुटाह्वयः ।
वसाथ गृध्रोरगताम्रचूड़जा सदा प्रशस्ता मधुकान्विताञ्जने ॥२०

---

करोति भवन्तीति। विरेचनाङ्गोपहितेन "सू० ३८ अ०" निवेदिते स्विन्नमूलादिभिः संस्कृतेन। सामान्यं विरेचनमुपदिश्य पुनर्विशेषयति पयइति। पञ्चाङ्गुल एरण्डः। त्रिफलाक्वाथकल्क संसिद्धं त्रैफलम्। अत्रा-नुक्तमपि त्रिवृच्चूर्णमभयाचूर्णं वाष्टमांशं सिद्धशीते प्रक्षिपन्त्याचार्य्याः शोधनमिति विशेषणात्। शोणितपित्तरोगयोरिति रोगोऽत्र प्रकृतत्वात् काचः द्विवचनन्तु धर्म्मद्वारेणोपात्तमिति गम्यते परिम्लायिणोऽपि पित्तज विशेषत्वेनोपलम्भात्। त्रिवृदिति। त्रिफलाक्वाथकल्कसिद्धं घृतं त्रिफला घृतम्। मेषविषाणनामभिः मेषशृङ्गीभिः॥ १३—१८॥

गवामिति। मधुरैः 'सू० ४२ अ०' मधुर वर्गाभिहितै र्द्रव्यैः, स्थिरादौ विदारिगन्धादौ मधुरे गणे मधुरे वर्गे, अणुतैलम् 'चि० ४ अ०' उपदिष्टम्

प्रत्यञ्जनं स्रोतसि यत् समुत्थितं क्रमाद्रसक्षीरघृतेषु भावितम्।
स्थितं दृशाहत्रयमेतदञ्जनं कृष्णोरगास्ये कुशसंप्रवेष्टिते॥
तस्मालतीक्षारकसैन्धवायुतं सदाञ्जनं स्यात्तिमिरेऽथ रागिणि।
सुभावितं वा पयसा दिनत्रयं काचापहं शास्त्रविदः प्रचक्षते।२१
हविर्हितं क्षीरभवन्तु पैत्तिके वदन्ति नस्यं मधुरौषधैः कृतम्।
तत् तर्पणे चैव हितं प्रयोजितं मजाङ्गलस्तेषु च यः पुटाह्वयः।२२
रसाञ्जनक्षौद्रसिता मनःशिला चुद्राञ्जनं तन्मधुकेन संयुतम्।
समाञ्जनं वा कनकाकरोद्भवं सुचूर्णितं श्रेष्ठमुशन्ति तद्विदः॥

---

सहा मुद्गपर्णी वरी शतावरी ईरितं महावातव्याधिचिकित्सिते इति शेषः। जलेत्यादि। विधेयं नस्य इति शेषः। ससैन्धव इति। कव्यभुक् गृध्रादिः, एणः कृष्णवर्णो हरिणभेदः अनयोः पुटाह्वयः क्रियाकल्पे सप्रपञ्चं निवेदयिष्यमाणः पुटपाकः। हितोऽक्षोधारण इत्यवगन्तव्यम्। यथोपदेशं धार्य्यत्वेनास्योपदिदिक्षितत्वात्। वसेति। अथ तानेनेह पद्यान्तरं सुवयाम्बभूवोक्तेन पुटपाकेनास्याञ्जनस्य फलसाम्यं व्याजेनाख्यापयितुम्। उरगशब्देनेह दर्वीकर एव प्रतेयतव्यः प्रकरणेऽस्मिन्तस्यैव प्रयोगदर्शनात॥१९—२०॥

अथ चेदेतेषां वसोपयोगेन क्लेदशोथादयः प्रादुर्भवन्ति तर्हि किं कुर्म्मेत्याह प्रत्यञ्जनमिति। स्रोतसि समुत्थितं सौवीराञ्जनं भावितं सप्ताहमित्येव नेयम् "सप्ताहं भावनाविधिः" इति हि स्मृतिः। रक्तादिवसोपयोगोपद्रवप्रतिकूलत्वात्

भिल्लोटगन्धोदकसेकसेवितं प्रत्यञ्जनञ्चात्र हितन्तु तुत्थकम्।
समेषशृङ्गाञ्जनभागसम्मितं जलोद्भवं काचमलं व्यपोहति॥
पलाशरोहीतमधुकजा रसाः क्षौद्रेण युक्ता मदिराग्रमिश्रिताः॥२३
उशीरलोध्रत्रिफलाप्रियङ्गुभिः पचेत् तु नस्यं कफरोगशान्तये।
विड़ङ्गपाठाकिणिहीङ्गुदीत्वचः प्रयोजयेद्धूममुशीरसंयुतम्॥

प्रत्यञ्जनमिदमुच्यत इत्येवशेषम्। क्रमात् रसश्छागमांसरसः। रसादिभिस्त्रिभिर्भावितमेतदेवाञ्जनं कुशसंप्रवेष्टिते कृष्णोरगास्ये मासं संस्थाप्य मनाक् मालतीक्षारसैन्धवाभ्यां सह रागिणि तिमिरे ऽञ्जयितुमिदमुच्यते क्षितमिति अल्पः क्षारः क्षारकः। अञ्जनानन्तरमाह सुभावितमिति। अत्र वा शब्देन प्रकृतत्वात् स्रोतसि समुत्थितमित्याकृष्यान्वीयते। वातरक्तजकाचवत् पैत्तिकादावपि नस्यादिकमभिधत्ते हविरिति। मधुरौषधानि सू ४२ अं उक्तानि काकोल्यादि प्रभृतीनि। तेषु मधुरौषधेषु। यः स्नेहनः पुटाश्रयः पुटपाक इति तात्पर्य्यम्, मधुरौषधमांसवसामज्जकृतस्य स्नेहनत्वेन विवक्षितत्वात्। समाञ्जनं तुल्यरसाञ्जनं कनकाकरोद्भवं सौवीराञ्जनम्। भिल्लो लोध्रस्तस्योटं पर्णं गन्धा श्वेतचन्दनं तदुभयोदकसेचनेनाहितशीत-वीर्य्यतया पैत्तिके काचे पूजितं भिल्लोटगन्धोदकसेकसेवितम्। सेति। इत्यादि श्वेतमुरभ्रशृङ्गं तेन सहेति समेषशृङ्गम् अञ्जनं रसाञ्जनम्, तद्द्वितयभागेन तुल्यं समेषशृङ्गाञ्जनभागसम्मितं जलोद्भवं यमुनास्रोतसि जातः कुलत्थाकारः प्रस्तर विशेषः सौवीराञ्जनमित्येतत्। काचमलं काचमूलं पित्तम् काचम् अत्र व्यपोहतिवेतिशेषम्। आश्चोतनमुपादिदिक्षति पलाशेति। रोहीतो रोहितकः 'पीतराज' इत्याख्यायते। अत्राविशेषेऽपि एतेषां मुख्यरसा एव मतास्ते मदिराग्रं मदिरामस्तु॥२—२३॥

वनस्पतिक्वाथविपाचितं घृतं हितं हरिद्रानलदेऽथ तर्पणे ।
समागधो माक्षिकसैन्धवाढ्यः सजाङ्गलः स्यात् पुटपाक एव च ॥
मनःशिलाचूर्षणशङ्खमाक्षिकैः ससिन्धुकासीसरसाञ्जनैः क्रियाः।
हिते च कासीसरसाञ्जने तथा वदन्ति पथ्ये गुड़नागरैर्युते ॥
यदञ्जनं वा बहुशो निषेचितं सुमूत्रवर्गे त्रिफलोदके सृते ।२४॥

श्लैष्मिक तिमिर चिकित्सितमधिकरोति उशीरेति। बाहुल्येन श्लेष्मणि तैलं विहितं तदिहानुक्तमपि तैलमूह्यं भवति न तावद् व्याख्यानमिदं व्याचक्षाणं याहच्छिकभाषित्वेनाक्षिपतीति वाच्यम् वक्ष्यति हि तन्त्रयुक्तौ "यदनिर्दिष्टं बुद्धिमता तदूह्यम्" इति। विड़ङ्गेति धूमं प्रयोजयेत् पानायेति शेषः। वनस्पतीति। वनस्पतयो वटादयः अथेत्ययं पक्षान्तर संसूचनार्थः। अथाथवा हरिद्रानलदे हरिद्रोशीर क्वाथकल्के विपाचितं घृतं तर्पणे हितमित्यर्थः। अत्र अवतर्पणमित्यन्यत्रपरिपठितः पाठः। समागध इति। अत्र शाणार्द्धशाने पिप्पलीसैन्धवे जाङ्गल मांसस्य कर्षद्वितयं विनीय पुटपाकः कार्य्यस्ततस्तद्रसमादाय तुरीयांशेन माक्षिकेन मिश्रीकृत्य प्रयोजयेदित्येवमुपदिशन्ति प्राञ्चः। अञ्जनचतुष्कमुपदिदिक्षति मनःशिलेत्यादिना स्रुत इत्यन्तेन ग्रन्थसन्दर्भेण। क्रियाशब्दस्येह अञ्जने तात्पर्य्यं ब्रूमो मनःशिलादीनां सन्निहित पुटपाक साधन वाह्यत्वात् परमतोऽञ्जनस्यैवोपदेशाच्च। नचैतदश्रद्धेयम्, तन्त्रयुक्तिं प्रकृत्य वक्ष्यति हि स्वयमेव "योऽर्थः पूर्वापरयोगसिद्धोभवति स गृहीतव्यः" इति, बहुवचनन्तु यावदारोग्य दर्शनात् दैनिन्दिनं तदुपयोगमाख्यापयति। हिते अञ्जनेनेत्येव प्रत्येतव्यम्। तथेति समुच्चयार्थ स्तथाच गुड़नागरैर्युते कासीसरसाञ्जने च पथ्ये वदन्ति

निशाचरास्थिस्थितमेतदञ्जनं क्षिपेच्च मासं सलिलेऽस्थिरे पुनः॥ मेषस्य पुष्पैर्मधुकेन संयुतं तदञ्जनं सर्व्वकृते प्रयोजयेत् क्रियाश्च सर्व्वाः॥२५॥ क्षतजोद्भवे हितः क्रमः परिम्लायिनि चापि पित्तहृत् क्रमो हितः स्यन्दहरः प्रयोजितः समीक्ष्य दोषेषु यथास्वमेव च दोषोदयेनैव च विप्लुतिं गते द्रव्याणि नस्यादिषु योजयेद्बुधः। पुनश्च कल्पेऽञ्जनविस्तरः शुभः प्रवक्ष्यतेऽन्यस्तमपोह्य योजयेत्॥२६

---

अञ्जनेनोपयुक्तं सतीदृति शेषः। यदञ्जनं सौवीराञ्जनं ममूत्रवर्गं समधरणघृत-मूत्राष्टक सहिते स्मृते त्रिफलोदके त्रिफलाक्वाथे बहुशः सप्तकृत्वो निषिचितं भावितं तदप्यञ्जनेन पथ्यं वदन्तीति वा शब्देनावगमयतीत्यवगन्तव्यम् ॥२४॥

सम्प्रति परिशिष्टान् सान्निपातिक रक्तज-परिम्लायिसमाख्यान् त्रीन् काचान् प्रकृत्य क्रियाक्रममभिधत्ते निशेति। उलूकादीनां निर्हृत-मज्जनि नलकास्थ्नि स्थापितं निशाचरास्थिस्थितम् एतन्मूत्रवर्गादि सेचितं सौवीराञ्जनं क्षिपेत् लाक्षादिना नलकमुखं पिधायेति शेषः सलिले निक्षे-पोऽयं कोथनार्थमितिगम्यते तत्र स्थिर एव सलिले सम्यक् सम्पद्यते दृश्यते च प्राक् शवादीनां कोथनार्थं स्थिरं जलमेवोपात्तं तस्मादस्थिरे जले इति केनचित् पठितं हेयम्। मेषो मेषशृङ्गी सर्व्वकृते सान्निपातिककाचे। न तावदेतावानेवालं सर्व्वकृतस्योपशमायेत्याह क्रियाश्चेति। सर्व्वा वात-पित्त-कफ काचोक्ताः क्रियाश्च प्रयोजयेदिति पूर्व्वेणान्वयः॥ २५॥

रक्तजे परिम्लायिनिच पित्तकाचचिकित्सितमतिदिशति क्षतजोद्भव इत्यादिना। क्षतजोद्भवे रक्तजे परिम्लायिनिच पित्तहृत् क्रमोहित इति सम्बन्धः। षट्स्वेव काचेषु यथास्वमभिष्यन्दाधिमन्थविधौ अतिदिश्यते क्रम इति। स्यन्दशब्देनैवाधिमन्थस्यापि परिग्रहः क्रियते प्रायः समान

घृतं पुराणं त्रिफलां शतावरीं पटोलमुद्गामलकं यवानपि।
निषेवमाणस्य नरस्य यत्नतो भयं सुघोरात् तिमिरान्न विद्यते॥
शतावरीपायस एव केवलस्तथा कृतो वामलकेषु पायसः।
प्रभूतसर्पिस्त्रिफलोदकोत्तरो यवौदनो वा तिमिरं व्यपोहति।
जीवन्तिशाकं सुनिषण्णकञ्च सतण्डुलीयं वरवास्तुकञ्च।
चिल्ली तथा मूलकपोतिका च दृष्टेर्हितं शाकुनजाङ्गलञ्च॥
पटोलकर्कोटककारवेल्लवार्त्ताकुतर्कारिकरीरजानि।
शाकानि शिग्र्वार्त्तगलानि चैव हितानि दृष्टेर्घृतसाधितानि॥२६

त्रिवर्ज्येष्विक्रियामोक्षं तिमिरे रागमागते।
यन्त्रेणोत्पीडितो दोषो निहन्यादाशु दर्शनम्॥ २१॥
अरागि तिमिरं साध्यमाद्यं पटलमाश्रितम्।
कृच्छ्रं द्वितीये रागि स्यात् तृतीये याप्यमुच्यते॥
रागप्राप्तेष्वपि हितास्तिमिरेषु तथा क्रियाः॥

---

क्रियत्वात्। स्यन्दहरोऽभिष्यन्दाधिमन्थहरः क्रमो विधिर्यथास्वं यथादोषमेव। दोषेऽपीति दोषा अपि रोगशब्दं लभन्त इति स्मरणात् काचसमाख्येषु रोगेषु समीक्ष्य प्रयोजितः सन् हितो भवतीति शेषः। अथ चेत् काचे जाते दृष्टिमण्डलविस्तृतिप्रभृतयस्ते उपद्रवाः प्रादुर्भवन्ति तर्हि का गतिरित्याह दोषेति। दोषोदयेन दोषाभिवृद्ध्या विप्लुतिं दृष्टिमण्डलविस्तृतिप्रभृतिभिः सोपद्रवतां गते द्रव्याणि विस्तृतिप्रभृतिहरत्वेन योग्यानि क्षीरघृतादीनि नस्यादिषु नस्याश्च्योतनाभ्यञ्जनादिषु योजयेत्। घृतक्षीरादीनां योग्यत्वन्तु विशेषेण वातादिहरत्वेनोन्नेयम्। विस्तृतिप्रभृतयो हि कफ-

यापनार्थं यथोद्दिष्टाः सेव्याश्चापि जलौकसः ॥ २८ ॥

श्लैष्मिके लिङ्गनाशे तु कर्म्म वक्ष्यामि सिद्धये ।
नचेद्दर्पणेन्दुघर्म्माम्बु-बिन्दुमुक्ताकृतिः स्थिरः ॥
विषमो वा तनुर्मध्ये राजिमान् वा बहुप्रभः ।
दृष्टिस्थो लक्ष्यते दोषः सरुजो वा सलोहितः ॥

---

शिरावलयादिषु वातादिकृतसङ्कोचादित एव प्रादुर्भवन्ति । पुनरिति ।कल्पे वक्ष्यमाणे क्रियाकल्पाध्याये ॥ २६—२८ ॥

लिङ्गनाशेषु मध्ये श्लैष्मिको लिङ्गनाशो हि सुभिषग्भि रुपक्रान्तो याप्यता मुपैतीति तं प्रति प्रतीकारक्रममुपदेष्टुं प्रतिजानीते श्लैष्मिक इति । सिद्धये यापनाय इति तात्पर्य्यम् । आमनन्ति हि "असाध्यान्नोपक्रमेत्" इति तदेतान् व्यावर्त्तयन् प्रकृतं प्रवर्त्तयति नचेदिति । दृष्टिस्थो दोष आतुरस्य दोषदुष्टं दृष्टिमण्डलस्थेनैवं लक्ष्यते तर्हि स्निग्धस्विन्नस्येत्यादिना परेणान्वयः । श्रमादितः शरीरात् स्यन्नं जलं घर्म्मः । घर्म्माम्बुनो जल-त्वेनाविशेषेऽपि वर्णतो मनाक् विशेषात् द्वयोरेवोपदेशः क्रियते । विषमो न समं संहतत्वात् नतोन्नत इवावभातः । विषमत्वेनैव मध्ये तनो रुप-लब्धोऽपि पृथगुपादानं प्रपञ्चार्थम् । स्थिरो बलवदभिमन्थादितः कृष्णशिरा-वलयादिनिबद्धत्वेन रविकिरणसम्पर्केऽपि सङ्कोचविकाशरहितो वक्ष्यमाण-विस्रावितेन धूस्तूरद्रवाद्याश्च्योतनेनाऽपि विकाशयितुमशक्यश्च । एवमेवेन्दु घर्म्माम्बुबिन्दुमुक्ताकृतिर्विषमो मध्येतनुश्च विषोऽसम्यक् संहतत्वादन्तर्यातेन श्लेष्मणा प्रपूरयति दृष्टिविवरमेकान्तेन, स्थिरः कृष्णशिरादिष्ववबद्धश्चावाप-सर्पति क्वचिदपि बन्धनं विहाय, शेषास्तु शोणितमाश्रयन्तोऽभिमन्थ मापादयन्ति दृष्टिं समूलघातमुपघ्नन्तुम्, तदिदं साध्यतमुक्तं नचेदित्यव-

स्निग्धस्विन्नस्य तस्याथ काले नात्युष्णशीतले ।
यन्त्रितस्योपविष्टस्य स्वां नासां पश्यतः समम् ॥
मतिमान् शुक्लभागौ द्वौ कृष्णान्मुक्त्वा त्वपाङ्गतः ।
उन्मील्य नयने सम्यक् शिराजालविवर्ज्जिते ॥
नाधो नोर्द्धं न पार्श्वाभ्यां छिद्रे दैवकृते ततः ।
शलाकया प्रयत्नेन विश्वस्तं यववक्त्रया ॥
मध्यप्रदेशिन्यङ्गुष्ठ-स्थिरहस्तगृहीतया ।
दक्षिणेन भिषक् सव्यं विध्येत् सव्येन चेतरत् ॥ २९ ॥
वारिविन्द्वागमः सम्यग् भवेच्छब्दस्तथा व्यधे ॥ ३० ॥

धेयम् । यन्त्रितस्य नेत्रावच्छेदे वर्त्मग्राहिणा यन्त्रेण संयतस्य उपविष्टस्ये त्युपपूर्व्वो विशिः शयने प्रवर्त्तते इति गम्यते, पश्यामो हि प्राञ्चोऽपि शयानस्यैव कर्म्मेदं सम्पादयितुमुत्सहन्ते । स्वां नासां समं पश्यत इति कृष्णमण्डलं मध्ये स्थापयितुम् । मतीत्यादौ च शब्दस्थानाधिष्ठानोऽयं हि शब्दः, अपाङ्गतश्च द्वौ भागावित्यर्थः । "कृष्णादर्द्धाङ्गुलं मुक्त्वा तदर्द्धार्द्धमपाङ्गतः" इति केषाञ्चिन्मतन्तु नातिपेशलम् वक्ष्यति हि 'अपाङ्गासन्नविद्धे तु शोफशूलाश्रुरक्तताः" इति । नयने उन्मील्य सम्यङ्निरीक्ष्येति तात्पर्य्यम् । शिराजालविवर्ज्जिते इति तु शोणितप्रवृत्तिभयात्, एतच्च परमतो व्यक्तीभविष्यति, जालं समूह इति तु पर्य्यायौ जालसाम्याद्वा जालशब्दः नाधो नातिगम्भीरं नोर्द्धं नात्युन्नतञ्चेति वक्ष्यमाणदोषशङ्कानिरासार्थम् । पार्श्वाभ्यां पार्श्वतो दैवकृते छिद्रे तिर्य्यग् भावेन दृष्टि विवरावच्छेदे विश्वस्तं जातविश्वासं निःशङ्कत्वेनाचञ्चलतारकमित्येतत् । सव्यं नेत्रं दक्षिणेन हस्तेन इतरद्दक्षिणञ्च सव्येन उक्तलक्षणया शलाकया प्रयत्नेन कार्य्यानुकूलेन यत्नभेदेनोपलक्षितो भिषक् विध्येदित्येवं व्याख्येयम् ॥ २९—३० ॥

संसिच्य विद्धमात्रन्तु योषित्स्तन्येन कोविदः।
स्थिरे दोषे चले वापि स्वेदयेदक्षि वाह्यतः॥
सम्यक् शलाकां संस्थाप्य भङ्गैरनिलनाशनैः।
शलाकाग्रेण तु ततो निर्लिखेद्दृष्टिमण्डलम्॥
विद्धतो योऽन्यपार्श्वेऽस्यास्तं रुद्ध्वा नासिकापुटम्।
उच्छिङ्घनेन हर्त्तव्यो दृष्टिमण्डलजः कफः॥
निरभ्र इव घर्म्मांशुर्यदा दृष्टिः प्रकाशते।
तदासौ लिखिता सम्यक् ज्ञेया या चापि निर्व्यथा।
ततो दृष्टेषु रूपेषु शलाकामाहरेच्छनैः॥ ३१॥
घृतेनाभ्यज्य नयनं वस्त्रपट्टेन वेष्टयेत्।
ततो गृहे निराबाधे शयीतोत्तान एव च॥

---

व्यधनादनन्तरं किं कुर्य्यादित्याह संसिच्येति। स्थिरे एकांशेनावबद्धतया अचले, चले वा शस्त्रात् शलाकाग्रेण चालयितुमुद्यमे कृते अपरांशेनैतस्ततः सञ्चारिण्येव दोषे दोषदुष्टे दृष्टिमण्डलेच शलाकां वाह्यतः संस्थाप्य वहिष्कृत्य अपेरनुक्तसमुच्चयार्थत्वात् तात्पर्य्याद्वा यन्त्रमपि मुक्त्वा अनिलनाशनैर्भङ्गैः रचनाविशेषेण विन्यस्तैरेरण्ड पत्रादिभि रक्षि स्वेदयेत्। ततः शलाकाग्रेण निर्लिखेत् अन्यथातु स्तन्यसेचनानन्तरमेव निर्लिखेदित्यर्थोऽपि भवति। एव मपिचेत् दृष्टिमण्डलजः कफो न सम्यगपास्तो तर्हि का गतिरित्याह विद्धत इति। विद्धतः कृतवेधनस्याक्ष्णोऽन्यपार्श्वे यो नासिकापुटस्तं नासिकापुटं रुद्ध्वा उच्छिङ्घनेन "शिघि आघ्राणे" इति धात्वर्थस्मरणाद् ऊर्द्ध्वाघ्रामाणनेन हर्त्तव्योऽपसार्य्यः। अत्र विद्धतोऽक्ष्ण इति एकवचन निर्दे-

उद्गारकासक्षवथुष्ठीवनोज्जृम्भणानि च ।
तत्कालं नाचरेदूर्द्ध्वं विधिः स्नेहपीतवत् ॥
त्र्यहात् त्र्यहाच्च धावेत कषायैरनिलापहैः ।
वायोर्भयात् त्र्यहादूर्द्ध्वं स्वेदयेदक्षि पूर्व्ववत् ॥
दशाहमेवं संयम्य हितं दृष्टिप्रसादनम् ।
पश्चात् कर्म्म च सेवेत लघ्वन्नञ्चापि मात्रया ॥ ३२ ॥
शिराव्यधविधौ पूर्व्वं नरा येऽत्र विवर्ज्जिताः ।
न तेषां नीलिकां विध्येदन्यत्राभिहिताद्भिषक् ॥ ३३ ॥
पूर्य्यते शोणितेनाक्षि शिरावेधादिसर्पता ।
तत्र स्त्रीस्तन्ययष्ट्याह्वपक्वं सेके हितं घृतम् ॥
अपाङ्गासन्नविद्धे तु शोफशूलाश्रुरक्तताः ।
तत्रोपनाहं भ्रूमध्ये कुर्य्याच्चोष्णाज्यसेचनम् ॥

---

शेषोभयोरक्ष्णोर्युगपद्व्यधनं विप्रतिषिद्धमित्यलं व्याजेन भगवान् सूचयाम्बभूव । अत्र "विध्यतो योऽन्य पार्श्वेऽक्ष्णः" इत्यसमञ्जसः पाठस्तु वैयाकरणबन्धुभिरेवासंशयं पठ्यते । त्र्यहादिति । व्यधविधाविवेति पूर्व्ववत् अनिलनाशनैः पत्रभङ्गैरिति तात्पर्य्यम् । पश्चात्कर्म्मापोपहरणीयोक्तं रक्षाकर्म्म ॥ ३१—३२ ॥

शिरेति ये बालस्थविरादयः नीलिकां "सत्यामपि तमोभूते" इत्याद्यतिकाललाविलक्षणात् चन्द्रादीनभिवीक्षतोजातबलं श्लैष्मिकं लिङ्गनाशमित्यर्थः । अनागता येऽत्रातुरा आलोकान्धकारं समं पश्यन्ति तेषामपि नीलिकां न विध्ये दित्यायातम् । अभिहितात् कृष्णापाङ्गयोरन्तरालादन्यत्राऽपि न विध्येदित्येव

व्यधेनासन्नकृष्णेन भागः कृष्णश्च पीड्यते ।
ततोऽधःशोधनं सेकः सर्पिषा रक्तमोक्षणम् ॥
अथाप्युपरि विद्धे तु कष्टा रुक् संप्रवर्त्तते ।
तत्र कोष्णेन हविषा परिषेकः प्रशस्यते ॥
शूलाश्रुरागास्त्वत्यर्थमधोविद्धे भवन्ति हि ।
विदधीत भिषग्धीमांस्तत्र पूर्व्वचिकित्सितम् ॥
रागाश्रुवेदनास्तम्भहर्षाश्चातिविघट्टिते ।
स्नेहस्वेदौ हितौ तत्र हितं वाप्यनुवासनम् ॥
दोषस्तथोपक्लिष्टोऽपि तरुणः पुनरुद्गतः ।
कुर्य्याच्छुक्रारुणं तत्तु तीव्ररुङ्नष्टदर्शनम् ॥
मधुरैस्तत्र सिद्धेन घृतेनाक्ष्णः प्रसेचनम् ।
शिरोवस्तिञ्च तेनैव दद्यान्मांसैश्च भोजनम् ॥ ३४ ॥
दोषस्तु सञ्जातबलो घनः सम्पूर्णमण्डलः ।
प्राप्य नश्येच्छलाकाग्रं तन्वभ्रमिव मारुतम् ॥

---

चकारमाकृष्य व्याख्येयम् । अभिहितादन्यत्र व्यधे सप्रतीकारं दोषं दर्शयन्नात्ययिकत्वात् प्रथमन्तावत् शिरावेध मधिकरोति पूर्व्वत इति । उपनाहं परमतः "गैरिकं शारिवा" इत्यादिना निर्द्दिदिक्षितं लेपजातम् । व्यधेनेति । चकारादितरोऽपीति नियम् । पीड्यते कृष्णशिरावलयाभिघातेनाधिमन्थोत्पत्तेरित्याकूतम् । कष्टारुक् प्राग्वदधिमन्थमूला एवेति बोध्यम् । शूलेत्यादि । अत्र तु कारेण भेदःस्तुतेरादेशः क्रियते पूर्व्वचिकित्सितमधःशोधनादिकम् । रागेति । वा शब्दात् पूर्व्व चिकित्सितमपीत्यर्थः । मधुरैः 'सु० ४२अ

मूर्द्धाभिघातव्यायाम-व्यवायवमिमूर्च्छनैः।
दोषः प्रत्येति कोपाच्च विद्धोऽतितरुणश्च यः॥ ३५॥
शलाका कर्कशा शूलं खरा दोषपरिस्रुतिम्।
व्रणं विशालं स्थूलाग्रा तीक्ष्णा हिंस्यादनेकधा॥ ३६॥
जलास्रावन्तु विषमा क्रियासङ्गमथास्थिरा।
करोति वर्ज्जिता दोषैस्तस्मादेभिर्हिता भवेत्॥ ३७॥
अष्टाङ्गुलायता मध्ये सूत्रेण परिवेष्टिता।
अङ्गुष्ठपर्व्वसमिता वक्त्रयोर्मुकुलाकृतिः।
ताम्रायसी शातकौम्भी शलाका स्यादनिन्दिता॥ ३८॥
रागः शोफोऽर्व्वुदश्चोषो वुद्वुदं शूकराक्षिता।
अधिमन्थादयश्चान्ये रोगाः स्युर्व्यधदोषजाः।
अहिताचारतो वापि यथास्वं तानुपाचरेत्॥ ३९॥

उक्तैः काकोल्यादिप्रभृतिभिः। क्रियासङ्गं दृष्ट्युपरोधम्। एवं व्यधविधावुपदिष्टे सत्यपि वयन्तु कृष्णमण्डलस्याधस्तात् सार्द्धभागद्वयं हित्वा ऊर्द्ध्वधारेण तीक्ष्णाग्रेण तीक्ष्णेन व्रीहिपत्रेण कृष्णशिरावलयमहिंसन्तः कृष्णमण्डलस्य प्रान्तात् प्रान्तं यावद् विध्येम विद्धा चार्द्धतिलमात्रेण शुक्लकृष्णगतं सन्धिं विहायावशिष्टमूर्द्धवर्त्तिकृष्णमण्डलमर्द्धचन्द्राकारं छित्वा सन्दंशेन तिलमात्रं छिन्नप्रदेशमध्यवर्त्ति नेदिष्ठं कृष्णशिरावलयमाकृष्य कर्त्तर्य्या कृन्तेम। ततो यन्त्रमपनीय सव्यहस्ततर्ज्जन्या सन्धेस्तस्योर्द्ध्वं शनैः शनैः प्रपीड्य शलाकया चाधस्तात्तथैवोर्द्ध्वं प्रणुद्य दुष्टं तत् दृष्टिमण्डलं निर्हरामः साधिष्ठमुदर्कमभिसमीक्ष्य, निर्हृते च दृष्टिमण्डले वन्धनादिकं सर्व्वं समानमुक्तेनेति॥ ३२—३९॥

रुजायामक्षिरोगे वा योगान् भूयो निबोध मे।
गैरिकं सारिवा दूर्व्वा यवपिष्टं घृतं पयः।
सुखालेपः प्रयोज्योऽयं वेदनारागशान्तये॥
मृदुभृष्टैस्तिलैर्वापि सिद्धार्थकसमायुतैः।
मातुलुङ्गरसोपेतैः सुखालेपस्तदर्थकृत्॥
पयस्यासारिवापत्र-मञ्जिष्ठामधुकैरपि।
अजाक्षीरान्वितैर्लेपः सुखोष्णः पथ्य उच्यते॥
दारुपद्मकशुण्ठीभिरेवमेव कृतोऽपि वा॥
द्राक्षामधुककुष्ठैर्वा तद्वत् सैन्धवसंयुतैः।
ससैन्धवैः शृतं क्षीरं रुजारागनिवर्हणम्॥
शतावरीपृथक्पर्णी-मुस्तामलकपद्मकैः।
साजक्षीरैः शृतं सर्पिर्दाहशूलनिवर्हणम्॥
वातघ्नसिद्धे पयसि सिद्धं सर्पिश्चतुर्गुणे।
काकोल्यादिप्रतीवापं तद्युञ्ज्यात् सर्व्वकर्म्मसु॥ ४०॥
शाम्यत्येवं नचेच्छूलं स्निग्धस्विन्नस्य मोक्षयेत्।
ततः शिरां दहेद्वापि मतिमान् कीर्त्तितं यथा॥ ४१॥
हृष्टेरतः प्रसादार्थमञ्जने शृणु मे शुभे॥ ४२॥
मेषशृङ्गस्य पुष्पाणि शिरीषधवयोरपि।
सुमनायाश्च पुष्पाणि मुक्ता वैदूर्य्यमेव च॥
अजाक्षीरेण सम्पिष्य ताम्रे सप्ताहमावपेत्।

प्रविधाय च तद्वर्त्तीर्योजयेच्चाञ्जने भिषक् ॥
स्रोतोजं विद्रुमं फेनं सागरस्य मनःशिलाम्।
मरिचानि च तद्वर्त्तीः कारयेच्चापि पूर्व्ववत्।
दृष्टिस्थैर्य्यार्थमेतत् तु विदध्यादञ्जने हितम् ॥ ४३ ॥
भूयो वक्ष्यामि मुख्यानि विस्तरेणाञ्जनानि च।
कल्पे नानाप्रकाराणि तान्यपीह प्रयोजयेत् ॥ ४४ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे दृष्टिगतरोगप्रतिषेधो नाम सप्तदशोऽध्यायः ॥ १६ ॥

---

# अष्टादशोऽध्यायः।

अथातः क्रियाकल्पं व्याख्यास्यामः ॥ १ ॥

---

कृतायामिति। अतिरोहितार्थ मेतत् ॥ ४०—४४ ॥

इति श्रीहाराणचन्द्र चक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे दृष्टिगतरोगप्रतिषेधोनाम सप्तदशोऽध्यायः ॥ १७ ॥

---

नहि तावन्नाममात्रेणोपदिष्टानि तर्पणादीनि भिषजः सहस्रमपि सम्यगुपधारयितुमुपदेष्टुं वा शिष्येभ्यः प्रभवन्तीति प्रपञ्चेन तानि व्याहर्त्तुं क्रियाकल्पं नामाधिकरोति अथात इत्यादिना। तर्पणादीनां विस्तरेणोपदेशकोग्रन्थः क्रियाकल्पः ॥ १ ॥

सर्व्वशास्त्रार्थतत्त्वज्ञस्तपोदृष्टिरुदारधीः ।
वैश्वामित्रं शशासाथ शिष्यं काशिपतिर्मुनिः ॥ २ ॥
तर्पणं पुटपाकश्च सेक आश्चोतनाञ्जने ।
तत्र तत्रोपदिष्टानि तेषां व्यासं निबोध मे ॥ ३ ॥
संशुद्धदेहशिरसो जीर्णान्नस्य शुभे दिने ।
पूर्व्वाह्णे चापराह्णे वा कार्य्यमक्ष्णोस्तु तर्पणम् ॥
वातातपरजोहीने वेश्मन्युत्तानशायिनः ।
आधारौ माषचूर्णेन क्लिन्नेन परिमण्डलौ ॥
समौ दृढावसम्बाधौ कर्त्तव्यौ नेत्रकोशयोः ।
पूरयेद्घृतमण्डस्य विलीनस्य सुखोदकैः ॥
आ पक्ष्माग्रात् ततः स्थाप्यं पञ्च तद्वाक्‌शतानि च ।
स्वस्थे कफे षट् पित्तेऽष्टौ दश वाते तदुत्तमम् ॥
रोगस्थानविशेषेण केचित् कालं प्रचक्षते ।
यथाक्रमोपदिष्टेषु चैकैकं पञ्च सप्त च ॥
दश दृष्ट्यामथाष्टौ च वाक्‌शतानि विभावयेत् ।
ततश्चापाङ्गतः स्नेहं स्रावयित्वाक्षि शोधयेत् ॥

---

सर्व्वेति । आधारावालवाले "आधारबन्धप्रमुखैः" इति रघुः । अत्र तु तत्साम्यात् स्नेहरोधनार्थं बन्धनहितये आधारव्यपदेशः क्रियते काकपक्षसाम्यात् बालानां मस्तकपार्श्वद्वयस्थे केशरचनाभेदे काकपक्ष-व्यपदेशवत् । असम्बाधौ नेत्रान्तःप्रवेशित्वादिदोषविरहितौ । मण्ड

स्विन्नेन यवपिष्टेन स्नेहवीर्य्येरितं ततः ।
यथास्वं धूमपानेन कफमस्य विशोधयेत् ॥
एकाहं वा त्र्यहं वापि पञ्चाहञ्चेष्यते परम् ॥ ४ ॥
तर्पणे तृप्तिलिङ्गानि नेत्रस्येमानि लक्षयेत् ।
सुखस्वप्नावबोधत्वं वैशद्यं वर्णपाटवम् ।
निर्वृतिर्व्याधिविध्वंसः क्रियालाघवमेव च ॥
गुर्व्वाविलमतिस्निग्धमश्रुकण्डूपदेहवत् ।
ज्ञेयं दोषसमुत्क्लिष्टं नेत्रमत्यर्थतर्पितम् ॥
रूक्षमाविलमस्राढ्यमसहं रूपदर्शने ।
व्याधिवृद्धिश्च तज्ज्ञेयं हीनतर्पितमक्षि च ॥

---

उपरितनोभागः घृतमण्डस्येति करणे षष्ठी। मतान्तरमाह रोगेति। अमुमेवार्थं स्फोरयति यथेति। यथाक्रमोपदिष्टेषु तर्पणाहेत्वात् वर्त्मशुक्लकृष्णसर्व्वदृष्टि संज्ञकेषु रोगस्थानेष्वित्यर्थः। तोष्वेकं पञ्चसप्त दश च वाक् शतानि विभावयेत् वासयेत् स्थापयेदिति यावत्। दृष्ट्यामष्टौ चेत्यथशब्दः पक्षान्तरमाशंसति, तथाच दृष्ट्यामष्टौ वा वाक्शतानि विभावयेदित्यर्थनिष्कर्षः। वाक्शतानीति वाङ्मात्रा लघ्वक्षरोच्चारणमात्रः काल इत्यमर्थान्तरम्, यवपिष्टेन यवचूर्णेन स्नेहवीर्य्येरितं तर्पणस्नेहशक्त्या-ऽयातम् कफमिति सम्बन्धः। अत्र यथास्वमितिविशेषणेन धूमेषु वैरेचनं प्रायोगिकञ्च लक्षयति कफप्रत्यनीकत्वादित्यवधेयम् ॥ २ - ४ ॥

तर्पणइति। वैशद्यंनिर्म्मलत्वम्, वर्णपाटवं वर्णतोऽनातुर्य्यम् "अपाटवाद्यरोगार्थाः" इति स्मृतिश्च। निर्वृतिः स्वास्थ्येनावस्थितिः "निर्वृतिः

अनयोर्दोषबाहुल्यात् प्रयतेत चिकित्सिते ।
धूमनस्याञ्जनैः सेकै रूक्षैः स्निग्धैश्च योगवित् ॥
ताम्यत्यतिविशुष्कञ्च यद्रूक्षञ्चातिदारुणम् ।
शीर्णपक्ष्माविलं जिह्मं रोगक्लिष्टञ्च यद्भृशम् ।
तदक्षि तर्पणादेव लभेतोर्ज्जामसंशयम् ॥
दुर्दिनात्युष्णशीतेषु चिन्तायां सम्भ्रमेषु च ।
अशान्तोपद्रवे चाक्ष्णि तर्पणं न प्रशस्यते ॥
पुटपाकस्तथैतेषु नस्यं येषु च गर्हितम् ।
तर्पणार्हा न ये प्रोक्ताः स्नेहपानाक्षमाश्च ये ॥ ५ ॥
ततः प्रशान्तदोषेषु पुटपाकक्षमेषु च ।
पुटपाकः प्रयोक्तव्यो नेत्रेषु भिषजा भवेत् ॥
स्नेहनो लेखनीयश्च रोपणीयश्च स त्रिधा ॥

---

स्थितौ" इति मेदिनी । व्याधिविध्वंस स्तत्तद्व्याधिलिङ्गोपरमः, क्रिया लाघवम् उन्मेषनिमेषयोर्लघुभावः । रूक्षमिति यदक्षि एवं लिङ्गं तद्धीनतर्पितं ज्ञेयम् । अनयोरिति । रूक्षैःस्निग्धैश्चेति यथाक्रममतिहीनतर्पितविषयमित्यनुसन्धेयम् । उपयोगसौकर्य्यार्थं कर्म्मणस्तर्पणं निवेदयति ताम्यतीति । ताम्यति तमोदर्शित्वेन खिद्यति दारुणं कर्कशम्, जिह्मं सिरादिसङ्कोचेन कुटिलम्, ऊर्ज्जा बलं प्रकृतिभावमिति तात्पर्य्यम् । दुर्द्दिनेति । दुर्द्दिनं मेघाच्छन्नं दिनम् । सम्भ्रमः साध्वसं भयमित्यनर्थान्तरम् । अशान्तोपद्रवे सामदोषजनितसंरम्भाद्यनुवृत्ते । पुटेति । एतेषु दुर्द्दिनादिषु येषुच भुक्तवदादिषु नस्यं गर्हितमुपदिष्टम् चि० ४० अ० "नस्येनपरिहर्त्तव्यः"

हितः स्निग्धोऽतिरूक्षस्य स्निग्धस्यापि च लेखनः ।
दृष्टेर्बलार्थमितरः पित्तासृग्व्रणवातनुत् ॥ ६ ॥
स्नेहमांसवसामज्ज-मेदःस्वाद्वौषधैः कृतः ।
स्नेहनः पुटपाकस्तु धार्य्यो द्वे वाक्शते तु सः ॥
जाङ्गलानां यकृन्मांसैर्लेखनद्रव्यसंभृतैः ।
कृष्णलोहरजस्ताम्र-शङ्खविद्रुमसिन्धुजैः ॥
समुद्रफेनकासीस-स्रोतोजदधिमस्तुभिः ।
लेखनो वाक्शतं तस्य परं धारणमुच्यते ॥
स्तन्यजाङ्गलमध्वाज्य-तिक्तद्रव्यविपाचितः ।
लेखनात् त्रिगुणं धार्य्यः पुटपाकस्तु रोपणः ॥ ७ ॥

---

इत्यादिना ग्रन्थसन्दर्भेण तर्पणार्हा न ये प्रोक्ताः येषु तर्पणं न विहित-मित्यर्थः । स्नेहपानात्तमा "चि० ३१ अ०" स्नेहपानेन विनाकृता देवाजीर्णि-प्रभृतयस्तेषु पुटपाकस्तथा न प्रशस्यत इत्यर्थः । ततस्तस्मात् प्रशान्तदोषेषु प्रशान्तामलिङ्गेषु पुटपाकक्षमेषु प्रतिषिद्धेतरत्वेन पुटपाकार्हेष्वित्यर्थः । अत्र पुटपाकक्षमेष्वित्यनेनैव प्रशान्तदोषाणामप्युपलम्भेऽपि पृथगाख्यानं क्वचिदप्य-प्रशान्तदोषेषु न प्रयोक्तव्यइत्याख्यापनार्थं मित्यवधेयम् । स्नेहेत्यादि । स्नेहो-ऽत्र घृतमखण्डएव प्रत्येतव्यस्तर्पणसाहचर्य्यात्, मांसन्तु जाङ्गलमित्यायुर्वेद-विदोवदन्ति प्रकरणेऽस्मिन् तस्यैवोपयोगदर्शनात् । स्वाद्वौषधैः "सू० ४२ अ०" उक्तैः काकोल्यादिप्रभृतिभिः । धार्य्य आपक्ष्मायादित्येवावगन्तव्यं तर्पणे तथैवोपदेशात् । जाङ्गलानामिति । लेखनद्रव्यसम्भृतैः व्योषादि लेखन-द्रव्यभावितत्वेनाहितवीर्य्यतया परिपुष्टैः कृष्णलोहरजः प्रभृतिभि र्द्रव्यैश्च कृतइति पूर्व्वेणान्वयः । त्रिगुणं वाक्शतत्रयं ॥ ५—७ ॥

वितरेत् तर्पणोक्तन्तु धूमं पीत्वा तु रोपणम् ।
स्नेहस्वेदौ द्वयोः कार्य्यौ कार्य्यौ नैव च रोपणे ॥ ८ ॥
एकाहं वा द्व्यहं वापि त्र्यहं वाप्यवचारणम् ।
यन्त्रणात्तु क्रियाकालाद् द्विगुणं कालमिष्यते ॥ ९ ॥
तेजांस्यनिलमाकाशमादर्शं भास्वराणि च ।
नेक्षेत तर्पिते नेत्रे पुटपाककृते तथा ॥

वितरेदिति । तर्पणोक्तं यथादोषं स्निग्धं रूक्षञ्चेत्यर्थः । यन्त्रणा नियमनम्, क्रियाकालात् "एकाहं वा त्र्यहंवाऽपि पञ्चाहञ्चेष्यते परम्" तथा "एकाहं वा द्व्यहंवापि त्र्यहंवाऽप्यवचारणम्" इत्युक्तात् तर्पणपुटपाककालादित्येवाध्यवसितव्यम् वक्ष्यति हि "नेक्षेत तर्पितेनेत्रेपुटपाककृते तथा" इति । यन्त्रणाप्रकारं निर्दिशति तेजांसीति बहुवचनात्तेजःशब्दोऽयं तीक्ष्णतेजःकूटमवगमयति । अत्र तीक्ष्णेतिविशेषणादतीक्ष्णकिरणां चन्द्रादीन्, नीलकाचावरणगुणगरिम्णा गमितस्नेहभावान् दीपादीन् तत्प्रभाचयञ्च व्यावर्त्तयति । ततश्च सूर्य्यादितेज इत्यर्थो लभ्यते । अनिलं— प्रतिकूलतायान्तं वातं आकाशं निरवच्छिन्नं गगनं विप्रकृष्टं गगनमित्येतत् आदर्शं दर्पणं तच्चानीलमेव प्रत्येतव्यम्, भास्वराणीह सूर्य्यादीनामुष्णस्वभावानां प्रतिबिम्बानि शुभ्रतरचूर्णादिलिप्तानि चाकचिक्यवन्ति प्रासादादीनीति बुद्धिमारोहय न पुनर्मण्यादीनि तेषां चक्षुष्यत्वेनोपदेशात् । नेक्षेतेति-तीक्ष्णतेजःसु दृष्टिनिक्षेपे तात्पर्य्यम् न पुनश्चाक्षुषज्ञाने इत्यवश्यं वक्तव्यम् । यथाश्रुतं हि न सङ्गच्छते तात्पर्य्यानुपपत्तेरयोग्यतापत्तेश्च, नह्यविशेषेण तेजःसमुदायो दर्पणं भास्वराणि च दृष्ट्युपघाताय प्रभवन्ति । नापि चानिलाकाशयोश्चाक्षुषज्ञानं कथमपि भवितुमर्हति नीरूपत्वेन चक्षुरयोग्यत्वात् । तस्माच्च तेज आदीनि नेक्षेत चक्षुषा न सम्बध्नीयादित्यर्थनिष्कर्षः । अहित—

मिथ्योपचारादनयोर्यो व्याधिरुपजायते ।
अञ्जनाश्च्योतनस्वेदैर्यथास्वं तमुपाचरेत् ॥ १० ॥
प्रसन्नवर्णं विशदं वातातपसहं लघु ।
सुखस्वप्नावबोध्यक्षि पुटपाकगुणान्वितम् ॥
अतियोगाद्रुजः शोफः पिडकास्तिमिरोद्गमः ।
पाकोऽश्रु हर्षणञ्चापि क्षीणे दोषोद्गमस्तथा ॥ ११ ॥
अत ऊर्द्ध्वं प्रवक्ष्यामि पुटपाकप्रसाधनम् ।
द्वौ विल्वमात्रौ श्लक्ष्णस्य पिण्डौ मांसस्य पेषितौ ॥
द्रव्याणां विल्वमात्रन्तु द्रवाणां कुडवो मतः ।
तदैकध्यं समालोड्य पत्रैः सुपरिवेष्टितम् ॥
काश्मरीकुमुदैरण्ड-पद्मिनीकदलीभवैः ।
मृदावलिप्तमङ्गारैः खादिरैरवकूलयेत् ॥

---

हेतुरिति निषेधार्थः नहि चाक्षुषज्ञानं चक्षुरहितहेतुः किन्तर्हि तेजःप्रभृतिभिः संसर्गः नचैतदन्यथैयम् । मन्त्राक्षिनोत्पत्तिर्गन्धमात्रेणापि चाक्षुषज्ञानमपेक्षते इत्यसंशयं ब्रूमो दृश्यते हि ज्ञानं भवतु वा नवा तैस्तैर्भावैश्चक्षुःसंसर्गमात्रा-देवानिष्टं सम्पद्यतइति । मिथ्योपचाराद्व्यत्ययाविपर्य्यासादहिताचार विचाराच ॥ ८—१० ॥

योगातियोगमिथ्यायोगलिङ्गान्युपदिदिक्षति प्रसन्नेति । पुटपाक गुणा-न्वितम् सम्यक् कृतपुटपाकम् अक्षि प्रसन्नवर्णाद्युक्तलिङ्गं भवतीति शेषः । प्रसन्नवर्णं यथास्ववर्णम् विशदंविमलं दूषिकाविरहितमित्येतत् तिमिरोद्गम-स्तिमिरोत्पत्तिर्धूमदर्शित्वमिति यावत् । अत इति । प्रसाधनं निष्पादनम् ।

कतकाश्मन्तकैरण्ड-पाटलावृषबादरैः ।
सक्षीरद्रुमकाष्ठैर्वा गोमयैर्वापि युक्तितः ॥
स्विन्नमुद्धृत्य निष्पीड्य रसमादाय तं बुधः ।
तर्पणोक्तेन विधिना यथावदवचारयेत् ॥ १९ ॥
कनीनके निषेव्यः स्यान्नित्यमुत्तानशायिनः ।
रक्ते पित्ते च तौ शीतौ कोष्णौ वातकफापहौ ॥
अत्युष्णतीक्ष्णौ सततं दाहपाककरौ स्मृतौ ।
आप्लुतौ शीतलौ चाश्रुस्तम्भरुग्घर्षकारकौ ॥
अतिमात्रौ कषायत्व-सङ्कोचस्फुरणावहौ ।
हीनप्रमाणौ दोषाणामुत्क्लेशजननौ भृशम् ॥

---

बिल्वं पलमित्यनर्थान्तरम् । स्नेहस्य स्निग्धस्य द्रव्याणामुक्तानां भेषजानाम् द्रवाणामुक्तानां स्नेहवसाप्रभृतीनाम् । तदेकत्रेति । तौ पिण्डौ तच्च बिल्वमात्रं स च कुड़व इति तत् "नपुंसकमनपुंसकेन" इति पाःसू १।२।६९ । क्लीवशेष एकवच्च । काश्मरीगाम्भारी, अवकूलयेत् पचेत् । अवचारयेत् प्रक्रान्तत्वाद्दक्ष्णोरित्यवगन्तव्यम् । अवचारणप्रकारं विशिष्य प्रदर्शयति कनीनक इति । तौ तर्पणपुटपाकौ । आप्लुतावाधारयो र्दुत्वाताबनुप्रविश्य बहिःतर्पितौ, इदमत्रावधेयम्, तर्पणपुटपाकयोराप्लुतत्वादाधारौ केनचिद्वेग द्रवीभूय चक्षुषोरन्तः प्रविशतः शीतलत्वाच्च श्लेष्मावष्टम्भं प्रवर्त्तते तदिदं साम्प्रतमुक्तं मश्रुस्तम्भेति । स्तम्भो जड़ीभावः । मात्रां तं तं लघुवर्णोच्चारणमात्रं धारणकाल मतिक्रान्तावतिमात्रौ तथाविधौ हि तौ शिरावनुप्रविश्य रागादीनभिनिर्वर्त्तयतः शोणितगतिनिरोधेन तदिदमुक्तं कषायत्वेति । कषायत्वं कषायोरसः इति यावत् लक्षितोऽयमनन्यागौ देवनीतिवत् । स्फुरण-

युक्तौ कृतौ दाहशोफ-रुग्घर्षस्रावनाशनौ।
कण्डूपदेहदूषीका-रक्तराजिविनाशनौ॥
तस्मात् परिहरन्दोषान् विदध्यात् तौ सुखावहौ॥ १३॥
व्यापदश्च यथादोषं नस्यधूमाञ्जनैर्जयेत्॥ १४॥
आद्यन्त्ययोश्चाप्यनयोः स्वेद उष्णाम्बुचैलिकः।
तथाहितोऽवसाने च धूमः श्लेष्मसमुच्छ्रितौ॥ १५॥
यथादोषोपयुक्तन्तु नातिप्रबलमोजसा।
रागमाश्च्योतनं हन्ति सेकस्तु बलवत्तरम्॥ १६॥
तौ विधेयोपयुज्येते रोगेषु पुटपाकवत्।
लेखने सप्त चाष्टौ वा बिन्दवः स्नैहिके दश॥

---

मन्तरान्तरा तड़िदिव चञ्चलःशिराप्रहर्षजनितो वेदनाविशेषः। सुखावबोधाय "सुखस्वप्नावबोधत्वम्" इत्यादिना "प्रसन्नवर्णं विशदम्" इत्यादिना चोक्तानि सम्यग्योगयुक्ततर्पणपुटपाकलिङ्गानि पुनः स्फुटीकृत्यावगमयति। युक्ताविति कृतौ तौ तर्पणपुटपाकौ युक्तौ सर्व्वथा दोषविरहितत्वेन न्याय्यौ सन्तौ दाहादि-नाशनौ कण्ड्वादि नाशनौ च भवत इति शेषः। व्यापद इति। उष्णाम्बु-चैलिक इति उष्णाम्बुसिक्तं चैलं उष्णाम्बुचैलं शाकपार्थिवादिषु द्रष्टव्यं तदर्ह-तीति "पा० सू० ५।१।६३। ठक्" उत्तरपदवृद्धिश्च। स्वेदविशेषणमेतत्। अवसाने कर्म्मान्ते श्लेष्मसमुच्छ्रितौ सत्यप्यभिलक्षे श्लेष्मणि इत्यर्थः॥११—१५॥

सम्प्रतिक्रमागतत्वात् सेकाश्च्योतने निर्द्दिशति यथेति। अत्र यथा दोषमिति विशेषणं वाते कफे च कोष्णं रक्ते पित्ते च शीतमुपयुक्तमित्यव-गमयति। आश्च्योतनं तत्र तत्रोपदिष्टं तत्तद्दोषप्रत्यनीकभेषजसिद्धेन द्रवेण पूरणमित्युन्नेयम् एतेन सेकोऽपि व्याख्यातः। सेकस्त्विति तुकारेण

आश्च्योतने प्रयोक्तव्या द्वादशैव तु रोपणे ।
सेकस्य द्विगुणः कालः पुटपाकात् परो मतः ॥ १७ ॥
अथवा कार्य्यनिर्व्वृत्तिरुपयोगो यथाक्रमम् ।
पूर्व्वापराह्ले मध्याह्ने रुजाकालेषु चोभयोः ॥ १८ ॥
योगायोगान् स्नेहसेके तर्पणोक्तान् प्रचक्षते ॥ १९ ।
रोगाञ्छिरसि सम्भूतान् हत्वातिप्रबलान् गुणान् ।

---

यथादोषोपयुक्तमिति पदं लिङ्गव्यत्यासेनाकृष्यान्वेयम् । तावाश्च्योतन सेकौ रोगेषु वातिके श्लैष्मिके रक्तपित्तजे च पुटपाकवत् त्रिधा यथाक्रमं स्नेहन लेखन रोपणभेदास्त्रिभिः प्रकारैरुपयुज्येते इत्यर्थः । मात्रार्थोऽत्र पुटपाकवदिति विशेषणादापक्ष्माग्रादेवाश्च्योतनस्य स्थापनं सेकस्य च तथा रोगभेदाद् द्वेरकःशिवाक्शतमात्रकालमनुष्ठानात्मकं धारणं एकाहं वा द्व्यहं वा त्र्यहं वाप्यवचारणञ्चेत्यतो विशिनष्टि लेखन इति । पुटपाकात् पुटपाकधारणा-वधारणकालात् द्विगुणःकालः सेकस्य परः श्रेष्ठतमः । अत्रसेकं प्रत्येव काल-विशेषनियमादाश्च्योतनं प्रति पुटपाकधारणावचारणकाल एव परःकाल इति गम्यते । पक्षान्तरमाह अथवेति आकार्य्यनिर्वृत्तेः आप्रयोजनसिद्धेः आ रोगो-पशमनादिति यावत् यथाक्रममिति सन्निहितत्वात् "लेखने सप्तचाष्टौ वा" इत्युक्तानुक्रमेणेत्यर्थः । तथाच पूर्व्वाह्ले लेखनस्य अपराह्ले स्नैहिकस्य मध्याह्ने रोपणस्य सामान्यतोरुजाकाले चोभयोराश्च्योतनसेकयोरुपयोगः कार्य्य इति शेषः ॥ १६—१९ ॥

अथचेत् विधिवत् शिराव्यधादौकृतेऽपि तर्पणादिशक्तिविध्वंसिनस्तारक-वातादिकृतावेदनाविशेषाः प्रादुर्भवन्ति तर्हि कागतिरित्यपेक्षायां विवक्षुरपाकरोति रोगानिति । शिरसि सम्भूतानतिप्रबलान् रोगान् हत्वा शिरसोवस्तिशुं चान्

करोति शिरसो बस्तिस्तथा ये मूर्द्धतैलिकाः ॥ २० ॥
शुद्धदेहस्य सायाह्ने यथाव्याध्याशितस्य तु ।
ऋज्वासीनस्य बध्नीयाद् बस्तिकोशं ततो दृढम् ॥
यथाव्याधिशृतस्नेहपूर्णं संयम्य धारयेत् ।
तर्पणोक्तं दशगुणं यथादोषं विधानवित् ॥ २१ ॥
व्यक्तरूपेषु दोषेषु शुद्धकायस्य केवले ।
नेत्र एव स्थिते दोषे प्राप्तमञ्जनमाचरेत् ।

---

करोति, के नाम ते गुणाः य इह उक्ता इति मूर्द्धतैलिकाः शिरसोऽभ्यङ्गाधिकृता गुणा ये उक्ता "चि० २४ अ०" "केशानामार्द्दवं दैर्घ्यं" इत्यादिना ग्रन्थसन्दर्भेणाकूतम् । शिरोबस्तिप्रयोगप्रकारमुपदिदिक्षति शुद्धेति शुद्धदेहस्य विधिवत् स्नेहसंस्वेदनसिराव्यधस्य यथाव्याध्याशितस्य तत्तद्व्याध्यनुगत् पथ्याशितमाहारं भुक्तवतः ऋज्वासीनस्यातुरस्य सायाह्ने यथाव्याधि-शृतस्नेहपूर्णं—वातिके स्नैमिकेन तत्तद्व्याधिहरभेषजसिद्धेन तैलेन, पैत्तिके च तथाविधेन घृतेन पूर्णं बस्तिकोशं गवादीनां मूत्राधारात्मकं कोशाकार-माशयविशेषं दृढं बध्नीयात् शिरसीति प्रकृतत्वादुन्नेयम्, ततः संयम्य आतुरं स्पन्दनादिरहितत्वेन संयतं कृत्वा दशगुणं दशधापूरितं यथादोषं तर्पणोक्तं तर्पणधारणकालम् "कफे षट् पित्तेऽष्टौ दशवाततदुत्तमः" इति स्मरणात् यथाक्रमं कफपित्तवातजेषु रोगेषु षड्दशवाक्शतोपलक्षितं कालमिति यावत् विधानवित् विधिज्ञो भिषक् धारयेत् धर्तुं प्रयोजयेत् इत्यर्थः । प्रसङ्गात्तमञ्जनमधिकरोति व्यक्तेति व्यक्तरूपेष्वतिक्रान्तपूर्व-रूपावस्थत्वेन प्रस्फुटलिङ्गेषु दोषेषु रोगेषु, वदन्ति हि "दोषा अपि रोग-शब्दं × × × लभन्ते" इति। शुद्धकायस्य वामावस्थां परिहृत्य सम्यक्

लेखनं रोपणञ्चापि प्रसादनमथापि वा ॥ २२ ॥
तत्र पञ्च रसान् व्यस्तानाद्यैकरसवर्ज्जितान् ।
पञ्चधा लेखनं युञ्ज्याद् यथादोषमतन्द्रितः ॥
नेत्रवर्त्मशिराकोष-स्रोतःशृङ्गाटकाश्रितम् ।
मुखनासाक्षिभिर्दोषमोजसा स्रावयेत् तु तत् ॥ २३ ॥
कषायतिक्तकञ्चापि सस्नेहं रोपणं मतम् ।
तत् स्नेहशैत्याद्वर्ण्यं स्याद् दृष्टेश्च बलवर्द्धनम् ॥ २४ ॥
मधुरं स्नेहसम्पन्नमञ्जनन्तु प्रसादनम् ।
दृष्टिदोषप्रसादार्थं स्नेहनार्थञ्च तद्धितम् ॥ २५ ॥

---

रागाश्रुवेदनादीनामुपशमनार्थं निर्हृतदोषस्य सेवने कृते दोषे नेत्रएव स्थिते प्राप्तं तत्तद्दोषप्रत्यनीकत्वेन बुद्धिमान् कुर्मित्यर्थः अन्यत्राऽप्युक्तं "अञ्जनं शुद्धतनो नेत्रमात्राश्रितमले पक्वलिङ्गेऽल्पशोथार्त्तिकण्डूपैच्छिल्य लक्षिते मन्दघर्षाश्रुरागेऽक्ष्णि प्रयुज्यं घनदूषिके" इति ॥ २०—२२ ॥

नाममात्रेणोपदिष्टानि त्रिविधान्यञ्जनानि क्रमशो विवृणोति तत्रेति तत्राञ्जनेषु मध्ये लेखनं नामाञ्जनं कर्त्तुमाद्यैकरसवर्ज्जितान् लेखना-योग्यत्वान्मधुररसेन परिहीनान् व्यस्तानेकैकत्वेन विभक्तान् यथादोषं पञ्चरसानम्लादिकान् अतन्द्रितः प्रमादरहितोभिषक् पञ्चधा शेषरसक्रम-न्ययतः पञ्चप्रकारेण युञ्ज्यात् कल्पयेदित्यर्थः, एतेनैतदुक्तं भवति तं तं दोषप्रकृतिविशेषं "रौक्ष्यात् कषायो रक्षाणामुत्तमः" इत्यादि चरका-त्रेयभद्रकाप्यीयानुशासनञ्चाभिसमीक्ष्य वातिके लिख्ये व्याधौ ह्यम्लं लवणं वा रसं पैत्तिके शोणितजे च तिक्तं कषायं वा श्लैष्मिके तिक्तं कषायं कटुकं वा यं यं युक्तं मन्येत तं तं रसं इतरेतररसैः संयुक्त लेखनं नामाञ्जनं

यथादोषं प्रयोक्तव्यानि तानि दोषविशारदैः ।
अञ्जनानि यथोक्तानि प्राक्सायाह्नरात्रिषु ॥ २६ ॥
गुटिकारसचूर्णानि त्रिविधान्यञ्जनानि तु ।
यथापूर्व्वं बलं तेषां श्रेष्ठमाहुर्मनीषिणः ॥ २७ ॥
हरेणुमात्रा वर्त्तिः स्याल्लेखनस्य प्रमाणतः ।
प्रसादनस्य चाध्यर्द्धा द्विगुणा रोपणस्य च ।
रसाञ्जनस्य मात्रा तु पिष्टवर्त्तिमिता मता ॥ २८ ॥

---

कुर्य्यात् । एतावता व्यस्तैः प्रधानभूतै रक्तादिभिः पञ्चभिः सह स्वेतरेषां चतुर्णामनुगतत्वेन पञ्चधायोगात् पञ्चलेख्याञ्जनानि स्युरित्युन्नेयम् । शिराकोषः शिराणामभ्यन्तरो भागः स्रोतोनाम "शा० ९अ०" मूलात्खात् इत्यादिना व्याहृतं प्रागेव, शृङ्गाटकस्थवशाच्छिसन्तर्पणीनां शिराणां सन्निपातान्नातिरिच्यते एतच्च "शा० ६ अ० घ्राण श्रोत्राक्षीत्यादि वचनं निपुणमनुसन्धायाध्यवसितव्यम् । कषायेति । सस्नेहं सघृतमण्डम् स्नेहो घृतमण्डः प्रचुरतरो यत्रेति स्नेहमम्यक्तम्, एतेनास्य स्नेहनत्वं प्रथते येनेदम् स्नेहनेति नामधेयेनाप्युल्लिख्यते "स्नेहनं रोपणं चापि हीनयुक्तमपार्थकम्" इत्यनेन पद्येन, तान्यञ्जनानि क्रमशः प्राह्णादिषूपयोक्तुमिदमुच्यते अञ्जनानीति ॥ २३—२६ ॥

तान्यञ्जनानि पुनस्त्रेधा विभजते गुटिकेति, रसोद्भव इत्यनयोरन्तरम् । काति मात्रा तेषामायुर्व्वेदविदोवदन्तीत्याह हरेण्विति । रेणुकाप्रमाणा मात्रा अस्या इति हरेणुमात्रा वर्त्तिर्गुटिकेति पर्य्यायौ प्रसादनस्येत्यादौ चकारेण वर्त्तिरित्याकृष्यान्वीयते, अधिकमर्द्धमस्येत्यध्यर्द्धा । रसेति । एवशब्दस्यानाधिष्ठानोऽयं तु शब्दः पिष्टवर्त्तिर्वर्त्तिगुडिका चेत्येकोऽर्थः । पिष्टवर्त्तिः

द्वित्रिचतुःशलाकाश्च चूर्णस्याप्यनुपूर्व्वशः ॥ २९ ॥
तेषां तुल्यगुणान्येव विदध्याद्भाजनान्यपि ।
सौवर्णं राजतं शाङ्गं ताम्रं वैदूर्य्यकांस्यजम् ॥
आयसानि च योज्यानि शलाकाश्च यथाक्रमम् ॥ ३० ॥
वक्त्रयोर्मुकुलाकारा कलायपरिमण्डला ।
अष्टाङ्गुला तनुर्मध्ये सुकृता साधुनिग्रहा ।
औडुम्बर्य्यश्मजाताऽपि शारीरी वा हिता भवेत् ॥ ३१ ॥

---

मिता अञ्जनाय परिमिता यया सा पिष्टवर्त्तिमितैव मात्रा रसाञ्जनस्य रसात्मकस्याञ्जनस्य मता एतच्च वर्त्तिरसाञ्जनयोर्मात्रा गन्धमात्रेणापि न भिद्यते इत्याख्यानम् । चूर्णस्य चूर्णाञ्जनस्य च मात्रात्वनुपूर्व्वशोऽनुक्रमेण लेखनादिक्रमेणेति यावत् । द्वित्रिचतुःशलाका द्वि त्रि चतुःशलाकाख्या मात्रा इत्यर्थः । तेषामिति तेषां त्रयाणामञ्जनानां भाजनानि पात्राणि अपिशब्दाच्छलाका अपीति नेयम् परमतः शलाकाश्च यथाक्रम मित्युक्तेः । अञ्जनार्थानि तुल्यगुणानि लेखादीन्यपि शलाकाभाजनानीत्यतोविशिनष्टि सौवर्णमिति । यथाक्रमं यथाशक्ति "क्रमश्चानुक्रमेशक्तौ" इति मेदिनी । अत्राविशेषेऽपि त्रिविधेष्वञ्जनेषु मध्ये लेखनं प्रति ताम्रकांस्य वैदूर्य्य-मयानि शलाकाभाजनानि शेषे द्वे प्रतितु तद्व्यतिरिक्तानि सुवर्णादि-मयानि तानि साम्प्रतं योजयन्ति कुशला स्तत्तदञ्जनगुणसाम्यादित्य-वधारय । स्यादेतत् कतमा शलाका इह शलाकाशब्देनाभिप्रेयते ? आह वक्त्रयोरिति । वक्त्रयोः प्रान्तयो र्मुकुलाकारा भेषजमात्रादानार्थं मनाक् सुषिरेणानुविद्धतया ईषद्विकाशितकलिकाकारा कलायपरिमण्डला वर्त्तु-कलायवद्गोला च साधुनिग्रहा सूत्रवेष्टिततया बन्धवज्ञकाश्ययोग्या । शारीरी दन्तिदन्तादिमयी ॥ २७—३१ ॥

वामेनाक्षि विनिर्भुज्य हस्तेन सुसमाहितः ।
शलाकया दक्षिणेन क्षिपेत् कानीनमञ्जनम् ॥
आपाङ्गं वा यथायोग्यं कुर्य्याच्चापि गतागतम् ।
वर्त्मोपलेपि वा यत् तदङ्गुल्यैव प्रयोजयेत् ॥ ३२ ॥
अक्षि नात्यन्तयोरञ्ज्याद्बाधमानोऽपि वा भिषक् ।
न वा निर्व्वान्तदोषेऽक्षिण धावनं सम्प्रयोजयेत् ॥
दोषः प्रतिनिवृत्तः सन् हन्याद्दृष्टेर्बलं तथा ।
गतदोषमपेताश्रु पश्चाद् यत् सम्यगम्भसा ।
प्रक्षाल्याक्षि यथादोषं कार्य्यं प्रत्यञ्जनं ततः ॥ ३३ ॥
श्रमोदावर्त्तरुदित-मद्यक्रोधभयज्वरैः ।
वेगाघातशिरोदोषैश्चार्त्तानां नेष्यतेऽञ्जनम् ॥ ३४ ॥

---

अञ्जनोपयोगप्रकारं व्याहरति वामेनेति । वामेन हस्तेन वामहस्ताङ्गुष्ठेन तर्ज्जन्याद्योभाभ्यां वा विनिर्भुज्य वर्त्माकर्षेण वक्रीकृत्य सुसमाहितो नितरां निपुणो भिषक् कनीनसन्धेरपाङ्गसन्धेर्व्वा इदं कानीनमापाङ्गं वा अञ्जनं योग्यां मात्रामनतिक्रम्येति यथायोग्यम् शलाकया क्षिपेद् यथाच तदञ्जनं गतागतमितस्ततः सञ्चारं कुर्य्यान्नियमेनेत्यपिना आविष्क्रियते । अत्र पुनर्व्विशिनष्टि वर्त्मेति वर्त्मोपलेपि यदञ्जनं तत्त्वङ्गुल्यैव प्रयोजयेत् प्रतिसारणविधिनेत्यभिसन्धिः । अक्षीति, बाधमानः पुनः पुनः कर्म्मवैषम्यात् खिन्नोऽपि भिषक् अन्तयोः कनीनकावच्छेदे अपाङ्गावच्छेदे च अक्षि नात्यञ्ज्यात् तथा निर्व्वान्तदोषे लेखनेनानिर्ह्रितदोषे चाक्षि धावनं प्रक्षालनञ्च न योजयेत्, अत्र हेतुर्दोष इति । एतावता यत्पर्य्यवस्यति

रागरुक्तिमिरास्राव-शूलसंरम्भसम्भ्रमान् ।
निद्राक्षये क्रियाऽशक्तिं प्रवाते हग्वलक्षयम् ॥
रजोधूमहते रागस्रावाधीमन्थसम्भवम् ।
संरम्भशूलौ नस्यान्ते शिरोरुजि शिरोरुजम् ॥
शिरःस्नातेऽतिशीते च रवावनुदितेऽपि च ।
दोषस्थैर्य्यादिपार्थं स्याद्दोषोत्क्लेशं करोति च ॥
अजीर्णेऽप्येवमेव स्यात् स्रोतोमार्गविरोधनात् ।
दोषवेगोदये दत्तं कुर्य्यात् तांस्तानुपद्रवान् ॥
तस्मात् परिहरन् दोषानञ्जनं साधु योजयेत् ।

---

तदेव पुनःस्फुटीकृत्यावगमयति गतेति । गत इति साम्यन्तात् सार्व्वविभक्तिकस्तसिल्. तदयमर्थं आदौ गतदोषं पश्चात्तापितास्तु यदक्षि तदम्भसा सम्यक् प्रक्षाल्य यथादोषं ततस्तस्मिन् प्रक्षालिते अक्षिणि प्रत्यञ्जनं तत्तदञ्जनजनितरागाद्युपशमनार्थं यथायोगं सर्पिराद्यञ्जनं कार्य्यं देयमिति तात्पर्य्यम् एतेनानिर्हृतदोषे अक्षिणि चेदश्रूणि-निवर्त्तेरन् तर्हि प्रक्षालनं प्रत्यञ्जनञ्च परिहृत्य पुनरञ्जनमेवोपयोजयेत् प्रतीकारविधिमभिसमीक्ष्येत्यर्थादाक्षिप्यते । अवस्थाविशेषे कालविशेषेच दोषं दर्शयन्नञ्जनोपयोगं निरुणद्धि श्रमेति । कुतो नेष्यते ? आह रागेति रागादीन् करोतीतिशेषः सम्भ्रमोऽत्रात्यर्थं दृष्टिविभ्रमः निद्राक्षये निद्रान्ते क्रियाऽशक्तिं उन्मेषनिमेषादावशक्तिम् । रजोधूमहते रजोधूमाहतदेशे, शिरोरुजं शिरोरोगाभिहत्विम् अत्रापि करोतीत्युन्नेयम् दोषवेगोदये आमदोषजनितसंरम्भादावुत्पन्ने तांस्तानुक्तान् रागादीन् कुर्य्यादिति समन्वयः । एतावता विकार

लेखनस्य विशेषेण काल एष प्रकीर्त्तितः ॥ ३५ ॥
व्यापदश्च भवेदेताः सेकाश्च्योतनलेपनैः।
यथास्वं धूमकवलैर्नस्यैश्चापि समुत्थिताः ॥ ३६ ॥
विशदं लघु नास्रावि क्रियापटु सुनिर्म्मलम् ॥
संशान्तोपद्रवं नेत्रं विरिक्तं सम्यगादिशेत् ॥ ३७ ॥
जिह्मं दारुणदुर्व्वर्णं स्रस्तं रूक्षमतीव च।
नेत्रं विरेकातियोगे स्यन्दते चातिमात्रशः ॥
तत्र सन्तर्पणं कार्य्यं विधानश्चानिलापहम् ॥ ३८ ॥
अक्षि मन्दविरिक्तं स्यादुदग्रतरदोषवत्।
धूमनस्याञ्जनैस्तत्र हितं दोषावसेचनम् ॥ ३९ ॥
स्नेहवर्णबलोपेतं प्रसन्नं दोषवर्ज्जितम्।

---

हितत्वेनोपदिष्टेभ्योऽन्यत्र काले लेखनं देयमित्यर्थापन्नमर्थं सुखावबोधाय निर्दिशति लेखनस्येति। एष अनेनादिनोक्तः कालो विशेषेण लेखनस्य प्रकीर्त्तितोऽभ्यासेनेत्याकूतम्। अत्र विशेषेणेति विशेषणादेतत्प्रतियोगिनि काले क्वचिदपि लेखनं न देयमित्युपलब्धम् ॥३२—३५॥

व्यापदश्चेति एताः पूर्व्वोक्ताः समुत्थिता व्यापद इति समन्वयः दारुणं पिच्छिलमत्याह दुःखनयनत्वेन दुःसहम् स्रस्तं कोटरप्रविष्टम् स्यन्दते विस्रावयति इत्यर्थः। अक्षीति। मन्दविरिक्तं लेखनाञ्जनस्य मिथ्यायोगादित्युक्तम् उदग्रतरदोषवदिति। अत्र उदग्रतरदोषमिति पाठे मन्द-बीजैः प्रवृत्ततरदोषस्य प्राचुर्य्यं तात्पर्य्यम्। अवसिक्तत्वात् स्वाञ्जनादि-

ज्ञेयं प्रसादने सम्यगुपयुक्तेऽपि निर्वृतम् ॥ ४० ॥
किञ्चिद्धीनविकारं स्यात् तर्पणादिकृताद्दति ।
तत्र दोषहरं रूक्षं भेषजं शस्यते मृदु ॥ ४१ ॥
साधारणमपि ज्ञेयमेवं रोपणलक्षणम् ।
प्रसादनवदाचष्टे तस्मिन् युक्तेऽतिभेषजम् ॥ ४२ ॥
स्नेहनं रोपणं वापि हीनयुक्तमपार्थकम् ।
कर्त्तव्यं मात्रया तस्मादञ्जनं सिद्धिमिच्छता ॥ ४३ ॥

---

योगविधिरिदानीन्तु शेषे द्वे एव प्रवर्त्तयिष्याम: इत्यभिसन्धायाह स्नेहेति, निर्वृतं सुस्थितं स्वास्थ्येनानुगतमित्येतत् । प्रसादनातियोगलिङ्गमाह किञ्चिदिति । अतितर्पणादिकृताद् गुर्व्वाविलमतिस्निग्ध मित्याद्यतितर्पण लिङ्गलिङ्गितादक्ष्ण: किञ्चिद्धीनविकारमक्षि स्यात् प्रसादनातियोगइति- शेष: । रोपणाञ्जनयोगातियोगयो: प्रसादनयोगातियोगलिङ्गान्यतिदिशति साधारणमिति । अपिरयमवधारणार्थ: सम्मतापरपर्य्यायश्च एवं शब्द: "यो मेवं परसंमते" इत्यमर: मते सम्मते इति तदर्थ: । एवञ्च रोपण लक्षणं साधारणम् पूर्व्वेण समान मेव सम्मतम् ज्ञेयमित्यर्थनिष्कर्ष: एतेन प्रसादनाञ्जनयोगातियोगलिङ्गेभ्यो रोपणाञ्जनयोगातियोगलक्षणानि कथमपि न भिद्यन्ते इत्यवगन्तव्यम् । अतएव प्रतीकारविधावाह प्रसादनवदिति । तस्मिन् रोपणेऽतियुक्ते प्रसादनभेषजमाचष्टे इत्यन्वय: । अनयोर्मिथ्यायोगलक्षण माह स्नेहनमिति । प्रसादनापरपर्य्यायोऽयं स्नेहनशब्द; एतत्तु पक्षमप्यावोचाम । कर्त्तव्यं पुनरिति शेष: ॥ ३६—४३ ॥

पुटपाकक्रियाद्यासु क्रियास्वेकैव कल्पना ।
सहस्रशश्चाञ्जनेषु बीजेनोक्तेन पूजिताः ॥ ४४ ॥
दृष्टेर्बलविवृद्ध्यर्थं याप्यरोगक्षयाय च ।
राजार्हाण्यञ्जनाग्राणि निबोधैतान्यतः परम् ॥
अष्टौ भागानञ्जनस्य नीलोत्पलसमत्विषः ।
यौड्म्बरं शातकुम्भं राजतञ्च समासतः ॥
एकादशैतान् भागांस्तु योजयेत् कुशलो भिषक् ।
मूषाक्षिप्तं तदाध्मातमावृतं जातवेदसि ॥
खदिराश्मन्तकाङ्गारैर्गोशकृद्भिरथापि वा ।
गवां शकृद्रसे मूत्रे दध्नि सर्पिषि माक्षिके ॥
तैलमद्यवसामज्ज-सर्व्वगन्धोदकेषु च ।
द्राक्षारसेक्षुत्रिफलारसेषु सुहिमेषु च ॥

---

नन्विह प्रत्येकशः पुटपाकादीनां चतुर्णां लेखनादिभेदभिन्नैस्तैस्तैर्द्रव्य विशेषै स्त्रेधाकल्पना चेदिष्टा कथन्तर्ह्यपरिसंख्येयप्रकाराञ्जनान्यायुर्व्वेद विदः कल्पयन्त्यातुरमारोग्येणोपयोजयितुमित्याह पुटेति । चशब्दोऽयं विशेषणार्थस्तदयमर्थः, पुटपाकक्रियाद्यासु पुटपाक सेकाश्च्योतनाञ्जनाभिधासु चतुर्व्विधास्वेका लेखनरोपणप्रसादनाभिन्नतया कर्त्तव्या कल्पना समानेवेति निष्कर्षः । तत्राञ्जनेषु उक्तेन बीजेन कल्पना मूलेन सहस्रशः कल्पनास्तु पूजिता पूर्व्वाचार्य्यैणातोऽपरिसंख्येयप्रकारेणाञ्जनकल्पना विरुध्यते इति सन्दर्भः । नह्यञ्जसा तथाञ्जनान्यनायासेन कल्पयितुम् सर्व्वे भिषजः कथमपि प्रभविष्यन्तीति मन्यमानाः निदर्शनत्वेन प्रधानभूतानि

सारिवादिकषाये च कषाये चोत्पलादिके ।
निषिञ्चयेत् पृथक् चैनं ध्मातं ध्मातं पुनःपुनः ॥
ततोऽन्तरीक्षे सप्ताहं स्रोतसञ्च स्थितं जले ।
विशोष्य चूर्णयेन्मुक्तां स्फटिकं विद्रुमं तथा ॥
कालानुसारिवाञ्चैव शुचिरावाप्य योगतः ।
एतच्चूर्णाञ्जनं श्रेष्ठं निहितं भाजने शुभे ॥
दन्तस्फटिकवैदूर्य्य-शङ्खशैलासनोद्भवे ।
शातकुम्भेऽथ शार्ङ्गे वा राजते वा सुसंस्कृते ॥
सहस्रपादवत् पूजां कृत्वा राज्ञः प्रयोजयेत् ।
तेनाञ्जिताक्षो नृपतिर्भवेत् सर्व्वजनप्रियः ।
अधृष्यः सर्व्वभूतानां दृष्टिरोगविवर्ज्जितः ॥ ४५ ॥
कुष्ठञ्चन्दनमेलाश्च पत्रं मधुकमञ्जनम् ।
मेषशृङ्गस्य पुष्पाणि चक्रं रत्नानि सप्त च ॥

---

कानिचिदुपदेष्टुमिदमुच्यते दृष्टेरिति । अञ्जनस्य रसाञ्जनस्य "यौतुकं वै भवेत्तात्रे" इत्यजयः । सर्व्वगन्धंनाम "चातुर्जातककर्पूरकक्कोलागुरु-कुङ्कुमम् लवङ्गसहितञ्चैतत् सर्व्वगन्धं प्रकीर्त्तितम्" इत्युक्तोगन्धद्रव्य-समूहः । सारिवाद्युत्पलादौ "सू० ३८ अ०" उपदिष्टौ गणभेदौ कालानु-सारिवा तगरम् । सहस्रपादोविष्णुस्तमर्हतीति सहस्रपादवत् । "तदर्हम्" ५।१।११७ पा० सू० वतिः विष्णुपूजां कृत्वेत्यर्थः । सर्व्वजनप्रियोऽधृष्यश्चेति स्तुतिरियमञ्जनस्य ॥ ४४—४५ ॥

रत्नानि सप्तचेत्यत्रेम इह 'मुक्ता माणिक्यवैदूर्य्यगोमेदान् वज्रविद्रुमौ

उत्पलस्य वृहत्योश्च पद्मस्यापि च केशरम् ।
नागपुष्पमुशीराणि पिप्पलीतुल्यमुत्तमम् ॥
कुक्कुटाण्डकपालानि दार्व्वीं पथ्यां सरोचनाम् ।
मरिचान्यञ्जनमञ्जानं तुल्यांश्च गृहगोधिकाम् ॥
कृत्वा सूक्ष्मं शुचिश्चूर्णं न्यसेदभ्यर्च्य पूर्व्ववत् ।
एतद्भद्रोदयं नाम सदैवार्हति भूमिपः ॥ ४६ ॥
चक्रं समरिचञ्चैव मांसी शैलेयमेव च ।
तुल्यांशानि समानैस्तैः समस्तैश्च मनःशिला ॥
पञ्चस्य भागाश्चत्वारो द्विगुणं सर्व्वतोऽञ्जनम् ।
तावच्च यष्टिमधुकं पूर्व्ववच्चैतदञ्जनम् ॥ ४७ ॥
मनःशिला देवकाष्ठं रजन्यौ त्रिफलोषणम् ।
लाक्षालसुनमञ्जिष्ठा-सैन्धवैलाः समाक्षिकाः ॥
रोध्रं सावरकं चूर्णमायसं ताम्रमेव च ॥
कालानुसारिवाञ्चैव कुक्कुटाण्डदलानि च ॥
तुल्यानि पयसा पिष्ट्वा गुटिकां कारयेद्बुधः ।
कण्डूतिमिरशुक्रार्म्म-रक्तराज्युपशान्तये ॥ ४८ ॥

---

पद्मरागं मरकतं नीलञ्चेति यथाक्रमात्" इत्युक्तेषु नवसु रत्नेषु मध्ये आद्यानि सप्त ग्राहयन्ति कुशलाः चक्षुष्यतरत्वेनाभ्युपगमात् । गृहगोधिका गृहगोधा 'टिक्टिकी" इत्याख्यायते । चक्रमिति चक्रं तगरपुष्पम् । समानैः समानांशेन गृहीतैस्तैः समस्तैस्तुल्यांशाश्च मनःशिलेत्येवं चकारेण

कांस्यापमार्ज्जनमसी मधुकं सैन्धवं नतम् ।
एरण्डमूलञ्च समं बृहत्यंशद्वयान्वितम् ॥
आजेन पयसा पिष्ट्वा ताम्रपात्रं प्रलेपयेत् ।
सप्तकृत्वस्तु ता वर्त्यश्छायाशुष्का रुजापहाः ॥ ४९ ॥
पथ्यातुल्यकयष्ट्याह्वैस्तैस्त्र्यैर्मरिचषोड़शा ।
पथ्या सर्व्वविकारेषु वर्त्तिः शीताम्बुपेषिता ॥ ५० ॥
रसक्रियाविधानेन यथोक्तविधिकोविदः ।
पिण्डाञ्जनानि कुर्व्वीत यथायोगमतन्द्रितः ॥ ५१ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे क्रियाकल्पो नामाष्टादशोऽध्यायः ॥ १८ ॥

---

तुल्यांशानीति पदं लिङ्गवचनव्यत्यासेनाक्रष्यान्वेयम् । मनःशीलेति । आयसं ताम्रञ्च मारितपुटितत्वेनातीव सूक्ष्ममेवादेयम् । कांस्येति । मलिनेन कांस्यपात्रेण मलिनस्य तस्यावघर्षणादुत्थिता मसी कांस्यापमार्ज्जनमसी नतं तगरम् सप्तकृत्वः प्रलेपयेदित्यन्वयः । पथ्येति । मरिचषोड़शा मरिचस्य षोड़शभागाः यत्रेतिवाक्यार्थः । अनुक्तं कञ्चिदर्थं संग्रहीतुमिदमुच्यते रसेति अति रोहितार्थ मेतत् ॥ ४६—५१ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे क्रियाकल्पो नामाष्टादशोऽध्यायः ॥

# एकोनविंशोऽध्यायः ।

अथातो नयनाभिघातप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

[illegible]भ्याहते तु न[illegible] बहुधा नराणां

[illegible] रुजाम धीमान् ।

[illegible]

[illegible]शूलप[illegible] ॥

दृ[illegible]प्रसादजनन[illegible]कुर्यात्

स्निग्धैर्हिमैश्च मधुरै[illegible] तथा [illegible]योगैः ॥ २ ॥

---

सम्प्रति प्रक्रान्तं नयनाभिघातप्रतिषेधमधिकरोति अथात इत्यादिना ॥१॥

अभ्याहते इति । अभ्याहते तैस्तैर्दण्डशस्त्रादिभिः सद्योऽभिहते इत्यर्थः । वक्ष्यतिहि "सद्योहतेनयन एष विधिः" इति । संरम्भेति । संरम्भरागाभ्यां तुमुलं निरन्तरं परिकरबन्धेनेतस्ततोऽनिर्व्वचनीय दुःख-जनकत्वेन सङ्कुलं युद्धमिवकरोतीति संरम्भरागतुमुलेतिरूपम् । उक्तम् इत्युभयत्रान्वीयते तथाच उक्तं क्रियाकल्पेऽभिहितं नस्यादिकम्, द्विव्रणीय-चिकित्सिते सद्योव्रणचिकित्सिते चोक्तं क्षतजपित्तजशूलपथ्यम् । तथा स्निग्धादिभिः प्रयोगैर्दृष्टिप्रसादजननं विधिमाशु कुर्य्यादित्यन्वयः । अत्रहि नस्येत्यादौ तद्गुणसम्विज्ञानोबहुव्रीहिस्तेन पदमिदं नस्यादिकमाश्च्योतना-दिकञ्चाचष्टे इत्यवसेयम् । क्षतजेत्यादौतु क्षतशब्दः प्रकृतत्वात् सद्योव्रण-मेवाभिधत्ते ततश्च सद्योव्रणोत्पन्नयोः पित्तजविकारशूलयोः पथ्यम् । क्षतजपित्तशूलपथ्यम् । एतावता द्विव्रणीयचिकित्सिते सद्योव्रण-चिकित्सिते च "तत्कालमेव क्षतोष्मणः प्रशमनार्थम्" इत्यादिना

स्वेदाग्निधूमभयशोकरुजाभिघातै-
रभ्याहतामपि तथैव भिषक् चिकित्सेत्।
सद्योहते नयन एष विधिस्त्र्यहोर्द्ध्वं
स्यन्देरितो भवति दोषमवेक्ष्य कार्य्यः॥ ३॥
अभ्याहतं नयनमीषदथाश्र वाष्प-
संस्वेदितं भवति तन्निरुजं क्षणेन॥ ४॥
साध्यं क्षतं पटलमेकमुभे तु कृच्छ्रे
त्रीणि क्षतानि पटलानि विवर्ज्जयेत् तु॥ ५॥

---

"स्नेहपानं हितन्त्वत्र" इत्यादिना च हितत्वेनोपदिष्टं शीतक्रियावचारणं स्नेहपानादिकञ्चेह पथ्यशब्देनाभिप्रेयत इत्यवगन्तव्यम्। एवञ्च यत् केनचिद् भिषक्मानिना याद्दृच्छिकेन "क्षतजपित्तजशूलपथ्यम् रक्ताभिष्यन्दहितम् पित्ताभिष्यन्दहितञ्चे"त्येवं व्याख्यातम् तन्मत्तोन्मत्तवचनवदुपेक्षितव्यम्। परमतो निर्द्दिश्यते हि "त्र्यहोर्द्ध्वं स्यन्देरित:" इति। स्वेदेत्यादि। आयुर्व्वेदेहि सद्य:शब्द: सप्तरात्रमेवाभिधत्ते इति निश्चीयते "सद्य:प्राणहराणि सप्तरात्राभ्यन्तरान् मारयन्ति" तथा "सद्योव्रणानां सप्ताहम्" इत्यतिक्रान्तावेक्षणात्, तेन सद्योहते सप्तरात्राभ्यन्तरहते इत्यर्थनिष्कर्ष:। त्र्यहोर्द्ध्वं सप्तरात्रादूर्द्ध्वं स्यन्देरितोऽभिष्यन्दप्रतिषेधोपदिष्ट:। अभ्याहतमिति। त्वर्थीयमथशब्द: ईषदभ्याहतं नयनन्तु आस्यवाष्पसंस्वेदितम् मुखोष्मणा उष्णेन वस्त्रेण संस्वेदितम् फुत्कारसंस्वेदितं वा सदित्यर्थ:। एकमाद्यं पटलं उभे प्रथमद्वितीयपटले त्रीणि प्रथमद्वितीयतृतीयपटलानि॥ २—५॥

स्यात् पिच्चितञ्च नयनं हतमिति चावसन्नं
स्रस्तं च्युतञ्च हतदृक् च भवेत् तु याप्यम्।
विस्तीर्णदृष्टि तनुरागमसत्प्रदर्शि
साध्यं यथास्थितमनाविलदर्शनञ्च ॥ ६ ॥
प्राणोपरोधवमनक्षवकण्ठरोधै-
रुन्नम्य माशु नयनं यदतिप्रविष्टम्।
नेत्रे विलम्बिनि विधिर्विहितः पुरस्तात्
दुच्छिङ्घनं शिरसि वार्य्यवसेचनञ्च ॥ ७ ॥

---

स्यादिति। यत् पिच्चितं "चि० २ अ०" प्रहारपीड़नाभ्यां इत्याद्युक्त-लक्षणम्। यदत्यवसन्नमत्यर्थमन्तःप्रविष्टं यत् स्रस्तं मनाक् कोटर-प्रविष्टम्। यत् च्युतम् वहिर्गतम्। यच्च हतदृक् विनष्टदृष्टिमण्डलम् स्यात् तत् सर्व्वं याप्यं तुकाराद् विवर्ज्जनीयञ्चेति ब्रूमः। सुभिषक्भिश्चोपक्रान्त-मपि हि तन्नाप्नोति दृष्टिशक्तिम् स्वामाकृतिञ्च प्रायेणेति पश्यामः। साध्यमाह विस्तीर्णेति। यथावत् विपुलादृष्टिरस्येति विस्तीर्णदृष्टि। असत्प्रदर्शि असाधुदर्शि, "सत्येसाधौ विद्यमाने प्रशस्तेऽभ्यर्हितेच सत्" इत्यमरः। अनाविलदर्शनम् अकलुषदृष्टिमण्डलम्। प्रतीकारक्रममुपदिदिक्षति प्राणेति प्राणोपरोधः श्वासावरोधः। कण्ठरोधो हस्तेन वस्त्रेण वा ग्रीवावपीड़नं। एष हि प्राणवच्छोणितञ्चावरुध्य सद्य एव नयनं वहि-र्निनीषतीति पृथगुपदिश्यते। पुरस्तात् छिन्नणीयचिकित्सिते "अभिन्नं लम्बते तु यत्" इत्यादिना ग्रन्थेनेति शेषः। उच्छिङ्घनं 'शिघि आघ्राणे' इति धात्वर्थस्मरणा दूर्द्ध्वं वेगेन श्वासादानमित्यर्थः ॥ ६—७ ॥

षट्सप्ततिर्नयनजा य इमे प्रदिष्टा
रोगा भवन्त्यमहतां महताञ्च तेभ्यः।
स्तन्यप्रकोपकफमारुतपित्तरक्तै-
र्बालाक्षिवर्त्मभव एव कुकूणकोऽन्यः॥
मृद्नाति नेत्रमतिकण्डुमथाक्षिकूट-
नासाललाटमपि तेन शिशुः स नित्यम्।
सूर्य्यप्रभां न सहते स्रवति प्रवृद्धं
तस्याहरेद्रुधिरमाशु विनिर्लिखेच्च॥
क्षौद्रायुतैश्च कटुभिः प्रतिसारयेत् तु
मातुः शिरोरभिहितञ्च विधं विदध्यात्॥ ८॥

---

सम्प्रत्युदीरितमर्थमुपसंहरन् प्रसङ्गाद्बालानां स्तन्यादिदोषजातम् कुकूणकं नाम रोग विशेषमधिकरोति षड़ित्यादिना। तेभ्यो रोगेभ्योऽन्यइति समन्वयः। अक्षिकूटम् अक्षिगोलम्। मृद्नातीति। अत्र बालाक्षिवर्त्मभव-एवेत्युपदेशात् वर्त्मावच्छेदे कण्डूमत् खर्जूमन्नेत्रम्। तथा तत् सन्निहितत्वाद्दोषशक्तेरचिन्त्यत्वाद्वा अकण्डूमदप्यक्षिकूटादिकम् शिशुरतिमृद्नाति। स शिशुस्तेन हेतुना सूर्य्यप्रभां न सहते प्रवृद्धमत्यर्थं स्रवत्यश्रूणि विमुञ्चतीत्यर्थः। प्रतीकारक्रम माह तस्येति। रुधिरमाहरेत् कनीयसीभिर्जलौकोभि र्विनिर्लिखेच्च कर्कशैर्गोजीशेफालिकापत्रादिभिरित्युपदेशः। क्षौद्रायुतै र्मधुप्रगाढ़ैः कटुभिस्त्रिकटुप्रभृतिभिः प्रतिसारयेदङ्गुल्या वर्त्माभ्यन्तरे मनाक् प्रलेपयेदित्यर्थः। मातुः शिरोरभिहितम् "तेषु च यथाभिहितं मृदच्छेदनीयमौषधम् मात्रया क्षीरपस" इत्यादिना गर्भिणी व्याकरणे उपदिष्टं विधिं विदध्यात् स्तन्यदोषोपशमाय इत्याकूतम्॥ ८॥

तं वामयेत् तु मधुसैन्धवसम्प्रयुक्तैः
पीतं पयः खलु फलैः खरमञ्जरीणाम् ।
स्यात् पिप्पलीलवणमाक्षिकसंयुतैर्वा
नैनं वमन्तमपि वामयितुं यतेत ॥
दत्वा वचामशनदुग्धभुजे प्रयोज्य-
मूर्द्ध्वं ततः फलयुतं वमनं विधिज्ञैः ॥ ८ ॥
जम्ब्वाम्रधात्र्याणदलैः परिधावनार्थं
कार्य्यं कषायमवसेचनमेव चापि ।
आश्च्योतने च हितमत्र घृतं गुडूची-

---

तमिति । च शब्दस्यानाधिष्ठानोऽयं तु शब्दः । तदयमर्थः मधुसैन्धव-संप्रयुक्तैः पिप्पलीलवणमाक्षिक संयुतैर्व्वा खरमञ्जरीणामपामार्गाणां फलैश्चूर्णी-कृतैर्वीजैस्तं शिशुं पीतं पयः 'चि० ३३ अ०" सुकुमारं कृशं वालम् × × × आकण्ठं पाययेत् ; इति स्मरणात् सुखवमनाय पर्य्याप्तं पीतं पयः साधु वामयेदेति । पूर्व्वं हि वमनायोपस्थितमातुरमङ्गुल्यादिभिः कण्ठे परिमृष्य वामयितुं यतेतेत्युपदिष्टम् तत्तु सौकुमार्य्यादस्मिन् साम्प्रतं भविष्यतीति सम्प्रधार्य्य विशिनष्टि नैनमिति । क्षीराशादस्यान्नादस्य च वमनाय भेषजविशेषं निर्द्दिदिक्षति दत्वेति । अशनदुग्धभुजे क्षीराशादाय वचांदत्वा वचयासह प्रयोज्यं तत् क्षीरपं प्रत्युपदिष्टम् खरमञ्जरीफलादि वमनौषध मित्यध्य-वसेयम् । अतः ऊर्द्ध्व मन्नादायेत्यर्थः । फलयुतं मदनफलमिश्रम् ? वमनं सन्निहितत्वात् क्षीराशादं प्रत्युपदिष्टं वमनौषधमित्युन्नेयम् ॥ ८ ॥

सिद्धं तथाहुरपि च त्रिफलाविपक्कम् ॥
नेपालजामरिचशङ्खरसाञ्जनानि
सिन्धुप्रसूतगुड़माक्षिकसंयुतानि ।
स्यादञ्जनं मधुरसामधुताम्रकैर्वा
कृष्णायसं घृतपयोमधु वापि दग्धम् ॥
व्योषं पलाण्डु मधुकं लवणोत्तमञ्च
लाक्षाञ्च गैरिकयुतां गुटिकाञ्जनं वा ।
निम्बच्छदं मधुकदार्व्वि सताम्रलोध्र-
मिच्छन्ति चात्र भिषजोऽञ्जनमंशतुल्यम् ॥
स्रोतोजशङ्खदधिसैन्धवमर्द्धपक्वं
शुक्रं शिशोर्नुदति भावितमञ्जनेन ।
स्यन्दे कफादभिहितं क्रममाचरेच्च
बालस्य रोगकुशलोऽक्षिगदं जिघांसुः ॥ १० ॥

---

अम्बाम्रेति अणुदलैः क्षुद्रदलैः कोमलदलैरितियावत् । त्रिफला-विपक्वञ्च घृतमिति सम्बन्धः । नेपालजेति, नेपालजामनःशिला । मधुरसा मूर्व्वा, स्वल्पं ताम्रं ताम्रकम् । अत्र ताम्रपात्रे मधुनासह मूर्व्वा मूलं घृष्टाञ्जनं देयमित्युपदिशन्त्याचार्य्याः । कृष्णायसं मारितपुटित कृष्णलौहम् । दग्धं पुटपाक विधिनेति शेषः । व्योषमिति । व्योषादिकं पिष्टागुटिकाञ्जनं कार्य्यमितिशेषः । निम्बेति मधुकञ्चदार्व्वीचेति मधुकदार्व्वि । ताम्रं ताम्रभस्म । अंशतस्तुल्यमंशतुल्यम् । स्रोतजेति । स्रोतजं सौवीराञ्जनम् । अर्द्धं पक्वस्येत्यर्द्धपक्वं समासइमित्येतत्, भावितं

समुद्र इव गम्भीरं नैव शक्यं चिकित्सितम्।
वक्तुं निरवशेषेण श्लोकानामयुतैरपि॥
सहस्रैरपि च प्रोक्तमर्थमल्पमतिर्नरः।
तर्कग्रन्थार्थरहितो नैव गृह्णात्यपण्डितः॥
तदिदं बहुगूढ़ार्थं चिकित्सावीजमीरितम्।
कुशलेनाभिपन्नं तद् बहुधाभिप्ररोहति॥
तस्मान्मतिमता नित्यं नानाशास्त्रार्थदर्शिना।
सर्व्वमूह्यमगाधार्थं शास्त्रमागमबुद्धिना॥ ११॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे नयनाभिघातप्रतिषेधो नामैकोनविंशोऽध्यायः॥ १९॥

---

भावना विधिना संस्कृतम्, सत् अञ्जनेन शुक्रमव्रणसमाख्यं नुदतीति समन्वयः। स्यन्द इति, कफात्स्यन्दे कफाभिष्यन्दे। अक्षिगदं कुकूणकसमाख्यम्। अत्र शिष्यानामभिनिवेशविशेषमानिनीषुर्भगवान् चिकित्सितमिदमुपसंहरन् स्तौति समुद्र इति। निगद व्याख्यानमेतत्॥ १०—११॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे नयनाभिघातप्रतिषेधोनामैकोनविंशोऽध्यायः॥

# विंशोऽध्यायः ।

अथातः कर्णगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥ १ ॥

कर्णशूलं प्रणादश्च बाधिर्य्यं क्ष्वेड एव च ।
कर्णस्रावः कर्णकण्डूः कर्णगूथस्तथैव च ॥
कृमिकर्णप्रतीनाहौ विद्रधिर्द्विविधस्तथा ।
कर्णपाकः पूतिकर्णस्तथैवार्शश्चतुर्व्विधम् ॥

---

क्रमागतं कर्णगतरोगविज्ञानीयं नामाधिकरोति अथात इत्यादिना ॥ १ ॥

कर्णशब्देनेह सविवरः पटहादिरभिप्रेयते साधारणशब्दविशेषादिति गम्यते । दोषा हि प्रायेणात सविवरं पटहादिकमेव सचिवीकृत्य लिङ्गानि दर्शयन्तीत्यनुभवामः । व्याससमासाभ्यामुपदिष्टं हि शास्त्रं व्यवसायाभिवृद्धये प्रभवतीति प्राङ् नाममात्रेण परिसंख्याय रोगानभिधत्ते कर्णेति । नन्वस्मिन् शास्त्रे अर्शांस्यर्व्वुदानि व्रणशोफांश्च प्रत्येकशः षट्त्वेन विभज्य यथाक्रममर्शोऽर्व्वुदनिदानामपक्वैषणीयेषु निरदिक्षत् । तत् किमिद मुच्यते अर्शश्चतुर्व्विध मित्येवं क्षणमपि नाशङ्कितव्यम्, जागर्त्ति हि वः शङ्कामूलमपनेतुं परिकरबन्धेन साहचर्य्यं नाम, तथा हि पश्यत भो नासागतरोगविज्ञानीयानुशासनम् "दोषैस्त्रिभिस्तैः पृथगेकशश्च कुर्य्यात्तथार्शांसि तथैव शोफान् । शान्ताक्यसिद्धान्समवेत्य वापि सर्व्वात्मकं मतममर्व्वुदन्तु" इत्येवञ्च तत्साहचर्य्यादिदमुक्तम् अर्शश्चतुर्व्विधमित्यवधेयम् । वाढम्, नैतावतापि दोषाभिमर्षोऽस्ति प्रायेणात्राविर्भाविनां शोणितजादीनामर्शः-

तथार्ब्बुदं सप्तविधं शोफश्चापि चतुर्व्विधः।
एते कर्णगता रोगा अष्टाविंशतिरीरिताः॥ २॥

समीरणः श्रोत्रगतोऽन्यथाचरः
समन्ततः शूलमतीव कर्णयोः।
करोति दोषैश्च यथास्वमावृतः
स कर्णशूलः कथितो दुराचरः॥ ३॥

यदा तु नाड़ीषु विमार्गमागतः
स एव शब्दाभिवहासु तिष्ठति।
शृणोति शब्दान् विविधांस्तदा नरः
प्रणादमेनं कथयन्ति चामयम्॥ ४॥

स एव शब्दाभिवहा यदा शिराः
कफानुयातो व्यनुसृत्य तिष्ठति।
तदा नरस्याप्रतिकारसेविनो
भवेत् तु बाधिर्य्यमसंशयं खलु॥ ५॥

---

प्रभृतीनामपरिग्रहादित्यपि वक्तुम् न युक्तम्, तत्र व्याचिख्यासितमर्थमनवेक्ष्येति नानुपपत्तिः॥ २॥

समासेनोक्तमर्थं व्यासतो निवेदयति समीरण इति। अन्यथा चरः प्रतिलोमगः दोषैः कफपित्तशोणितैरावृतः यथास्वं शूलमितिसम्बन्धः, यदेति। शब्दाभिवहासु नाड़ीषु पटहानुगतास्वित्यध्येयम्। व्यनुसृत्य विकृत्या प्रसृत्य अप्रतिकारसेविनः अनाराधितप्रतिकारस्यानवाप्तप्रतिकारस्येति यावत्।

श्रमात् क्षयाद्रूक्षकषायभोजनात्
समीरणः शब्दपथे व्यवस्थितः ।
विरिक्तशीर्षस्य च शीतसेविनः
करोति हि क्ष्वेड़मतीव कर्णयोः ॥ ६ ॥
शिरोऽभिघातादथवा निमज्जतो
जले प्रपाकादथवापि विद्रधेः ।
स्रवेत् तु पूयं श्रवणोऽनिलावृतः
स कर्णसंस्राव इति प्रकीर्त्तितः ॥ ७ ॥
कफेन कण्डूः प्रचितेन कर्णयो-
र्भृशं भवेत् स्रोतसि कर्णसंज्ञिते ॥ ८ ॥
विशोषिते श्लेष्मणि पित्ततेजसा
नृणां भवेत् स्रोतसि कर्णगूथकः ॥ ९ ॥

---

श्रमादिति । क्ष्वेड़ इति "ञि क्ष्विदा अव्यक्ते शब्दे" इत्यस्य रूपम् पृषोदरादिषु द्रष्टव्यम् । क्ष्विड़ स्नेहे इत्यस्य चेद्रूपं तर्हि धातूनामनेकार्थत्वात् स एवार्थः ।

शिरइति शिरोऽभिघातात् शिरसि दण्डादिना वातादिना वा कर्णसंश्रयिणाम् शिरास्नायुादीनामुपघातात् । जले निमज्जतः प्रपाकात् कर्णे जलप्रवेशनिमित्तादित्याकूतम् । विद्रधेः कर्णविद्रधेः प्रपाकाद्वापि स्रवेत् स्रावयेदित्यर्थः । कफेनेति । कर्णयोः प्रचितेन सञ्चितेन कफेन कर्णसंज्ञिते स्रोतसि स्रोतोश्रितये भृशं कण्डूर्भवेत् सकर्णकण्डूर्नाम रोगइत्यर्थादुपलभ्यते ॥२—८॥

विशोषित इति श्रोतसि कर्णकूहरे, भवेत् श्लेष्मणोऽस्य शोषितत्वेन तथा परिणामादितत्रभिसन्धिः । सइति । सोऽद्रवतां शोषितत्वेन कठिनतां

मया पुरस्तात् प्रसमीक्ष्य योजये-
दिहैव तानि प्रयतो भिषग्वरः ॥ १५ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे कर्णगतरोग विज्ञानीयो नाम विंशोऽध्यायः ॥ २० ॥

---

आचार्य्येण ह्यतिदेशोऽयं मुष्टिबन्धं निबद्धस्तदिह सर्व्वात्मकस्यार्व्वुदस्यव्याधि-व्यासितत्वेऽपि वाहुल्यानुशयादीरितमिति नानुपपन्नम् ॥ १२—१५ ॥

इति श्रीहाराणचन्द्र चक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे कर्णगत रोगविज्ञानीयोनाम विंशोध्यायः ॥ २० ॥

# एकविंशोऽध्यायः ।

अथातः कर्णगतरोगप्रतिषेधं व्याख्यास्यामः ॥

सामान्यं कर्णरोगेषु घृतपानं रसाशनम् ।
अव्यायामोऽशिरःस्नानं ब्रह्मचर्य्यमकत्थनम् ॥ २ ॥

---

सम्प्रति "रोगमादौ परीक्षेत ततोऽनन्तरं मौषधम्" इति स्मरणादुपक्रम-निर्द्दिष्टेन क्रमेणोपस्थितं कर्णगतरोगप्रतिषेधं नामाधिकरोति अथात इत्यादिना ॥ १ ॥

सामान्यमिति । रसाशनं मांसरसेन भोजनम् । रसायनमिति पाठे तु रसायनसाम्याद्रसायनं बलवीर्य्यौजस्करमाहारविहारमित्यर्थः ।

कर्णशूले प्रणादे च वाधिर्य्यक्ष्वेड़योरपि ।
चतुर्णामपि रोगाणां सामान्यं भेषजं विदुः ॥
स्निग्धं वातहरैः स्वेदैर्नरं स्नेहविरेचितम् ।
नाड़ीस्वेदैरुपचरेत् पिण्डस्वेदैस्तथैव च ॥
विल्वैरण्डार्कवर्षाभू-दधित्थोन्मत्तशिग्रुभिः ।
वत्सगन्धाश्वगन्धाभ्यां तर्कारीयववेणुभिः ॥
आरणालैः शृतैरेभिर्नाड़ीस्वेदः प्रयोजितः ।
कफवातसमुत्थानं कर्णशूलं निरस्यति ॥
मीनकुक्कुटलावानां मांसजैः पयसापि वा ।
पिण्डैः स्वेदञ्च कुर्व्वीत कर्णशूलनिवारणम् ॥

---

अकत्थनमिति "कत्थश्लाघायां धातुः" श्लाघा चात्मगुणाविष्करणम्, तच्चावश्यं वहुभाषित्व मनुवध्नातीतिकृत्वा कत्थेस्तदर्थोऽन्तर्भतीति गम्यते । एवञ्चोदारादि शब्दवदांशिकनुत्त्या केवलं वहुभाषित्वं नामार्थमाश्रित्योपदिश्यते अकत्थन-मिति । अकत्थनं मितभाषित्वम् । सामान्यमिति तद्धितोऽयमन-न्यार्थः सामान्यं सर्व्वथा तत्समानम् शक्तत्वात् पथ्यत्वेनेत्युन्नेयम् । कर्णेति अत्राद्येनापिना पूर्व्वस्मादुपरिष्टाद्वा सामान्य मिति पदमाकृष्यान्वीयते । अन्तरेण चावधार्य्यते, तथाच कर्णशूलादिषु चतुर्षु सामान्यं समानं दोष-दूष्यमित्याकूतम् । अतश्चतुर्णामेषां रोगाणां सामान्यं समानं भेषजं विदुरित्यर्थः । किन्नाम तद्भेषजमित्याह स्निग्धमिति । अत्र स्वेदैरित्युप-लक्षणे तृतीया स्वेदैरुपलक्षितं स्निग्धमिति तात्पर्य्यम् अत्र वातहरै-रिति विशेषणाद्विधिरयं शुद्धवातजकर्णशूलादिविषयक इत्यवगन्तव्यम् ।

अश्वत्थपत्रखल्लं वा विधाय बहुपत्रकम् ।
तैलाक्तमग्निसम्पूर्णं निदध्याच्छ्रवणोपरि ॥
यत् तैलं च्यवते तस्मात् खल्लादङ्गारतापितात् ।
तत् प्राप्तं श्रवणस्रोतः सद्यो गृह्णाति वेदनाम् ॥
क्षौमगुग्गुल्वगुरुभिः सघृतैर्धूपयेच्च तम् ।
भक्तोपरि हितं सर्पिर्वस्तिकर्म्म च पूजितम् ॥ ३ ॥
निरन्नो निशि तत् सर्पिः पीत्वोपरि पयः पिबेत् ।
मूर्द्धवस्तिषु नस्ये च मस्तिष्के परिषेचने ।
शतपाकं बलातैलं प्रशस्तञ्चापि भोजने ॥

---

कतमः कतमोनाडीपिण्डस्वेद इत्युपयुज्यत आह विल्वेति । दधित्थः, कपित्थः, वस्तगन्धा वनयमानी, वेणूनां यवो यववेणुः वंशवीजमित्येतत् । सृतैर्मृत्पिहितपार्श्वछिद्रेणाधोमुखेन कुम्भेन स्थालीमुखमभिसन्धाय पक्वैरित्यर्थः । एभिर्व्यस्तसमस्तैरित्युपदेशः स्वेद इति स्वेदत्वसामान्यादेकवचनम् प्रयोजितस्तस्मिंश्च छिद्रे प्रणिहितां यां काञ्चनस्विन्नकलायवाहिनीं द्वादशाङ्गुलां नाडीं कर्णविवरे प्रणिधायेति हृदयम् । मोनेति मांसजैः पिण्डैः पयसा घनीभूतेन क्षीरेण च स्वेदं कुर्व्वीत परितः कर्णावित्यभिसन्धिः । अश्वत्थेति । इदमत्रावधेयम् । तैलाक्तैर्दशभिरश्वत्थपत्रैश्चतुरङ्गुलं वाऽधस्तात् कलायमात्रछिद्रं कोटराकारं पात्रं ज्वलदङ्गारेण प्रपूर्य्य तत् खल्लछिद्रं कर्णविवराभिमुखं कृत्वाग्निसन्तापात् च्युतेन तैलेनाकर्णपूरणात् पात्रमेतत् कर्णोपरिस्थापयितुमिदमुच्यते अश्वत्थेति । क्षौमेति । धूपयेत् नाडीस्वेदविधिनेत्यभिसन्धिः । भक्तेति । भक्तोपरि अन्नेनसहेत्यर्थः हितं वातहरद्रव्यसिद्धत्वेन पथ्यम् ॥ २—३ ॥

कण्टकारीमजाक्षीरे पक्त्वा क्षीरेण तेन च।
विपचेत् कुक्कुटवसां कर्णयोस्तत् प्रपूरणम् ॥ ५ ॥
तण्डुलीयकमूलानि फलमङ्कोठजं तथा।
अहिंसाकेन्दुकीमूलं सरलं देवदारु च ॥
लशुनं शृङ्गवेरञ्च तथा वंशावलेखनम्।
कल्कैरेषां तथाम्लैश्च पचेत् स्नेहं चतुर्व्विधम् ॥
वेदनायाः प्रशान्त्यर्थं हितं तत् कर्णपूरणम् ॥ ६ ॥
लशुनार्द्रकशिग्रूणां सुरङ्गाया मूलकस्य च।
कदल्याः स्वरसः श्रेष्ठः कदुष्णः कर्णपूरणे ॥ ७ ॥
शृङ्गवेरसः क्षौद्रं सैन्धवं तैलमेव च।
कदुष्णं कर्णयोर्देयमेतद्वा वेदनापहम् ॥ ८ ॥
वंशावलेखसंयुक्ते मूत्रे चाजाविके भिषक्।
सर्पिः पचेत् तेन कर्णौ पूरयेत् कर्णशूलिनः ॥ ९ ॥

---

निरूहइति। तद्धितत्वेनोपदिष्टम्। मस्तिष्कहिताय घ्रातेन धारणम्। मस्तिष्कम्। वलातैलं मूढगर्भचिकित्सिते व्याहृतम्। कण्टकारीमिति। पक्त्वाक्षीरपाकविधिनेतिशेषः, तेन क्षीरेण चतुर्गुणेनेत्येव अत्र "क्षीरमस्वारणा लाद्यैः × × × जलं चतुर्गुणन्तत्र" इति स्मरणात् जलमपि चतुर्गुणं देयम्। तण्डुलीयकेति। अङ्कोठो नामौषधिः 'ढीकड़ा' इति अहिंस्रा च 'काटानर' इत्यभिधीयते। केन्दुकस्तिन्दुकः "गाव" इति प्रसिद्धः स्वल्पः केन्दुकः केन्दुकी कृष्णाख्यादिषु पठ्यते। अवलिख्यतेऽनेत्यवलेखनम् वंशस्यावलेखनम् वंशावलेखनम् वेणोः प्रथमात्वगिति निष्कर्षः; अम्लैर्यथालाभं व्यस्त समस्तैश्चतुर्गणे "सू०४२

महतः पञ्चमूलस्य काष्ठान्यष्टाङ्गुलानि च ।
क्षौमेणावेष्ट्य संसिच्य तैलेनादीपयेत् ततः ॥
यत् तैलं च्यवते तेभ्यो ग्राह्यं तत् भाजनोपरि ।
ज्ञेयं तद्दीपिकातैलं सद्यो गृह्णाति वेदनाम् ॥ १० ॥
कुर्य्यादेवं भद्रकाष्ठे कुष्ठे काष्ठे च सारले ।
मतिमान् दीपिकातैलं कर्णशूलनिवर्हणम् ॥ ११ ॥
अर्काङ्कुरानम्लपिष्टांस्तैलाक्तान् लवणान्वितान् ।
सन्निदध्यात् स्नुहीकाण्डे क्रोड़िते तच्छदावृते ॥
पुटपाकक्रमस्विन्नान् पीड़येदारसागमात् ।
सुखोष्णं तद्रसं कर्णे दापयेच्छूलशान्तये ॥ १२ ॥
कपित्थमातुलुङ्गाम्ल-शृङ्गवेररसैः शुभैः ।
सुखोष्णैः पूरयेत् कर्णं तच्छूलविनिवृत्तये ॥ १३ ॥

---

१ ' उक्ताम्लवर्गीयेषु मध्ये दाड़िमादीनां स्वरसैः दध्यादिभिश्च । लशुनेति षट्स्वेतेषुमध्ये मध्यवर्त्तिनोस्त्वचो शेषाणां कन्दा गृह्यन्ते । सुरक्षीरक्तशोभाञ्जनः । वंशेति । वंशावलेखोऽत्रकल्कः । महत इति तैलेनसार्षपेणेत्युपदेशः ॥ ४—११ ॥

अर्केति अर्काङ्कुरान् । सद्यः शाखामुद्भिद्य जातानर्कच्छदान् । क्रोड़साम्यात् क्रोड़ं विवरम जातमस्येति क्रोड़ितम् अत क्रोड़िते स्नुहीकाण्डे स्नुहीकाण्डक्रोड़इति तात्पर्य्यम् विशिष्ये तात्पर्य्यानुपपत्तेः ।

कर्णं कोष्णेन चक्रेण पूरयेत् कर्णशूलिनः ॥ १४ ॥
समुद्रफेनचूर्णेन युक्त्या वाप्यवचूर्णयेत् ॥ १५ ॥
अष्टानामिह मूत्राणां मूत्रेणान्यतमेन वा।
कोष्णेन पूरयेत् कर्णं कर्णशूलोपशान्तये ॥ १६ ॥
मूत्रेष्वम्लेषु वातघ्ने गणे च क्वथिते भिषक्।
पचेच्चतुर्व्विधं स्नेहं पूरणं तच्च कर्णयोः ॥ १७ ॥
एता एव क्रियाः कुर्य्यात् पित्तघ्नैः पित्तसंयुते ॥ १८ ॥
काकोल्यादौ दशक्षीरं तिक्तस्याच्च हितं हविः ॥ १९ ॥
क्षीरवृक्षप्रवालेषु मधुके चन्दने तथा।
कल्कक्वाथे परं पक्वं शर्करामधुकैः सरैः ॥ २० ॥
इङ्गुदीसर्षपस्नेहौ सकफे पूरणे हितौ।
तिक्तौषधानां यूषाश्च स्वेदाश्च कफनाशनाः ॥ २१ ॥
सुरसादौ कृतं तैलं पञ्चमूले महत्यपि ॥ २२ ॥

---

मूत्रेष्विति। अम्लेषु "सू० ४२अ०" अम्लवर्गोक्तेषु दाड़िमादिषु। वातघ्नोगणः "सू० ३९अ०" उक्तोभद्रदार्व्वादिर्वातसंशमनोगणः। मूत्रेष्विति। अम्लेषु 'सू० ४२ अ०" उक्तेष्वम्लवर्गाभिहितेषु द्रव्येषु वातघ्ने "सू० ३९ अ०" उक्ते वातसंशमने भद्रदार्व्वादिगणे। सम्प्रत्युपदिष्टानि स्वेदादीनि वातपैत्तिके कर्णशूले पित्तप्रत्यनीकेन भेषजेन सहान्वीयोपयोक्तुमिदमुच्यते एता इति। अत एताएवेति विशेषणसङ्गतोऽयमेवशब्दः पित्तसंयुते कर्णशूले कर्णशूलं प्रकृत्योपदिष्टेषु स्वेदादिषु पित्तहरद्रव्यायोगं व्यवच्छिनत्ति। दशगुणं क्षीरं मत्रेति दशक्षीरम्। काकोल्यादिः "सू० ३८ अ०" तिक्तं महातिक्तकं नाम हविश्च "चि० ६अ०" द्रष्टव्यम्। पानार्थं सर्पिश्चतुष्कमुप-

मातुलुङ्गरसः शुक्तं लशुनार्द्रकयो रसः।
एकैकः पूरणे पथ्यस्तैलं तैश्चाथवा कृतम्॥ २३॥
तीक्ष्णा मूर्द्धविरेकाश्च कवलाश्चात्र पूजिताः॥ २४॥
कर्णशूलविधिः कृत्स्नः पित्तघ्नः शोणिताहते॥ २५॥
शूलप्रणादबाधिर्य्यं क्ष्वेडानान्तु प्रकीर्त्तितम्।
सामान्यतः—
विशेषेण बाधिर्य्ये पूरणं शृणु॥ २६॥
गवां मूत्रेण बिल्वानि पिष्ट्वा तैलं विपाचयेत्।
सजलञ्च सदुग्धञ्च बाधिर्य्ये कर्णपूरणम्॥ २७॥

---

दिशति क्षारेति। प्रवालेष्वभिनवपल्लवेषु, सर्वैर्विरेचनद्रव्यैः। पक्वं प्रशस्तत्वात् हविः। परं उत्कृष्टं कर्णशूलहरमित्यर्थः। अत्र शर्करादिभिः कल्कीकृतैरेव हविर्विपाच्यमिति गम्यते करणनिर्द्देशात्। वदन्ति हि "यत्राधिकरणेनोक्तिः × × × तत्रैव कल्कनिर्यूहौ" इति। वातस्योक्तं कर्णशूल चिकित्सितं प्रवर्त्तयति इङ्गुदीति। तिक्तौषधानि "सू० ४२ अ०" तिक्तवर्गाभिहितान्यारग्वधादीनि, कफनाशनाः स्वेदास्तु "चि० ३२अ०" विधिनश्चकाशिरे तापोष्णेतिनामधेयहितयेन। सुरसादिं "सू० ३८अ०" निरदिक्षत्। सम्प्रति कर्णशूले प्रणादेचेत्यादिनोक्तमर्थमुपसंहरति शूलेत्यादिना सामान्यत इत्यन्तेन ग्रन्थेन॥ १२—२६॥

बाधिर्य्यं प्रति पुनर्विशिनष्टि विशेषेणेति। तत्र प्रथमन्तावद् जल चतुर्गुणेनाजाक्षीरचतुर्गुणेन च बिल्वफलकल्के द्वे तैले निर्द्दिदिक्षति गवामिति। बिल्वानि बिल्वफलानि, पिष्ट्वा कल्कीकृत्य सदुग्धं छागदुग्धचतुर्गुणमित्यव-

सितामधुकबिम्बीभिः सिद्धं वाजे पयस्यथ ।
सिद्धं वा विल्वनिःक्वाथे शीतीभूतं तदुद्धृतम् ॥
पुनः पचेद्दशक्षीरं सितामधुकचन्दनैः ॥
विल्वाम्बुगाढ़ं तत् तैलं वाधिर्य्ये कर्णपूरणम् ॥ २८ ॥
वक्ष्यते यः प्रतिश्याये विधिः सोऽप्यत्र पूजितः ॥ २६ ॥
वातव्याधिषु यश्चोक्तो विधिः स च हितो भवेत् ॥ ३० ॥
कर्णस्रावे पूतिकर्णे तथैव कृमिकर्णके ।
समानं कर्म्म कुर्व्वीत योगान् वैशेषिकानपि ॥
शिरोविरेचनञ्चैव धूपनं पूरणं तथा ।
प्रमार्ज्जनं धावनञ्च वीक्ष्य वीक्ष्यावचारयेत् ॥ ३१ ॥

---

गन्तव्यम्, 'साजक्षीरं तद्विहरेत्'' इति तन्त्रान्तरीयैकवाक्यत्वात्। अत्रापि वीर्य्याधानार्थं जलं चतुर्गुणं देयमित्युपदेष्टव्यम्। सितेति। अत्राद्येन वा शब्देन पूर्व्वस्मात् तैलमितिपदमाकृष्यान्वीयते, अन्त्येन च सितामधुकबिम्बीभिरिति, अथ शब्देन च पक्षान्तरमुपदिश्यत इति गम्यते तदेवं ब्रूमः— कल्कीकृतैः सितादिभिराजे पयसि सिद्धम् अथवा तैरेव सितादिभि र्विल्व-मूलनिःक्वाथे सिद्धम् उद्धृतम् चुल्लीमस्तकतोऽवतारितम् शीतीभूतं तत् तैलं पुनर्दशक्षीरं दशगुणक्षीरम् विल्वाम्बुनोऽतिशयोऽत्रेति विल्वाम्बुगाढ़म्। अष्टगुणविल्वमूलक्वाथमित्येतत् कल्कीकृतैः सितामधुकचन्दनैः पचेत् तत् तैलं वाधिर्य्ये कर्णपूरणम्। कर्णेति। समानं कर्म्मकुर्व्वीत प्रायेणैषां त्रयाणां दोषदूष्यतस्तुल्यत्वादित्यभिसन्धिः। तत् समानं कर्म्म दर्शयति

राजवृक्षादितोयेन सुरसादिगणेन वा ।
कर्णप्रक्षालनं कार्य्यं चूर्णैरेषाञ्च पूरणम् ॥
चूर्णं पञ्चकषायोत्थं कपित्थरसयोजितम् ।
कर्णस्रावे प्रशंसन्ति पूरणं मधुना सह ॥ ३२ ॥
सर्ज्जत्वक्चूर्णसंयुक्तः कार्पासीफलजो रसः ।
योजितो मधुना वापि कर्णस्रावे प्रशस्यते ।
लाक्षासर्ज्जरसौ वापि चूर्णितौ कर्णपूरणम् ॥
सशैवलमहावृक्ष-जम्ब्वाम्रप्रसवायुतम् ।
कुलीरक्षौद्रमण्डूकीसिद्धं तैलञ्च पूजितम् ॥

---

शिरइति । अत्रनीत्यवोच्येति विशेषणात् शिरोऽभिताप गौरवशूलेषु शिरोविरेचनम् । स्रावदौर्गन्ध्यशूलेषु धूपनपूरणे, संसक्तदोषे प्रमार्ज्जनम् उष्णमालादिसंशोधनौषधसंसृष्टेन गोमूत्रादिना प्रक्षालनपुरःसरं कार्पासकृतोष्णीषेण शलाकायन्त्रेणावधानतो मार्ज्जनमिति यावत् । क्रिमिपूयादिष्वनुभूतेषु तेषामपाकरणार्थं धावनमित्यध्यवसितव्यम् ॥ २७—३१ ॥

राजेति । राजवृक्षादिर्नामगणः "सू० ३८ अ०" आरग्वधादिरित्युपदिदेशः । पञ्चकषाय शब्दोऽय मायुर्व्वेदे परिभाषाविशेषेण क्षीरिवृक्षानेवाभिधत्ते । यदाह "पञ्चैते क्षीरिणोवृक्षाः कषायाः पञ्चकीर्त्तिताः" इति मधुनासह द्रवीकृत्येतिनेयम् स्रोतोऽवरोधप्रसङ्गात् । सर्ज्जेति । सर्ज्जत्वक् पीतशालत्वक्, चूर्णस्यास्योपसर्ज्जनीभूतत्वादन्वो मात्रेतिगम्यते । कार्पासी कार्पासश्चेति पर्य्यायौ, पश्चान्तर माह योजित इति । स रसो मधुना वा योजितः प्रशस्यते । कर्णपूरण इति हृदयम् । लाक्षेति अत्र वा शब्दान्मधुना योजिताविति गम्यते । मात्राचानयोर्म्मानेव । शेति शैवलं शैवालमित्य-

तिन्दुकान्यभया रोध्रं समङ्गामलकं मधु ।
पूरणाञ्चाव पथ्यं स्यात् कपित्थरसयोजितम् ॥
रसमाम्रकपित्थानां मधूकधवशाल्लजम् ।
पूरणार्थं प्रशंसन्ति तैलं वा तैर्विपाचितम् ॥
प्रियङ्गुमधुकाम्बष्ठा-धातकीशीतपर्णिभिः ।
मञ्जिष्ठालोध्रलाक्षाभिः कपित्थस्य रसेन वा ।
पचेत् तैलं तदास्रावमवगृह्णाति पूरणात् ॥
घृष्टं रसाञ्जनं नार्य्याः क्षीरेण क्षौद्रसंयुतम् ।
प्रशस्यते चिरोत्थेऽपि सास्रावे पूतिकर्णके ॥
निर्गुण्डीस्वरसस्तैलं सिन्धुधूमरजो गुड़ः ।
पूरणः पूतिकर्णस्य शमनो मधुसंयुतः ॥ ३३ ॥
कृमिकर्णकनाशार्थं कृमिघ्नं योजयेद्विधिम् ।

---

नर्थान्तरम् । महाह्वः स्नुही, प्रसवो नवपल्लवः । क्षुद्र एव क्षौद्रः क्षौद्रशब्दोऽयं कुलीर मण्डूकीसमभिव्याहाराद् भीमो भीमसेन इतिवत् क्षुद्रशङ्खेष्वभिधत्ते इति निश्चीयते । तथा च कर्कटकं शम्बूकं मण्डूकीञ्च कल्कीकृत्य शैवलादीनां चतुर्गुणे क्वाथे सिद्धं तैलं कर्णपूरणे पूजित मित्यवगन्तव्यम् । प्रियङ्ग्विति । अम्बष्ठा पाठा शीतपर्णी अर्कपुष्पी, अत्र प्रियङ्ग्वादीनां कल्कः कपित्थस्वरसः कपित्थफलस्य क्वाथः । निर्गुण्डीति । अत्र मधुतैलनिर्गुण्डीस्वरसानां प्रत्येकशः शानं शेषाणान्तु रक्तिकेत्युपदेशः । सैन्धवगृहधूमयोश्चूर्णं सिन्धुधूमरजः । कृमीति । कृमीघ्नं "सुरसादिर्हितस्तत्र"

वार्त्ताकुधूमश्च हितः सार्षपस्नेह एव च।
क्रिमिघ्नं हरितालेन गवां मूत्रयुतेन च॥ ३४॥
गुग्गुलुः कर्णदौर्गन्ध्ये धूपनं श्रेष्ठमुच्यते।
छर्द्दनं धूमपानञ्च कवड़स्य च धारणम्॥ ३५॥
कर्णस्रुड़े हितं तैलं सार्षपञ्चैव परणम्॥ ३६॥
विद्रधौ वापि कुर्व्वीत विद्रध्युक्तं चिकित्सितम्॥ ३७॥
प्रक्लेद्य धीमांस्तैलेन स्वेदेन प्रविलाप्य च।
शोधयेत् कर्णविट्कन्तु भिषक् सम्यक्शलाकया॥ ३८॥
नाड़ीस्वेदोऽथ वमनं धूमो मूर्द्धविरेचनम्।
विधिश्च कफहृत् सर्व्वः कर्णकण्डूमपोहति॥ ३९॥
अथ कर्णप्रतीनाहे स्नेहस्वेदौ प्रयोजयेत्।
ततो विरिक्तशिरसः क्रियां प्राप्तां समाचरेत्॥ ४०॥
कर्णपाकस्य भैषज्यं कुर्य्यात् पित्तविसर्पवत्॥ ४१॥
कर्णछिद्रे वर्त्तमानं कीटं क्लेदमलादि वा।
शृङ्गेणापहरेद्धीमानथवापि शलाकया॥ ४२॥

---

इत्यादिना द्विव्रणीयोक्तम् विधिम्। विशेषतस्तु "तारपिन" इति प्राकृत नामधेयेनाभिहितम् शल्लकी तैलञ्च योजयेत्, क्रिमिघ्नमिति। अत्र प्रक्षालन मित्युह्यम् तथैवोपयोगदर्शनात्। गुग्गुलुरिति। कर्णदुर्गन्धे पूतिकर्णे। धूप्यतेऽनेनेति धूपनम् गुग्गुलुःश्रेष्ठं धूपनमिति समन्वयः। प्रक्लेद्येति कर्णविट्कं कर्णगूथम्, प्राप्तामुचितां शिरःशूलादिहराम्।

शेषाणान्तु विकाराणां प्राक् चिकित्सितमीरितम् ॥ ४३

इति सुश्रुतसंहितायामुत्तरतन्त्रे कर्णरोगप्रतिषेधो नामैकविंशोऽध्यायः ॥ २१ ॥

---

शेषाणामर्शोऽर्व्वुदशोफानाम् । परिशिष्टं निगदव्याख्यातम ॥ ३२—४३ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे कर्णगतरोगप्रतिषेधोनामैकविंशोऽध्यायः ॥

## द्वाविंशोऽध्यायः ।

अथातो नासागतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥ १ ॥

अपीनसः पूतिनस्यं नासापाकस्तथैव च ।
तथा शोणितपित्तञ्च पूयशोणितमेव च ॥
क्षवथुर्भ्रंशथुर्दीप्तो नासानाहः परिस्रवः ।
नासाशोषेण सहिता दशैकास्तेरिता गदाः ॥

---

उपक्रमागतं नासागतरोगविज्ञानीयमधिकरोति अथात इत्यादिना ॥ १ ॥
प्राग्वदामतो रोगानभिधत्ते अपीति । दशएकश्च परिमाणमेषां दशैकाः ।

चत्वार्य्यर्शांसि चत्वारः शोफाः सप्तार्बुदानि च।
प्रतिश्यायाश्च ये पञ्च वक्ष्यन्ते सचिकित्सिताः।
एकत्रिंशन्मितास्ते तु नासारोगाः प्रकीर्त्तिताः॥ २

आनह्यते यस्य विधूप्यते च पापच्यते क्लिद्यति चापि नासा।
न वेत्ति यो गन्धरसांश्च जन्तुर्जुष्टं व्यवस्येत् तमपीनसेन।
तञ्चानिलश्लेष्मभवं विकारं ब्रूयात् प्रतिश्यायसमानलिङ्गम्॥ ३
दोषैर्व्विदग्धैर्गलतालुमूले संमूर्च्छितो यस्य समीरणस्तु।
निरेति पूतिर्मुखनासिकाभ्यां तं पूतिनस्यं प्रवदन्ति रोगम्॥४
घ्राणाश्रितं पित्तमरूंषि कुर्य्याद् यस्मिन्विकारे बलवांश्च पाकः।
तं नासिकापाकइति व्यवस्येत् विक्लेदकोथावपि यत्र दृष्टौ॥ ५

---

अवधारणार्थोऽयं च शब्दः दशैकाएव ईरिताः प्रपञ्चेन कथिता भविष्यन्ति शेषास्तु विंशतिर्लेशमात्रेणेत्यभिसन्धिः॥ २॥

उक्तमर्थं पुनर्लक्षणतोनिवेदयति आनह्यत इति। आनह्यते वातसङ्कुचित स्रोतस्त्वेन स्वयमेव बध्यते। विधूप्यते पित्तदुष्टत्वेन स्वयमेव सन्तप्यते। क्लिद्यति श्लेष्मान्वयात् क्लिन्नोभवति। एवं सान्निपातिकमपीनसमुपदिश्य वातश्लेष्मिकं पुनरुपदिदिक्षति तञ्चेति। तुशब्दस्थानाधिष्ठानोऽयं च शब्दः प्रतिश्यायस्त्वतो न्याय्यत्वात् वातश्लैष्मिक एव प्रत्येतव्यः। दोषैरिति। विदग्धैर्विदाहजनकेन तेन तेन निदानविशेषेणाक्लोभावमापन्नैर्दोषैर्वातस्य दूष्यत्वेनेह विवक्षितत्वात् परिशिष्टैः कफपित्तशोणितैर्गलतालुमूले जतु सन्निहिते गलाभ्यन्तरे देशे, नासास्रोतोऽवसाने तालुदेशेच, संमूर्च्छितः कुपितत्वेन प्रवृद्धः समीरणः पूतिर्विदग्धदोषदूष्टत्वेन दुर्गन्धीभूतः सन् यस्य

चतुर्व्विधं द्विप्रभवं द्विमार्गं वच्यामि भूयः खलु रक्तपित्तम् ।
तल्लचणं नासिकरक्तपित्तम् जानीहि नासाप्रभवप्रवृत्तम् ॥ ६ ॥
दोषैर्व्विदग्धैरथवापि जन्तोर्ल्ललाटदेशेऽभिहतस्य तैस्तैः ।
नासास्रवेत् पूयमसृग्विमिश्रं तं पूयरक्तं प्रवदन्ति रोगम् ॥ ७ ॥
घ्राणाश्रिते मर्म्मणि सम्प्रदुष्टे यस्यानिलो नासिकया निरेति ।
कफानुयातो बहुशः सशब्द-स्तं रोगमाहुः चवथुं विधिज्ञाः ॥८

---

मुखनासिकाभ्यां निरेति तस्य तं पूतीभूतं समीरणं वाहुल्येन नासानुसारित्वात् पूतिनस्यं नाम रोगं वदन्ति । घ्राणेति । यस्मिन् विकारे घ्राणाश्रितं पित्तमसृंषि कुर्य्यात् बलवान् पाकश्चभवेत् तं विकारं नासिकापाक इति व्यवस्येत् । असृंष्यन्तरेणापि नासापाकमुपदिशति विक्लेदेति । अपेः समुच्चयार्थत्वात् यत्र च विकारे विक्लेदकोथावेव दृष्टौ भवेतां न पुनरसृंषीत्येवं व्याख्येयम् । "असति बाधे सर्व्वं वाक्यं सावधारणम्" इति न्यायात् । अत्र "इक्षुवने तिलका" इतिवत् उभयत्र कथञ्चिदधिकरणविवक्षया सप्तमीनिर्द्देशः । चतुरिति । अत्र वातपित्तकफसन्निपात निमित्तेष्वितरेषा मन्तर्भावात् चतुर्विधमित्युपदिष्टम् । द्विप्रभवं आमपक्वाशयोद्भवम् । द्विमार्गं ऊर्द्ध्वाधोगतिकम् । वक्ष्यामि लक्षणतो निवेदयामि । तस्य वक्ष्यमाणस्य रक्तपित्तस्य लक्षणमिव लक्षणमस्येति तल्लक्षणम् किन्तु खल्वेतावता वातादिजत्वमिव ऊर्द्ध्वाधोगतिकत्वमामपक्वाशयोद्भवत्वञ्चाप्यतिदिश्यते ? नेत्याह नासाप्रभवप्रवृत्तमिति । इदन्तु तल्लक्षणमपि नासाप्रभवत्वेन नासाप्रवृत्तत्वेन च ततो भिद्यत इति निष्कर्षः ॥ ६—७ ॥

घ्राणेति । घ्राणाश्रिते मर्म्मणि "शां ६ अ०" "घ्राणश्रोत्रेत्यादिना"

तीक्ष्णोपयोगादभिजिघ्रतो वा भावान् कटूनर्कनिरीक्षणाद्वा।
सूत्रादिभिर्वा तरुणास्थिमर्म्मण्युद्घाटितेऽन्यः क्षवथुर्निरेति ॥९

प्रभ्रश्यते नासिकयैव यस्य सान्द्रो विदग्धो लवणः कफस्तु।
प्राक् सञ्चितो मूर्द्ध्नि च पित्ततप्तं प्रभ्रंशथुं व्याधिमुदाहरन्ति॥१०

घ्राणे भृशं दाहसमन्विते तु विनिःसरेद्धूम इवेह वायुः।
नासा प्रदीप्तेव च यस्य जन्तोर्व्याधिन्तु तं दीप्तमुदाहरन्ति ॥११॥

कफावृतो वायुरुदानसंज्ञो यदा स्वमार्गे विगुणः स्थितः स्यात्।
घ्राणं वृणोतीव तदा स रोगो नासाप्रतीनाह इति प्रदिष्टः॥
॥ १२ ॥

अजस्रमच्छं सलिलप्रकाशं यस्याविवर्णं स्रवतीह नासा।
रात्रौ विशेषेण हि तं विकारं नासापरिस्राव इति व्यवस्येत्॥
॥ १३ ॥

घ्राणाश्रिते श्लेष्मणि मारुतेन पित्तेन गाढं परिशोषिते च।
समूच्छ्वसित्यूर्द्ध्वमधश्च कृच्छ्राद् यस्तस्य नासापरिशोष उक्तः॥
॥ १४ ॥

---

शिवेदिते शृङ्गाटकसमाख्ये मर्म्मणीत्यर्थः। अर्कनिरीक्षणादिति। ईक्षतेरिह आलोचनमात्रे वृत्तिः न पुनश्चाक्षुषज्ञाने प्रत्यक्षविरोधात्। नार्थोऽय मनुपपन्नः "न कामवृत्तिर्वचनीय मीक्षते" इति तदर्थे कालिदास प्रयोग-दर्शनात्। आलोचनन्तु प्राथमिकं ज्ञानं यदाहुः सांख्याः—"अस्तिह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम्" इति। तथाच प्रकृतत्वात् नासारन्ध्रेणार्क-किरणस्य यथा कथञ्चित् संस्पर्शात् इति तात्पर्य्यम्। प्रभ्रश्यत इति

दोषैस्त्रिभिस्तैः पृथगेकशश्च ब्रूयात् तथार्शांसि तथैव शोफान् ॥
॥ १५ ॥

शालाक्यसिद्धान्तमवेक्ष्य वापि सर्व्वात्मकं सप्तममर्व्वुदन्तु ॥
॥ १६ ॥

रोगः प्रतिश्याय इह प्रदिष्टः स वक्ष्यते पञ्चविधः पुरस्तात् ॥
॥ १७ ॥

शोफाश्च शोफविज्ञाने नासास्रोतोव्यवस्थिताः ।

---

यस्य सान्द्रादिलक्षणः कफः नासिकया कर्त्तृभूतया प्रभ्रश्यते अधःपात्यते तस्य तं व्याधिं प्रभ्रंशथुमुदाहरन्ति ॥ ८—१४ ॥

दोषैरिति । अत्र पित्तजे अर्शसि रक्तजस्य दोषज मात्रे च सहजस्यान्त र्भावोमन्तव्यः सहजानि प्रकृत्य "तेषां दोषत एव प्रसाधनं कर्त्तव्यम् इति स्मरणात्, तथा पित्तजे शोफे रक्तजशोफस्य रक्तपित्तजे चागन्तुकस्य चान्तर्भावो द्रष्टव्यः । यदुक्तं "पित्तरक्तलक्षण आगन्तुः" इति । एवञ्चातुरशरीरे प्रायेण परिलक्ष्यमाणेषु षट्स्वर्शःसु षट्सु च शोफेषु मध्ये वाहुल्यानुशयात् चत्वार्य्यर्शांसि चत्वारश्च शोफा एव सुस्पष्टमुपदिष्टा इत्यवगन्तव्यम् । पूर्व्वं हि "वातेन पित्तेन" इत्यादिना ग्रन्थ्यादिनिदाने षड्विधमेवार्व्वुदं निर-दिक्षत् । इह तु दोषाधिष्ठानशक्तं रचिन्त्यत्वात् यदपरं सान्निपातिकमर्व्वुदमुच्यते तदेवोपदिशन्नाह शालाक्येति ।

नक्षत्रसा विशालत्वेन दुरवगाहं ग्रन्थमिममवगाह्य सर्व्वे भिषजः प्रभवन्ति प्रागुक्तमर्थजातमनुसन्धातुम् । तदिदमुच्यते शोफाइति । शोफशब्देनेह शोफसामान्यादर्व्वुदान्यप्युपदिश्यन्ते तथाच नासा स्रोतो

निदानेऽर्शांसि निर्दिष्टान्येवं तानि विभावयेत् ॥ १८ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे नासागतरोगविज्ञानीयो नाम द्वाविंशोऽध्यायः ॥ २२ ॥

---

अवस्थिताः शोफा अर्व्वुदानिव शोफविज्ञाने आमपक्कैषणीये ग्रन्थ्यादि निदानेष्वित्यर्थः। परिशिष्टं निगदव्याख्यातम् ॥ १५—१८ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये नासागतरोगविज्ञानीयोनाम द्वाविंशोऽध्यायः ॥

---

## त्रयोविंशोऽध्यायः।

अथातो नासागतरोगप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

पूर्व्वहिष्टे पूतनस्ये च जन्तोः स्नेहस्वेदौ छर्द्दनं स्रंसनञ्च।

---

प्रक्रान्तत्वादिदानीं नासागतरोगप्रतिषेधमधिकरोति अथात इत्यादिना ॥१

पूर्व्वोद्दिष्टे इति। पूर्व्वोद्दिष्टे अपीनसे। धूमोऽत्र दोषवलमभिसमीक्ष्य

युक्तं भक्तं तीक्ष्णमल्पं लघु स्या दुष्णं तोयं धूमपानञ्च काले ॥
हिङ्गु व्योषं वत्सकाख्यं शिवाटी लाक्षा वीजं सौरभं कट्-
फलञ्च ।
उग्रा कुष्ठं तीक्ष्णगन्धा विडङ्गं श्रेष्ठं नित्यञ्चावपीड़े करञ्जम् ॥
एतैर्द्रव्यैः सार्षपं मूत्रयुक्तं तैलं धीमान् नस्यहेतोः पचेच्च ॥ २ ॥
नासापाके पित्तहृत् संविधानं कार्य्यं सर्व्वं वाह्यमाभ्यन्तरञ्च ।
हृत्वा रक्तं क्षीरवृक्षत्वचश्च साज्याः सेका योजनीयाश्च लेपाः
॥ ३ ॥
वद्यग्राम्यूर्द्ध्वं रक्तपित्तोपशान्तिं नाड़ीवत् स्यात् पूयरक्ते चिकि-
त्सा ।
वान्ते सम्यक् चावपीड़ं वदन्ति तीक्ष्णं धूमं शोधनञ्चात्र नस्यम्
॥ ४ ॥
क्षेप्यं नस्यं मूर्द्धवैरेचनीयैर्नाड्या चूर्णं क्षवथौ भ्रंशथौ च ।
कुर्य्यात् स्वेदान् मूर्द्ध्नि वातामयघ्नान् स्निग्धान् धूमान् यद्‌यद-
न्यद्धितञ्च ॥ ५ ॥

---

स्नैहिको वैरेचनिको वा प्रयोक्तव्यः । हिङ्ग्विति । शिवाटी वंशपत्रस्तृण
विशेषः "वंशपत्री वेणुपत्री पिण्डा हिङ्गुशिवाटिकाः" इति पर्य्यायाः ।
तुलस्यादिदं सौरभम् । उग्रा वचा तीक्ष्णगन्धा राजिका "राइ" इति
विख्यायते । नासेति हृत्वा जलौकोभिरिति शेषः । नाड़ीवत् नाड़ी-
व्रणवत् । मूर्द्धवैरेचनीयैः शिरोविरेचनीयैः ॥ २—५ ॥

दीप्ते रोगे पैत्तिकं संविधानं कुर्य्यात् सर्व्वं स्वादु यच्छीतलञ्च ॥ ६ ॥

नासानाहे स्नेहपानं प्रधानं स्निग्धा धूमा मूर्द्धवस्तिश्च नित्यम्।
बलातैलं सर्व्वथैवोपयोज्यं वातव्याधावन्यदुक्तञ्च यद्यत् ॥ ७ ॥

नासास्रावे घ्राणतश्चूर्णमुक्तं नाड्या देयं याऽवपीडश्च तीक्ष्णः।
तीक्ष्णं धूमं देवदार्व्वग्निकाभ्यां मांसं चाजं युक्तमत्रादिशन्ति ॥ ८ ॥

नासाशोषे क्षीरसर्पिः प्रधानं सिद्धं तैलञ्चाणुकल्पे च नस्ये।
सर्पिः पानं भोजनं जाङ्गलैश्च स्नेहः स्वेदः स्नैहिकश्चापि धूमः ॥ ९ ॥

शेषान् रोगान् घ्राणजान् सन्नियच्छेदुक्तं तेषां यद्यथा संविधानम् ॥१०॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे नासागतरोगविज्ञानीयो नाम त्रयोविंशोऽध्यायः ॥ २३ ॥

---

दीप्त इति बलातैलं "चि० १५ अ०" व्याहृतम्। नासेति। क्षीरोत्थं सर्पिः क्षीरसर्पिः अणुकल्पे सिद्धं वातव्याधिचिकित्सिते उपदिष्टम् अणुतैलम्। शेषानिति। अत्र रक्तपित्तस्य प्रतिकारविधे-र्वक्ष्यमाणत्वेऽपि उक्तमिति नानुपपन्नम् "भूम्ना" इति जैमिनिसूत्रस्मरणात् बहुशो ह्युक्त मल्पग्रन्था-नुक्त मित्याकूतम् ॥ ६—१० ॥

इति श्रीहाराणचन्द्र चक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये नासागतरोग प्रतिषेधोनाम त्रयोविंशोध्यायः ॥

# चतुर्विंशोऽध्यायः।

अथातः प्रतिश्यायप्रतिषेधं व्याख्यास्यामः ॥ १ ।

नारीप्रसङ्गः शिरसोऽभितापो धूमो रजः शीतमतिप्रतापः ।
सन्धारणं मत्रपूरीषयोश्च सद्यः प्रतिश्यायनिदानमुक्तम् ॥ २
चयं गता मूर्द्धनि मारुतादयः पृथक् समस्ताश्च तथैव शोणितम् ।
प्रकोप्यमाणा विविधैः प्रकोपणै-र्नृणां प्रतिश्यायकरा भवन्ति हि ॥
शिरोगुरुत्वं क्षवथोः प्रवर्त्तनं तथाङ्गमर्द्दः परिहृष्टरोमता ।
उपद्रवाश्चाप्यपरे पृथग्विधा नृणां प्रतिश्यायपुरःसराः स्मृताः ॥
॥ ३ ॥

---

उपक्रम क्रमागतं व्याचिख्यासितत्वेनोररीकृतञ्च प्रतिश्याय प्रतिषेध मधिकरोति अथात इत्यादिना। प्रतिश्यायश्च प्रतिषेधश्च प्रतिश्याय प्रतिषेधं षष्ठी समासेत्विहनिदानोपदेशः प्रतिश्यायप्रवर्त्तत्वात् प्रासङ्गिक इत्युन्नेयम्। नासारोगत्वेनोपदिष्टस्यास्य पृथक्त्वेनेहोपदेशः पूर्व्वाचार्य्यक्रमानुसरणादेवेति बुद्धिमारोहति ॥ १ ॥

नारीति। धूमोरजश्च नासिकाप्रविष्ट इत्येव। सद्यः सत्वराव्यवहितर इत्यर्थः आयुर्व्वेदे हि सद्यःशब्दः प्रायेण तदर्थ एव प्रयुज्यते। तथाहि

आनद्धा पिहिता नासा तनुस्रावप्रवर्त्तिनी ।
गलताल्वोष्ठशोषश्च निस्तोदः शङ्खयोस्तथा ॥
स्वरोपघातश्च भवेत् प्रतिश्यायेऽनिलात्मके ।
उष्णः सपीतकः स्रावो घ्राणात् स्रवति पैत्तिके ॥
कृशोऽतिपाण्डुः सन्तप्तो भवेत् तृष्णाभिपीड़ितः ।
सधूमं सहसा वह्निं वमतीव च मानवः ॥ ४ ॥
कफः कफकृते घ्राणाच्छुक्लः शीतः स्रवेन्मुहुः ।
शुक्लावभासः शूनाक्षो भवेद्गुरुशिरोमुखः ॥
शिरोगलौष्ठतालूनां कण्डूयनमतीव च ।
भूत्वा भूत्वा प्रतिश्यायो योऽकस्माद्विनिवर्त्तते ॥
सम्पक्वो वाप्यपक्वो वा स सर्व्वप्रभवः स्मृतः ।
लिङ्गानि चैव सर्व्वेषां पीनसानाञ्च सर्व्वजे ॥
रक्तजे तु प्रतिश्याये रक्तास्रावः प्रवर्त्तते ।
ताम्राक्षश्च भवेज्जन्तुरुरोघातप्रपीड़ितः ॥
दुर्गन्धोच्छ्वासवदनस्तथा गन्धान् न वेत्ति च ।
मूर्च्छन्ति चात्र क्रिमयः श्वेताः कृष्णास्तथाणवः ।
क्रिमिमूर्द्धविकारेण समानञ्चास्य लक्षणम् ॥ ५ ॥

"शा० ६ अ० सद्यः प्राण हराणि सप्तरात्रभ्यन्तरान् मारयन्ति" इति । शिर इति । पृथक्विधा गलतालुवेदनाप्रभृतयो नानाविधाः । लिङ्गानीति । पीनसःप्रतिश्यायश्चेतिपर्य्यायौ ॥ २—५ ॥

प्रक्लिद्यति पुनर्नासा पुनश्च परिशुष्यति।
मुहुरानह्यते चापि मुहुर्विव्रियते तथा॥
निश्वासोच्छ्वासदौर्गन्ध्यं तथा गन्धान् न वेत्ति च।
एवं दुष्टप्रतिश्यायं जानीयात् कृच्छ्रसाधनम्॥ ६॥
सर्व्वं एव प्रतिश्याया नरस्याप्रतिकारिणः।
कालेन रोगजनना जायन्ते दुष्टपीनसाः॥
बाधिर्य्यमान्ध्यमघ्राणं घोरांश्च नयनामयान्।
कासाग्निसादशोफांश्च वृद्धाः कुर्व्वन्ति पीनसाः॥ ७॥

नवं प्रतिश्यायमपास्य सर्व्वमुपाचरेत् सर्पिष एव पानैः।
स्वेदैर्विचित्रैर्वमनैश्च युक्तैः कालोपपन्नैरवपीड़नैश्च॥ ८॥
अपच्यमानस्य हि पाचनार्थं स्वेदो हितोऽम्लैरहिमञ्च भोज्यम्।
निषिच्यमाणं पयसार्द्रकं वा सम्पाचयेद्दिक्षुविकारयोगैः॥
पक्वं घनञ्चाप्यवलम्बमानं शिरोविरेकैरपकर्षयेत् तम्।
विरेचनास्थापनधूमपानैरवेक्ष्य दोषान् कवलग्रहैश्च॥
निवातशय्यासनचेष्टनानि मूर्द्ध्नि गुरूष्णञ्च तथैव वासः।
तीक्ष्णा विरेकाः शिरसः सधूमा रुक्षं यवान्नं विजया च सेव्या

---

निरामंप्रतिश्यायं प्रति समासतः प्रतीकारक्रममुपदिशन्नाह नवमिति। नवंसाममिति तात्पर्य्यम्। सर्पिषः यथास्वभेषजसिद्धस्येत्युपदेशः। पानैरुपाचरेदेवेति योजना, अत्र एवकारः सर्पिःप्रयोग मेकान्ततोनियुङ्क्ते। नवेतु प्रतिश्याये लङ्घनादिकमुपरिष्टादुपदेक्ष्यते। अपच्येति। अम्लैः "सू० ४२ अ०" उक्ताम्लवर्गाभिहितै रम्लौकामुखैर्द्रव्यैः। कवलग्रहैः "चि० ४०

शीताम्बु-योषिच्छिशिरावगाह-चिन्तातिरुक्षाशनवेगरोधान्।
शोकञ्च मद्यानि नवानि चैव विवर्ज्जयेत् पीनसरोगजुष्टः॥
छर्द्यङ्गसादज्वरगौरवार्त्तमरोचकारत्यतिसारयुक्तम्।
विलङ्घनैः पाचनदीपनीयैरुपाचरेत् पीनसिनं यथावत्॥ १०॥
बहुद्रवैर्वातकफोपसृष्टं प्रच्छर्द्दयेत् पीनसिनं वयःस्थम्।
उपद्रवांश्चापि यथोपदेशं स्वैर्भेषजैर्भोजनसंविधानैः।
जयेद्विदित्वा मृदुतां गतेषु प्राग्लक्षणेषूक्तमथादिशेच्च॥११॥

---

अ०" उक्तैरित्युन्नेयम्। पलं मांसं अन्नञ्चेति पलान्नम्। विजया वचे-त्यनर्थान्तरम्। सम्प्रत्यवसरवशात् सामं प्रतिश्यायं प्रति प्रतीकारक्रममुप-दिदिक्षति छर्द्दीति। वक्ष्यति। वयस्थं प्रच्छर्द्दयेत्, बालवृद्धांच संश-मनेनोपपादयेदित्यर्थादाक्षिप्यते। भगवन्! व्रणप्रश्नमनुसन्धाय पूर्व्वरूपेषु प्रतिकृतेषु व्याधयो नाविर्भवन्ति समूलकाषमाकाषादित्यवधारयामस्तदिद मिदानीं जिज्ञासामहे पूर्व्वरूपत्वेनोक्तेषु शिरोगौरवादिषूत्पन्नेषु किंनाम भैषजेनातुरमुपपादयामोऽव्याधेरनुत्पत्तिमिच्छन्तः इत्याह उपद्रवानिति। द्वावेव चशब्दौ अपिशब्दश्च समुच्चयार्थाः। अथ शब्दश्च प्रकरणार्थस्तदयमर्थः उपद्रवा-नुत्पातान् पूर्व्वरूपत्वेनोपदिष्टान् गलतालुवेदनोष्माभिकाङ्क्षादीं स्तांस्तान् भावानिति यावत्, चकारात्तदितरान् शिरोगुरुत्वादींश्च यथोपदेशं स्वैर्यथास्वं भेषजैर्यथास्वं भोजनसम्बिधानैश्च जयेत् प्रतिकुर्य्यात्। तथा प्राग्लक्षणेषु शिरोगुरुत्वादिषु गलतालुवेदनादिषु च सर्व्वेषु पूर्व्वरूपेषु मृदुतां गतेषु क्षीणेषु सत्सु विदित्वा विमृश्य यथायोगमिति तात्पर्य्यम्। अथास्मिन् प्रकरणे उक्तं "नवं प्रतिश्यायमपास्य" इत्यादिना कथितम्। सर्पिः पानादिक मादिशेद् वातादि ज्वर पूर्व्वरूपेषु घृतपानादिवदिति निष्कर्षः॥ ९—११॥

वातिके तु प्रतिश्याये पिबेत् सर्पिर्यथाक्रमम् ।
पञ्चभिर्लवणैः सिद्धं प्रथमेन गणेन च ॥
नस्यादिषु विधिं कृत्स्नमवेक्षेतार्द्दितेरितम् ।
पित्तरक्तोत्थयोः पेयं सर्पिर्मधुरकैः शृतम् ॥
परिषेकान् प्रदेहांश्च कुर्य्यादपि च शीतलान् ।
श्रीसर्ज्जरसपत्तङ्ग-प्रियङ्गुमधुशर्करा: ॥
द्राक्षामधूलिकागोजी-श्रीपर्णीमधुकैस्तथा ।
युज्यन्ते कवलाश्चात्र विरेको मधुरैरपि ॥
धवत्वक्त्रिफलाश्यामातिल्वकैर्मधुकेन च ।
श्रीपर्णीरजनीमिश्रैः क्षीरे दशगुणे पचेत् ॥
तैलं कालोपपन्नं तन्नस्यं स्यादनयोर्हितम् ॥ १२ ॥

---

सम्प्रति निरामं प्रतिश्यायं प्रति प्राग्वद् व्यासतश्चिकित्सितमधिकरोति वातिक इति । प्रथमोगणः "सू० ३८अ०" उक्तो विदारिगन्धादिः । नस्यादिषु—नस्यधूमादिषु, अर्द्दितं चि० अ० सूचयाम्बभूव, मधुरकैः "सू० ४२अ०" मधुरवर्गाभिहितैर्द्रव्यैः । श्रीति । श्रीः कमलं पत्तङ्गं रक्तचन्दनम्, मधूलिका मूर्व्वा, गोजी, गोजिह्वा, श्रीपर्णी, गाम्भारी, अत्र कवला इति बहुवचनम् व्यस्तसमस्तानामेषा मुपयोगमाख्यातुम् । मधुरैः मधुरवर्गाभिहितैर्द्रव्यैः त्रिवृतादिमिश्रैरेवेति ज्ञेयम् । विरेकोपयोगिकत्वात् । नस्यार्थं तैल माह धवेति । धवः स्वनामप्रसिद्धोराढ़ीयोवृक्षः, तिल्वको लोध्रः, अत्र दशगुणे क्षीरे तैलं पचेदित्युक्तेऽपि जलमपि चतुर्गुणं देयं मितु-

कफजे सर्पिषा स्निग्धं तिलमाषविपक्वया।
यवाग्वा वामयेद्वान्तः कफघ्नं क्रममाचरेत्॥
उभे बले बृहत्यौ च विड़ङ्गं सत्रिकण्टकम्।
श्वेतामूलं सहां भद्रां वर्षाभूञ्चापि संहरेत्।
तैलमेभिर्विपक्वन्तु नस्यमस्योपकल्पयेत्॥ १३॥
सरलाकिणिहीदारु-निकुम्भेङ्गुदिभिः कृताः।
वर्त्तयस्योपयोज्याः स्युर्धूमपाने यथाविधि॥ १४॥
सर्पींषि कटुतिक्तानि तीक्ष्णा धूमाः कटूनि च।
भेषजान्युपयुक्तानि हन्युः सर्व्वप्रकोपजम्॥ १५॥
रसाञ्जने सातिविषे मुस्तायां भद्रदारुणि।
तैलं विपक्वं नस्यार्थे विदध्याच्चात्र बुद्धिमान्॥ १६॥
मुस्ता तेजोवती पाठा कट्फलं कटुका वचा।
सर्षपाः पिप्पलीमूलं पिप्पल्यः सैन्धवाग्निकौ॥

---

परेशः। कालोपपन्नं नस्यकालमभिसमीक्ष्य प्रयुक्त मित्यर्थः। अनयो-रक्तपित्तीत्थयो रित्येव। कफज इति। सर्पिषा स्निग्धमातुरं तिलमाष विपक्वया वमनौषधमिश्रयेति नेयम्। वा शब्दोऽवधारणार्थः। उभे इति श्वेता श्वेतापराजिता, सहामुद्गपर्णी, भद्रा रास्ना, एभिः कल्कीकृतै रित्युन्नेयम् करणनिर्देशात्॥ १२—१३॥

सरलेति। सरला त्रिवृतेत्यमरः। किणिही अपामार्गः, निकुम्भा दन्ती, सर्पींषीति बहुवचनं "सू० ४५ अ० उक्तानि सर्पींषि ग्राहयितुम्। रसाञ्जन इति। सप्ताधिकरणनिर्देशात् क्वाथकल्कसाध्यमेतदित्युपदेष्टव्यम्।

तुल्यं करञ्जबीजञ्च लवणं भद्रदारु च ।
एतैः कृतं कषायन्तु कवले संप्रयोजयेत् ।
हितं मूर्द्धविरेकेण तैलमेभिर्विपाचितम् ॥ १७ ॥
क्षीरमर्द्धजले क्वाथ्यं जाङ्गलैर्मृगपक्षिभिः ।
पुष्पैर्विमिश्रं जलजैर्वातघ्नैरौषधैरपि ॥
हिमे क्षीरावशिष्टेऽस्मिन् घृतमुत्पाद्य यत्नतः ।
सर्व्वगन्धा सितानन्ता मधुकं चन्दनं तथा ।
आवाप्य विपचेद्भूयो दशक्षीरन्तु तद्घृतम् ।
नस्यप्रयुक्तमुद्रिक्तान् प्रतिश्यायान् व्यपोहति ॥ १८ ॥
यथास्वं दोषशमनैस्तैलं कुर्य्याच्च यत्नतः ॥ १९ ॥
समूत्रपित्तास्तूद्दिष्टाः क्रियाः क्रिमिषु योजयेत् ।

---

मुस्तेति । तेजोवती चविकैव एभिर्मुस्तादिभि कल्कीकृतैरेव विपाचितं तैलं मूर्द्धविरेकेण हित मित्यन्वयः ।

क्षीरमिति । अत्र द्रव्यादष्टगुणं क्षीरं क्षीरात्तोयं चतुर्गुणं इति स्थितेऽपि निर्द्देशवशात् निर्विशङ्कं क्षीरादर्द्धमेव जलं देयम्, जाङ्गलामृग पक्षिणः एणलावादयः, वातघ्नान्यौषधानि "सू० ३९ अ०" उक्तानि भद्रदार्व्वादीनि । सर्व्वगन्धानाम "चातुर्जातककर्पूरकक्कोलागुरुकुङ्कुमम् लवङ्गसहितञ्चैव सर्व्वगन्धाप्रकीर्त्तिता इत्युक्तो द्रव्यसमूहः । अनन्ता, अनन्त-मूलम् । यथास्वं प्रतिश्यायप्रत्यनीकेन भेषजेन तैलं पक्तुमुपदिशति यथास्व मिति । समूत्रेति । अनुद्दिष्टा इति भाविनिभूतवदुपचारादुच्यते इत्यनु-

यापनार्थं क्रिमिघ्नानि भेषजानि च बुद्धिमान् ॥ २० ॥
इति सुश्रुतसंहितायामुत्तरतन्त्रे प्रतिश्यायप्रतिषेधो
नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

---

# पञ्चविंशोऽध्यायः ।

अथातः शिरोरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥ १ ॥
शिरो रुजति मर्त्यानां वातपित्तकफैस्त्रिभिः ।
सन्निपातेन रक्तेन क्षयेण क्रिमिभिस्तथा ॥

---

सन्धेयम् । तथाचोद्दिष्टा क्रिमिषु वक्ष्यमाणा क्रिया नस्यादिकाः समूत्रपित्तां गोमूत्रपित्तानुविद्धाः कृत्वा क्रिमिषु योजयेत् चकारात्तथा यापनार्थं क्रिमिघ्नानि भेषजानि पानादिषु प्रयोज्यानीति तात्पर्य्यम् । अत्र यापनार्थ मिति विशेषणात्तानि समूलघातमुपघ्नन्तीति बुद्धिमारोहय ॥ १४—२० ॥
इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
प्रतिश्याय प्रतिषेधोनाम चतुर्विंशोऽध्यायः ॥

---

सम्प्रति प्रक्रान्तं शालाक्यतन्त्रेषु परिशिष्टञ्च शिरोरोगमधिकरोति अथात इत्यादिना ॥ १ ॥
प्रागुक्तं समासतः शिरोरोगं व्याचष्टाचार्योभगवान् व्यासतोव्याख्यातुं

सूर्य्यावर्त्तानन्तवाताद्धावभेदकशङ्खकैः ।

एकादशप्रकारस्य लक्षणं संप्रवक्ष्यते ॥ २ ॥

यस्यानिमित्तं शिरसो रुजश्च भवन्ति तीव्रा निशि चातिमात्रम् ।
बन्धोपतापैश्च भवेद्विशेषः शिरोऽभितापः स समीरणेन ॥ ३

यस्योष्णमङ्गारचितं यथैव भवेच्छिरो धूमवती च नासा ।
शीतेन रात्रौ च भवेद्विशेषः शिरोऽभितापःसतुपित्तकोपात् ॥४

शिरोगलं यस्य कफोपदिग्धं गुरु प्रतिष्टब्धमथो हिमञ्च ।
शूनाक्षिकूटं वदनञ्च यस्य शिरोऽभितापः स कफप्रकोपात् ॥६

शिरोऽभितापे त्रितयप्रवृत्ते सर्व्वाणि लिङ्गानि समुद्भवन्ति ॥६॥

रक्तात्मकः पित्तसमानलिङ्गः स्पर्शासहत्वं शिरसो भवेच्च ॥ ७ ॥

वसाबलासक्षतसम्भवानां शिरोगतानामिह संक्षयेण ।
क्षयप्रवृत्तः शिरसोऽभितापः कष्टो भवेदुग्ररुजोऽतिमात्रम् ॥ ८

---

प्रतिजानीते शिर इति प्रकृतमनुसरति यस्येति । तैस्तैर्निदानविशेषैः प्रकुपितोहि शिरोरोगारम्भकोवायुः कालेन प्रवृद्धः स्वभावादपस्मारमारभमाण इव तदारम्भे निदानविशेषमनपेक्ष्य रोगाय कल्पते, रात्रौ शीतान्वयेच सामान्याददितरां रुजं करोति, प्रत्यनीकत्वाच्च बन्धनादिभिरुपशेते तदिदमुच्यते अनिमित्तमिति । अत्र निशिचेति चकारोऽनुक्तमपि यथा कथञ्चित् शीत सम्पर्कं समुच्चिनोत्यनुगुणत्वादित्याहुः । बन्धोऽत्र उष्णस्वभावेन क्षौमादिना संयमनम् । उपतापस्तु स्वेदपूर्व्व एवेति नैयमीपयौगिकत्वात् । यस्येति । धूमवती धूममुद्वमन्ती, प्रतिष्टब्धं जड़ीभूतम् । अक्षिकूटमक्षिगोलः । सर्व्वाणि वातजाद्युक्तानि ॥ २—७॥

संस्वेदनच्छर्द्दनधूमनस्यै रसृग्विमोचैश्च विवृद्धिमेति ।
निस्तुद्यते यस्य शिरोऽतिमात्रं सम्भक्ष्यमाणं स्फुरतीव चान्तः ॥
घ्राणाच्च गच्छेत् सलिलं सरक्तं शिरोऽभितापः क्रिमिभिः स घोरः ॥९॥
सूर्य्योदयं वा प्रति मन्दमन्दमक्षिभ्रुवं रुक् समुपैति गाढ़म् ।
विवर्द्धते चांशुमता सहैव सूर्य्यापवृत्तौ विनिवर्त्तते च ॥
शीतेन शान्तिं लभते कदाचिदुष्णेन जन्तुः सुखमाप्नुयाच्च ॥
तं भास्करावर्त्तमुदाहरन्ति सर्व्वात्मकं कष्टतमं विकारम् ॥१०॥
दोषास्तु दुष्टास्त्रय एव मन्यां संपीड्य घाटासु रुजां सुतीव्राम् ।
कुर्व्वन्ति साक्षि भ्रुवि शङ्खदेशे स्थितिं करोत्याशु विशेषतस्तु ॥
गण्डस्य पार्श्वेतु करोति कम्पं हनुग्रहं लोचनजांश्च रोगान् ॥
अनन्तवातं तमुदाहरन्ति दोषत्रयोत्थं शिरसो विकारम् ॥ ११
यस्योत्तमाङ्गार्द्धमतीव जन्तोः सम्भेदतोदभ्रमशूलजुष्टम् ।
पक्षाद्दशाहादथवाप्यकस्मात् तस्यार्द्धभेदं त्रितयाद्व्यवस्येत् ॥ १२

---

वसेति । इहशिरोरोगेषु मध्ये क्षयप्रवृत्तः शिरसोऽभितापः शिरोगतानां वसादीनां संक्षयेण सम्यक् क्षयलक्षणेन शिरसः शून्यतादिनोपलक्षितः । उग्ररुजस्तीव्रवेदनोऽतिमात्रं कष्टः कष्टप्रदः कष्टसाध्योवेत्यर्थः । क्षतसम्भवं रक्तम् । निस्तुद्यत इति । संभक्ष्यमाणं क्रिमिभिर्दश्यमानं शिरोऽतिमात्रं निस्तुद्यते सूचीभिरिव विद्ध्यते । अन्तः शिरसोऽभ्यन्तरेच स्फुरति झनत्-कृत्य रक्तं वेगेन चलतीव । सूर्य्योदयमिति । अक्षिणी च भ्रुवौचेत्यक्षिभ्रुवम् ॥ ८—११ ॥

शङ्खाश्रितो वायुरुदीर्णवेगः कृतानुयात्रः कफपित्तरक्तैः ।
रुजः सुतीव्राः प्रतनोति मूर्ध्नि विशेषतश्चापि हि शङ्खयोस्तु ॥
सुकष्टमेनं खलु शङ्खकाख्यं महर्षयो वेदविदः पुराणाः ।
व्याधिं वदन्त्युद्गतमृत्युकल्पं भिषक्सहस्रैरपि दुर्निवारम् ॥१३

इति सुश्रुतसंहितायामुत्तरतन्त्रे शिरोरोगविज्ञानीयो नाम पञ्चविंशोऽध्यायः ॥ २५ ॥

---

यस्येति । उत्तमाङ्गार्द्धमित्यभिधानात् षष्ठी समासः । सम्भेदतोदौ विदारणसूचीव्यधनवद्वेदनाविशेषौ । भ्रमस्तु चक्रवद्भ्रमणम् । शङ्खेति । कृताऽनुयात्रा यस्येति कृतानुयात्रः । कफपित्तरक्तैः कर्त्तृभूतैः कृतानुयात्रोवायुरित्येवं योजना । शङ्खयोर्विशेषतः सुतीव्रा रुजः प्रतनोत्यस्थिमांसप्रपाकात् । भिषक् सहस्रैरपि दुर्निवार मिति तु यतेनास्यूत्तस्य समूलघातमुपघातादित्येवं ब्रूमो मनागुपहृतेहि यथावत् शस्त्रमवचार्य्य तत्क्षणेनातुरमुत्थापयामः प्रायेण । परिशिष्टं निगदव्याख्यातम् ॥ १२—१३ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये शिरोरोगविज्ञानीयोनाम पञ्चविंशोध्यायः ॥

# षड्विंशोऽध्यायः ।

अथातः शिरोरोगप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

वातव्याधिविधिः कार्य्यः शिरोरोगेऽनिलात्मके ।
पयोऽनुपानं सेवेत घृतं तैलमथापि वा ॥

मुद्गान् कुलत्थान् माषांश्च खादेच्च निशि केवलान् ।
कटूष्णांश्च ससर्पिष्कांनुष्णञ्चानु पयः पिबेत् ॥

पिबेद्वा पयसा तैलं तत्कल्कं वापि मानवः ।
वातघ्नसिद्धैः क्षीरैश्च सुखोष्णैः सेकमादिशेत् ॥

तत्सिद्धैः पायसैर्वापि सुखोष्णैर्लेपयेच्छिरः ।
स्विन्नैर्वा मत्स्यपिशितैः कृशरैर्वा ससैन्धवैः ।
चन्दनोत्पलकुष्ठैर्वा सुश्लक्ष्णैर्मगधायुतैः ॥

स्निग्धस्य तैलं नस्यं स्यात् कुलीररससाधितम् ।

---

क्रमागतं शिरोरोग प्रतिषेधमधिकरोति अथात इत्यादिना ॥ १ ॥

वातेति । केवलान् शुद्धान् मुद्गादीन् चकारात्कटूष्णद्रव्यान्वयतः कटूष्णान् ससर्पिष्कांश्च तान् मुद्गादीन् खादेत् । अनु पश्चाच्चोष्णं पयःपिबेदित्यर्थः । पिबेदिति । पूर्व्वं हि पयोऽनुपानं तैलंविहितम् इदानीन्तु सह-पयसा तैलंविधीयत इत्यदोषः । तैलसम्बन्धीयं तैलमूलं वा कल्कं तत् कल्कम् तिलकल्कमित्येतत् । "तैलं तिलानां कल्कं वा क्षीरेण सहपाययेत्" इति तन्त्रान्तरञ्च, वातघ्नः "सू० ३९अ०" उक्तोभद्रदार्व्वादिः ।

वरुणादौ गणे क्षुण्णे क्षीरमर्द्धोदकं पचेत् ॥
क्षीरशेषञ्च तन्मथ्यं शीतं सारमुपाहरेत् ।
ततो मधुरकैः सिद्धं नस्ये तत् पूजितं हविः ॥ २ ॥
तस्मिन् विपक्के क्षीरे च पेयं सर्पिः सशर्करम् ।
धूमश्चास्य यथाकालं स्नैहिकं योजयेद्भिषक् ॥
पानाभ्यञ्जननस्येषु वस्तिकर्म्मणि सेचने ।
विदध्यात् त्रैवृतं धीमान् वलातैलमथापि वा ॥
भोजयेच्च रसैः स्निग्धैः पयोभिर्वा सुसंस्कृतैः ॥ ३ ॥
पित्तरक्तसमुत्थानौ शिरोरोगौ निवारयेत् ।
शिरोलेपैः ससर्पिष्कैः परिषेकैश्च शीतलैः ।
क्षीरेक्षुरसधान्याम्ल-मस्तुक्षौद्रसिताजलैः ।
नलवञ्जुलकह्लार-चन्दनोत्पलपद्मकैः ।
शङ्खशैवलयष्ट्याह्व-मुस्ताम्भोरुहसंयुतैः ॥

---

क्षीरैः प्रत्येकशोगव्याद्यैः । कशेरुदिमलकल्कः । कुलीरः कर्कटः "काकड़ा" इति परिचीयते । वरुणादाविति । वरुणादिः "सू० ३८अ०" द्रष्टव्यः । तस्मिन्निति । तस्मिन् वरुणादौगणे क्षीरेच विपक्कं सशर्करंसर्पिः पेयम् । स्नैहिकं धूमं स्नेहफलसारेत्यादिना धूमादि चिकित्सिते, त्रैवृतं सर्पिः महावातव्याधिचिकित्सिते, वलातैलञ्च मूढ़गर्भचिकित्सिते निवेदयाम्बभूव ॥ २—३ ॥

सम्प्रति प्रकाम्लत्वात् पित्तजेऽधिकर्त्तव्ये सामान्यात् पित्तरक्तजा वधिकरोति पित्तेत्यादिना । *अत्र शीतलैरित्युभयत्र सम्बध्यते । समासेनोक्त

शिरःप्रलेपैः सघृतैर्वैसर्पैश्च तथाविधैः ।
मधुरैश्च सुखालेपैर्नस्यकर्म्मभिरेव च ॥
आस्थापनैर्विरेकैश्च पथ्यैश्च स्नेहवस्तिभिः ॥ ४ ॥
क्षीरसर्पिर्हितं नस्यं वसा वा जाङ्गला शुभा ॥
उत्पलादिविपक्वेन क्षीरेणास्थापनं हितम् ।
भोजनं जाङ्गलरसैः सर्पिषा चानुवासनम् ॥
मधुरैः क्षीरसर्पिस्तु स्नेहने च मशर्करम् ।

---

मर्थं प्रपञ्चेनावगमयन् सूचीकटाहन्यायात् व्युत्क्रमेणोपदिदिक्षति क्षीरेति । क्षीरादिभिर्निवारयेत् परिषेकविधिनोपयुक्तै रितिशेषः । क्षौद्रसिते अत्र चतुर्गुणजले षड्गुणजले वा प्रत्येतव्ये । द्रव्याण्येतानि शीतलान्येवादेयानि प्राक् शीतलैरित्युक्तेः । चकार द्वितयेन विभक्तं सघृतं लेपत्रितयमुपदिदिक्षति नलेत्यादिना सुखालेपैरित्यन्तेन ग्रन्थेन । वञ्जुलोवेतसः, कह्लारं सौगन्धिकम् 'सुन्धो" इत्याख्यायते । पद्मकं पद्मकाष्ठम् । शिरःप्रलेपैः शिरःप्रलेपद्रव्यैः तथाविधैः रक्तपित्तहरैर्वैसर्पविसर्पाभिहितैस्तैस्तैः प्रलेपैः तथा मधुरैः "सू० ४२अ०" मधुरवर्गाभिहितैः काकोल्यादिभिः सुखालेपैः रक्तपित्तयोः सुखकरत्वात् शीतैरालेपैरालेपद्रव्यै स्तथा नस्यकर्म्मभिर्निवारयेदिति पूर्व्वेणान्वयः । पथ्यैर्भोजनैः । स्नेहवस्ति रनुवासन मित्यनर्थान्तरम् ॥ ४ ॥

सामान्येनोक्तानि नस्यादीनि प्रकारतः स्फुटीकृत्यावगमयति क्षीरेति । क्षीरोत्थं सर्पिः क्षीरसर्पिः । उत्पलादिः "सू० ३८अ०" द्रष्टव्यः । अत्र क्षीरेण त्रिवृतासहितेनेत्युपदिशन्त्याचार्य्याः फलसौष्ठवमभिसमीक्ष्य । आस्थापनशब्दोऽयमजहत्स्वार्थया लक्षणया विरेकमप्यभिधत्त इत्यवश्यं

पित्तरक्तघ्नमुद्दिष्टं यच्चान्यदपि तद्धितम् ॥
कफोत्थितं शिरोरोगं जयेत् कफनिवारणैः ।
शिरोविरेकैर्वमनैस्तीक्ष्णैर्गण्डूषधारणैः ॥
अच्छञ्च पाययेत् सर्पिः स्वेदयेच्चाप्यभीक्ष्णशः ।
शिरो मधूकसारेण स्निग्धञ्चापि विरेचयेत् ॥
इङ्गुदस्य त्वचा वापि मेषशृङ्ग्या च वा भिषक् ।
आभ्यामेव कृता वर्त्तिर्धूमपाने प्रयोजयेत् ।
घ्रेयं कट्फलचूर्णञ्च कवलाश्च कफापहाः ॥
सरलाकुष्ठशार्ङ्गेष्टा-देवकाष्ठैः सरोहिषैः ।
क्षारपिष्टैः सलवणैः सुखोष्णैर्लेपयेच्छिरः ।
यवषष्टिकयोश्चान्नं व्योषक्षारसमायुतम् ।
पटोलमुद्गकौलत्थैर्माचावन्नोजयेद्रसैः ॥ ५ ॥
शिरोरोगे त्रिदोषोत्थे त्रिदोषघ्नो विधिर्हितः ।
सर्पिःपानं विशेषेण पुराणं वा दिशन्ति हि ॥ ६ ॥

---

वक्तव्यं प्रागुक्तस्य विरेकस्येह पृथक्त्वेनानभिधानात् । अत्र क्रमं हित्वा आस्थापनस्य प्रागुपदेशश्छन्दोनुरोधादित्यनुसन्धेयम् । आयुर्व्वेदे हि स्नेहस्वेदादनन्तरं विरेकादीन्युपदिशन्ति, अत्र च स्वेदनं नेष्टमितिकृत्वा नेदिष्टं प्रागनुपदिष्टं स्नेहन मेव स्वरूपतो निर्दिशति मधुरैरिति । मधुरैर्मधुरवर्गाभिहितैर्द्रव्यैः सिद्धमितिशेषः । औपयोगिकत्वात् सामान्यमर्थान्तर मव तारयति पित्तेति । कफोत्थितमिति । शार्ङ्गेष्टा, महाकरञ्जः । पटले-

क्षयजे क्षयमासाद्य कर्त्तव्यो वृंहणो विधिः ।
पाने नस्ये च सर्पिः स्याद् वातघ्नमधुरैः शृतम् ।
क्षयकासापहत्वात्तु सर्पिः पथ्यतमं विदुः ॥ ७ ॥
कृमिभिर्भक्ष्यमाणस्य वक्ष्यन्ते शिरसः क्रियाः ।
नस्यं हि शोणितं दद्यात् तेन मूर्च्छन्ति जन्तवः ॥
मत्ताः शोणितगन्धेन समायान्ति यतस्ततः ।
तेषां निर्हरणं कार्य्यं ततो मूर्द्धविरेचनैः ॥
कृष्णशिग्रुकबीजैर्वा कांस्यनीलीसमायुतैः ।
कृमिघ्नैरवपीड़ैश्च मूत्रपिष्टैरुपाचरेत् ॥
पूतिमत्स्यायुतान् धूमान् कृमिघ्नांश्च प्रयोजयेत् ।
भोजनानि कृमिघ्नानि पानानि विविधानि च ॥ ८ ॥
सूर्य्यावर्त्ते विधातव्यं नस्यकर्म्मादि भेषजम् ।
भोजनं जाङ्गलप्रायं क्षीरान्नविकृतैर्घृतम् ॥ ९ ॥

---

त्यादावुत्तरपदवृद्धिः । मात्रामर्हतीति मात्रावत्, क्रियाविशेषणमेतत् क्षयज इति । वातघ्नानि "सू॰ ३९अ॰" निवेदितानि भद्रदार्व्वादीनि । मधुराणि च काकोल्यादीनि तैर्वातघ्नमधुरैः ॥ ५—७ ॥

कृमिभिरिति । मूर्च्छन्ति लोलुपत्वेन चञ्चला भवन्ति मत्ता हृष्टाः "हृष्टे मत्तः" इत्यमरः । मूर्द्धविरेचनैः "सू॰ ३९ अ॰" निर्दिष्टानां यथावदुपयोगैः । निष्क्रान्तेष्वनिर्हृतेषु चोपशमनार्थमवपीड़माह कृष्णेति । कृष्णशिग्रुः शोभाञ्जनः । कांस्यनीली कांस्यमलः । कृमिघ्नैः विड़ङ्गादिभिः । अवपीड़ः शिरोविरेचनविकल्पः इत्याख्यापयाम्बभूव । दुर्गन्धीभूता मत्स्याः पूतिमत्स्याः प्रयोजयेत् नासया धूमपानविधिनेति शेषः ॥ ८ ॥

तथार्द्धभेदके व्याधौ प्राप्तमन्यच्च यद्भवेत् ।
शिरीषमूलकफलैरवपीडोऽनयोर्हितः ॥
वंशमूलककर्पूरैरवपीडं प्रयोजयेत् ।
अवपीडो हितश्चात्र वचामागधिकायुतः ॥
मधुकेनावपीडो वा मधुना सह संयुतः ।
मनःशिलावपीडो वा मधुना चन्दनेन वा ॥
तेषामन्ते हितं नस्यं सर्पिर्मधुरसान्वितम् ।
सारिवोत्पलकुष्ठानि मधुकञ्चाम्लपेषितम् ॥
सर्पिस्तैलयुतो लेपो द्वयोरपि सुखावहः ॥ १० ॥
एष एव प्रयोक्तव्यः शिरोरोगे कफात्मके ॥ ११ ॥
अनन्तवाते कर्त्तव्यः सूर्य्यावर्त्तहितो विधिः ।
शिराव्यधश्च कर्त्तव्योऽनन्तवातप्रशान्तये ॥
आहारश्च विधातव्यो वातपित्तविनाशनः ।
मधुमस्तुकसंयाव-घृतपूरैश्च भोजनैः ॥ १२ ॥

---

सूर्य्यावर्त्त इति नस्येत्यादौ यथादोष मित्युन्नेयम् । तथेति । तथेत्यय मतिदेशार्थः सूर्य्यावर्त्तवत् सर्व्वं विधेयमित्यर्थः । यच्चान्यद्वाताादि प्रतिषेधोक्तं प्राप्तं दोषवलमभिसमीक्ष्य युक्तं मन्येत तदपिविधेयमिति हृदयम् । अनयोः सूर्य्यावर्त्तार्द्धावभेदकयोः । तेषामिति । रसोमांसरस । मधुरसान्वितं सर्पिरितिसम्बन्धः । प्रसङ्गात्शिरीषेत्यादिनोपदिष्टं विधिं कफजे शिरोरोगेऽतिदिशति एष इति । एषविधिः प्रयोक्तव्यएवेति योजना । अनन्तेति । परमतः क्रिमिच्चयजातौ हित्वेतरेषां प्रतिहतेष्वन्येषु प्रतिकारेषु शिराव्यधनं

क्षीरसर्पिः प्रशंसन्ति नस्ये पाने च शङ्खके ।
जाङ्गलानां रसैः स्निग्धैराहारश्चात्र शस्यते ॥
शतावरीं तिलान् कृष्णान् मधुकं नीलमुत्पलम् ।
दूर्व्वां पुनर्नवाञ्चैव लेपे साध्ववचारयेत् ॥
महासुगन्धामथवा पालिन्दींश्चाम्लपेषिताम् ।
शीतांश्चात्र परीषेकान् प्रदेहानत्र योजयेत् ॥
अवपीड़श्च देयोऽत्र सूर्य्यावर्त्तनिवारणः ॥ १३ ॥
कृमिक्षयकृतौ हित्वा शिरोरोगेषु बुद्धिमान् ।
मधुतैलसमायुक्तैः शिरांस्यपिविरेचयेत् ।
पश्चात् सर्षपतैलेन ततो नस्यं प्रयोजयेत् ॥ १४ ॥
न चेच्छान्तिं व्रजन्त्येवं स्निग्धस्विन्नांस्ततो भिषक् ।
पश्चादुपाचरेत् सम्यक् शिराणामथ मोक्षणैः ॥ १५ ॥

---

विधेय मित्युपदेक्ष्यते इहतु प्रागेवेत्याशयेनाह शिरेति । मस्तुकं मस्तुदधिमण्डमितिपर्य्यायाः । संयावोनाम घृतादिना पक्वं गोधूमचूर्णम् वदन्तिहि "संयावस्तु घृतक्षीरगुड़ गोधूमपाकजम्" इति । घृतपूरस्तु "मर्द्दितां समितां क्षीरनारिकेलघृतादिभिः । अवमथ्यघृतेपक्वोघृतपूरोऽयमुच्यते" इत्युक्तलक्षणः । महासुगन्धा रास्ना पालिन्दी श्यामालता ॥ ८—१३ ॥

सम्प्रति क्रिमिक्षयकृतान् हित्वेतरेषु शिरोरोगेषु दोषनिर्हरणार्थं "सू० ३८ अ०" उक्तैः शिरोविरेचनीयैः शिरोविरेचयितुम् अवस्थाविशेषेच शोणितमवसेचयितुं नियुङ्क्ते क्रिमीति । क्षयकृतग्रहणेनेह वातकृतस्यापि परिग्रहः क्रियते प्रायस्तुल्यधर्म्मित्वात् । अपि यथाकामं विरेचयेदित्यर्थः । "अपि कामकार क्रियासूच" इति मेदिनी । इदमत्रावधेयम् क्रिमिकृतेहि

षट्सप्ततिर्नेत्ररोगा दशाष्टादश कर्णजाः ।
एकत्रिंशद्घ्राणगताः शिरस्येकादशैव तु ॥
इति विस्तरतोद्दिष्टाः सलक्षणचिकित्सिताः ।
संहितायामभिहिताः सप्तषष्टिर्मुखामयाः ॥
एतावन्तो यथास्थूलमूत्तमाङ्गगता गदाः ॥
अस्मिन् शास्त्रे निगदिताः सङ्ख्यारूपचिकित्सितैः ॥१६॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे शिरोरोगप्रतिषेधो नाम षड्विंशोऽध्यायः ॥ २६ ॥
समाप्तञ्चेदं शालाक्यतन्त्रम् ॥

---

क्रिमिभिः शोणितं पीयते इतरत्रच धातवः चीयन्ते इत्यतः शिरसः शून्यत्वात् युक्तमुक्तं क्रिमिक्षयकृतौ हित्वेति । न तावदेतावता क्रिमिकृतं प्रति प्राग्विहितं शिरोविरेचनं विप्रतिषिद्धं भवति तस्य क्रिमिनिर्हरणार्थत्वेन पृथग् भेषजत्वेन च पृथग्भावात् । न चेति । अत्रापि क्रमिक्षयकृतौ हित्वेति वर्त्तते । तन्त्रमिदमुपसंहरति षड़िति सप्तषष्ठिर्मुखामयाइति शेषे अभिधानमेतेषां व्याजेन चिकित्सिषु अभिहितत्वमाख्यातुम् ॥ १३—१६ ॥

इति श्रीहाराणचन्द्र चक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये शिरोरोग प्रतिषेधोनाम षड्विंशोध्यायः ॥
समाप्तश्चेदं शालाक्यतन्त्रम् ॥

# सप्तविंशोऽध्यायः ।

अथातो नवग्रहाकृतिविज्ञानीयमध्यायं व्याख्यास्यामः ॥ १

बालग्रहाणां विज्ञानं साधनञ्चाप्यनन्तरम् ।
उत्पत्तिं कारणञ्चैव सुश्रुतैकमनाः शृणु ॥ २ ॥
स्कन्दग्रहस्तु प्रथमः स्कन्दापस्मार एव च ।
शकुनी रेवती चैव पूतना चान्धपूतना ॥

अवसितमिदं शालाक्यतन्त्र मिदानीन्तु प्रक्रान्तं कौमारं नाम तन्त्रमेव प्रवर्त्तयिष्यामः इत्यभिसन्ध्यायोपक्रमागतं नवग्रहाकृतिविज्ञानं नामाधिकरोति अथात इत्यादिना ॥ १ ॥

आकृतयोऽत्र तटस्थानि संक्षिप्तानि स्वरूपाणिच लक्षणानि परमतस्त्वेषामेवोपदेशात् । नवग्रहशब्दस्तवत् सूर्य्यादिषु प्रसिद्धः "सूर्य्यश्चन्द्रोमङ्गलश्च बुधश्चैव बृहस्पतिः, शुक्रः शनैश्चरोराहुकेतुश्चोक्ता नवग्रहाः" इत्येवं जातीयकास्मृतिरिहोदाहर्त्तव्या व्याचिख्यासिते स्कन्दादौ त्वसर्व्वजनीन इति गम्यते सर्व्वत्रानुपदेशात् । नह्यञ्जसा प्रसिद्धार्थस्य जिज्ञासा आदित्सा चेतरस्य प्रेक्षावत्प्रत्ययमधितिष्ठतीति सम्प्रधार्य्य शब्दस्यास्य प्रसिद्धमर्थं जहीहि तदितरश्चादेशोति व्याजेनोपदिशन्नामूलं प्रस्तुत मर्थं व्याचक्षाणोभगवानाह बालेति । बालशब्देनेह सम्वत्सरपरानेव ग्राह्यमन्याचार्य्याः । उत्पत्तिं उत्पत्त्याख्यानम् । कारणमावेशहेतुम् । अत्र साधनशब्दोपन्यासः प्रासङ्गिकः ॥ २ ॥

प्रक्रान्तमनुसरन् प्रथमस्तावन्नामतो नवग्रहानुपदिदिक्षति स्कन्देति । "सू० अ०" उपक्रमे मण्डिकाशीतपूतनेतिस्थितेऽपीहव्युत्क्रमनिर्द्देशः पूतनाप्रसङ्गा-

पूतना शीतनामा च तथैव मुखमण्डिका।
नवमो नैगमेषश्च यः पितृग्रहसंज्ञितः॥ ३॥

धात्रीमात्रोः प्राक्प्रदिष्टापचाराच्छौचभ्रष्टान् मङ्गलाचारहीनान्।
त्रस्तान्हृष्टांस्तर्ज्जितान्क्रन्दितान्वापूजाहेतोर्हिंस्युरेते कुमारान्॥
ऐश्वर्य्यस्थास्ते न शक्या विशन्तो देहं द्रष्टुं मानुषैर्विश्वरूपा।
आप्तं वाक्यं तत्समीक्ष्याभिधास्ये लिङ्गान्येषां यानि देहे भवन्ति
॥ ४॥

शूनाक्षः क्षतजसगन्धिकःस्तनद्विड् वक्रास्योहतचलितैकपक्ष्मनेत्रः।
उद्विग्नः सुललितचक्षुरल्परोदी स्कन्दार्त्तो भवति च गाढमुष्टि-
वर्च्चाः॥ ५॥

निःसंज्ञो भवति पुनर्भवेत् ससंज्ञः संरब्धः करचरणैश्च नृत्यतीव।

---

दित्यनुसन्धेयम्। निदानपुरःसर मेषामावेशलिङ्गान्युपदिशति धात्रीति। प्राक् शब्देनेह गर्भिणीव्याकरणमभिप्रेयते। मङ्गलाचारोविधिविहितः षष्ठीपूजादिः। तर्ज्जितान् भर्त्सितान्। परमतोहि तान् गृह्णीध्वमशङ्किता इत्युपक्रम्य—पूजाचैव भविष्यतीतिवक्ष्यति तदिदमुपपन्नं भवति पूजेति। हिंस्युरावेशपुरःसर मित्यवगन्तव्यम्। नन्वेवंगते कथ माविशत स्तान्वलोकयामः? आह ऐश्वर्य्यस्थाइति। ऐश्वर्य्यन्तावदनिमादिप्रादुर्भावः तच्चवेदोत्पत्तावबोचाम। यत ऐश्वर्य्यस्था नातो देहं विशन्तस्ते द्रष्टुं शक्याः। स्यादेतत् कथन्तर्हि परोक्षाणा मेषां यथास्वं लिङ्गान्य संशयं विज्ञापयिष्यसि? आह आप्तमिति। आप्तमार्षमित्यनर्थान्तरम्। शूनेति। हतैकपक्ष्मचलितैकनेत्रोहतचलितैकपक्ष्मनेत्रः। उद्विग्नः क्लेशाबहत्वेन व्याकुलः। सुललितचक्षुर्हरिणवत् चञ्चलचक्षुः ललितचलितेऽपि च इति विश्वः।

विण्मूत्रे सृजति विनद्य जृम्भमाणः फेनञ्च प्रसृजति तत्सखाभिपन्नः ॥ ६
स्रस्ताङ्गो भयचकितो विहङ्गगन्धिः संस्रावि व्रणपरिपीड़ितः समन्तात्।
स्फोटैश्च प्रततनुः सदाहपाकैर्विज्ञेयो भवति शिशुः खलः शकुन्या ॥
रक्तास्यो हरितमलोऽतिपाण्डुदेहः श्यावो वा ज्वरमुखपाकवेदनार्त्तः।
रेवत्या व्यथिततनुश्च कर्णनासं मृद्नाति ध्रुवमभिपीड़ितः कुमारः ॥८
स्रस्ताङ्गः स्वपिति सुखं दिवा न रात्रौ विड़्भिन्नं सृजति च काकतुल्यगन्धिः।
छर्द्यार्त्तो हृषिततनूरुहः कुमारस्तृष्णालुर्भवति च पूतनागृहीतः॥९
यो द्वेष्टि स्तनमतिसारकासहिक्काच्छर्दीभिर्ज्वरसहिताभिरर्द्यमानः
दुर्व्वर्णः सततमधःशयोऽम्लगन्धिस्तं ब्रूयुर्भिषजइहान्धपूतनार्त्तम् ॥ १०
उद्विग्नो भृशमतिवेपते प्ररुद्यात् संलीनः स्वपिति च यस्य चान्त्रकूजः।
विस्राङ्गो भृशमतिसार्य्यते च यस्तं जानीयाद्भिषगिह शीतपूतनार्त्तम् ॥ ११
म्लानाङ्गः सुरुचिरपाणिपादवक्त्रो बह्वाशी कलुषशिरावृतोदरो यः।
सोद्वेगो भवति च मूत्रतुल्यगन्धिः स ज्ञेयः शिशुरथ वक्त्रमण्डिकार्त्तः ॥ १२ ॥

---

णिःसन्न इति। संरब्धः क्रोध राग केशलुञ्चनादिभिरनुविद्धः। जृम्भमाणो विनद्य चोत्क्रुश्य विनम्येति पाठेतु धनुर्वद्वक्रीभूय विण्मूत्रे सृजतीति समन्वयः। प्रसृजति वमति। तत्सखाभिपन्नः स्कन्दापस्मार जुष्टः। वक्ष्यतिहि स च स्कन्दसखोनाम इति ॥ ३—१० ॥

उद्विग्नइति। संलीनो विचेष्टः। विस्राङ्ग आमगन्धि शरीरः। य इति।

यः फेनं वमति विनम्यते च मध्ये सोद्वेगं विलपति चोर्द्धमीक्षमाणः ।
जीर्य्येत प्रततमथो वसासगन्धिर्निःसंज्ञो भवतिहिनैगमेषजुष्टः॥ १३

प्रस्तब्धो यः स्तनद्वेषी मुह्यते चाविशन् मुहुः ।
तं बालं न चिराद्धन्ति ग्रहः सम्पूर्णलक्षणः ॥ १४ ॥
विपरीतमतः साध्यं चिकित्सेदचिरार्द्दितम् ।
गृहे पुराणहविषाभ्यज्य बालं शुचौ शुचिः ॥
सर्षपान् प्रकिरेत् तेषां तैलैर्दीपञ्च कारयेत् ।
सदा सन्निहितञ्चापि जुहुयाद्धव्यवाहनम् ॥
सर्व्वगन्धौषधीवीजैर्गन्धमाल्यैरलङ्कृतम् ।
अग्नये कृत्तिकाभ्यश्च स्वाहा स्वाहेति संस्मरन् ॥
नमः स्कन्दाय देवाय ग्रहाधिपतये नमः ।
शिरसा त्वाभिवन्देऽहं प्रतिगृह्णीष्व मे वलिम् ॥
निरुजो निर्व्विकारश्च शिशुर्मे जायतां ध्रुवम् ॥ १५ ॥

---

चार्थोऽयमथोशब्दः। प्रस्तब्ध इति। योबालः प्रस्तब्धो निश्चेष्टः। स्तनद्वेषी मुहुर्मुह्यतेच संपूर्णलक्षणो ग्रहस्तंबालमाविशन् न चिराद्धन्तीति समन्वयः। अत्राविशन् इति विशेषणात् वेगमात्रं हन्तीत्यध्यवसेयम्। एतेनार्थाच्चिरं भवत्यसम्पूर्णलक्षणस्तु ततश्चिरादिति। सामान्यं चिकित्सितप्रकारमुपदिदिक्षति गृह इति। अत गृह इति विशेषणेन वह्निनिरावृतञ्च देशं व्यवच्छिनत्तीति नेयम्। अतएव सर्व्वथा सावृते गृहे बालाभिरक्षणं साम्प्रतमित्यवधेयम्। सर्व्वगन्धंनाम चातुर्जातक कर्पूर काक्कोलागुरु कुङ्कुमम्।

इति सुश्रुतसंहितायामुत्तरतन्त्रे नवग्रहाकृतिविज्ञानीयो नाम सप्तविंशोऽध्यायः ॥ २७ ॥

---

# अष्टाविंशोऽध्यायः ।

अथातः स्कन्दग्रहप्रतिषेधं व्याख्यास्यामः ॥ १

स्कन्दग्रहोपसृष्टानां कुमाराणाञ्च शस्यते ।
वातघ्नद्रुमपत्राणां निःक्वाथः परिषेचने ॥

---

लवङ्ग सहितञ्चैव सर्व्वगन्धं प्रकीर्त्तितम् ।'' इत्युक्त लक्षणम् । ओषधिवीजानि यवादीनि । परिशिष्टं निगदव्याख्यातम् ॥ ११—१५ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये नवग्रहाकृतिविज्ञानीयोनाम सप्तविंशोऽध्यायः ॥

---

पूर्व्वाध्याये हि साधनञ्चाप्यनन्तरमिति निरदिक्षत्, तदिदानीं ग्रहजुष्टानां प्रतीकारक्रम माचक्षाणो भगवान् प्रथमन्तावदुपक्रमागतं स्कन्दग्रहप्रतिषेधमधिकरोति अथात इत्यादिना ॥ १ ॥

स्कन्देति । वातघ्ना द्रुमाः सू० ३८अ० उक्ताभद्रदार्व्वादयः । सर्व्वगन्धं नामातः पूर्व्वाध्याये व्याहृत मस्माभिः ।

तेषां मूलेषु सिद्धञ्च तैलमभ्यञ्जने हितम् ।
सर्व्वगन्धसुरामण्ड कैटर्य्यावापमिष्यते ॥ २ ॥
देवदारुणि रास्नायां मधुरेषु द्रुमेषु च ।
सिद्धं सर्पिश्च सक्षीरं पानमस्मै प्रयोजयेत् ॥
सर्षपाः सर्पनिर्म्मोको वचा काकादनी घृतम् ।
उष्ट्राजाविगवाञ्चैव रोमाण्युद्धूपनं शिशोः ॥
सोमवल्लीमिन्द्रवल्लीं शमीं विल्वस्य कण्टकान् ।
मृगादन्याश्च मूलानि ग्रथितान्येव धारयेत् ॥ ३ ॥

रक्तानि माल्यानि तथा पताका रक्ताश्च गन्धा विविधाश्च भक्ष्याः
घण्टा च देवाय वलिर्निवेद्यः सुकुक्कुटः स्कन्दग्रहे हिताय ॥
स्नानं त्रिरात्रं निशि चत्वरेषु कुर्य्यात् पुनः शालियवैर्नवैस्तु ।
अद्भिश्च गायत्र्यभिमन्त्रिताभिः प्रज्वालयेदाहुतिभिश्च वह्निम् ॥४

---

कैटर्य्योनिम्बः, मधुराद्रुमाः सू० ४२ अ० उक्ताः काकोल्यादिप्रभृतयः। काकादनीगुञ्जा, सोमवल्लीसोमलता व्यवहारस्तु गुड़ुच्या एव। इन्द्रवल्ली इन्द्रवारुणीभेदः, मृगादनी इन्द्रवारुणी 'गुडुम' इति परिचीयते ॥ २—३ ॥

रक्तानीति। रक्ता गन्धा घृष्टरक्तचन्दनादयः। घण्टा वाद्यभेदः, देवाय स्कन्दग्रहाय वलिर्निवेद्यः नमः स्कन्दाय देवाय इत्यादि मन्त्रपुरःसरमिति शेषः। स्नानमिति। अत्र हितायेति वर्त्तते; तुकारोऽद्भिश्चेतिचकारश्चावधारणार्थौ। तदयमर्थः स्कन्दग्रहजुष्टानां हिताय त्रिरात्रं दिनत्रयं चत्वरेषु निष्पन्नेषु निशि गायत्र्यभिमन्त्रिताभिरेवाद्भिः स्नानं

रक्षामतः प्रवक्ष्यामि बालानां पापनाशिनीम् ।
अहन्यहनि कर्त्तव्या या भिषग्भिरतन्द्रितैः ॥
तपसां तेजसाञ्चैव यशसां वपुषां तथा ।
निधनं योऽव्ययो देवः स ते स्कन्दः प्रसीदतु ॥
ग्रहसेनापतिर्देवो देवसेनापतिर्विभुः ।
देवसेनारिपुहरः पातु त्वां भगवान् गुहः ॥
देवदेवस्य महतः पावकस्य च यः सुतः ।
गङ्गोमाकृत्तिकानाञ्च स ते शर्म्म प्रयच्छतु ।
रक्तमाल्याम्बरः श्रीमान् रक्तचन्दनभूषितः ।
रक्तदिव्यवपुर्देवः पातु त्वां क्रौञ्चसूदनः ॥ ५ ॥

---

कुर्य्यात् कारयेत् शिष्यमिति शेषः इतरत्रापि तस्यैव स्नानविधानात् । किन्तु खल्वेतावतैव कर्म्म पर्य्याप्तं भवति ? नेत्याह पुनरिति । पुनर्हिताय नवैः शालियवैः साज्यानां नवानामेव शालियवानामाहुतिभिः ॐ स्कन्दाय ग्रहाय स्वाहेति मन्त्रेणाग्नावष्टोत्तरशतसंख्यकैरधिकैर्व्वा प्रक्षेपैः प्रज्वालयेत् ज्वलन्तं वह्निं प्रकर्षेण दीपयेत् ऋत्विगिति शेषः । अत्र शालियवैरिति "तृतीया च होश्छन्दसि" इति २।३।३ पा० सू० कर्म्मणि तृतीया । न तावद्व्याख्यानमिदमनुपपन्नं, जुहुतिं हि प्रकृत्य "धात्वर्थःप्रक्षेपमात्रम् स च स्वभावाच्चोदिताधारहविषो नियमेनापेक्षते" इत्याह माधवीयधातुवृत्तिः । हविश्च हवनीयद्रव्यमात्रं निराज्यस्य तत्सर्व्वं साज्यमेव निनीषन्नृत्विजो नियमेन । काम्यं कामयते तपसामिति परिशिष्टं निगदव्याख्यातम् ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे स्कन्दग्रहप्रतिषेधो नामाष्टाविंशोऽध्यायः ॥ २८ ॥

---

इति श्रीनारायणचन्द्र चक्रवर्त्तिविरचिते सुश्रुतार्थ सन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे स्कन्दग्रह प्रतिषेधोनामाष्टाविंशोऽध्यायः ।

---

# एकोनत्रिंशोऽध्यायः ।

अथातः स्कन्दापस्मारप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

बिल्वः शिरीषो गोलोमी सुरसादिश्च यो गणः ।
परिषेके प्रयोक्तव्यः स्कन्दापस्मारशान्तये ॥

---

क्रमागतं स्कन्दापस्मारचिकित्सितमधिकरोति अथात इत्यादिना । स्कन्दस्य ग्रहविशेषस्य सखा स्कन्दसखः अपस्मारयति निःसंज्ञं करोतीत्यपस्मारः । अपगतःस्मारोयस्मादिति वा वाक्यार्थः उक्तं हि "निःसंज्ञो भवति पुनर्भवेत् ससंज्ञः" इति स्कन्दसखोऽपस्मारः स्कन्दापस्मारः ॥ १ ॥

बिल्वइति । बिल्वशिरीषयोस्त्वचाविह ग्राह्ये गोलोमी, वचा ।

सर्व्वगन्धविपक्वन्तु तैलमभ्यञ्जने हितम् ।
क्षीरवृक्षकषाये च काकोल्यादौ गणे तथा ॥
विपक्तव्यं घृतं वापि पानीयं पयसान्वितम् ।
उत्सादनं वचाहिङ्गुयुक्तं स्कन्दग्रहे हितम् ॥
गृध्रोलूकपुरीषाणि केशा हस्तिनखा घृतम् ।
वृषभस्य च रोमाणि योज्यान्युद्धूपनेऽपि च ॥
अनन्तां कुक्कुटीं बिम्बीं मर्कटीञ्चापि धारयेत् ।
पक्वापक्वानि मांसानि प्रसन्ना रुधिरं पयः ॥
मुद्गौदनो निवेद्यश्च स्कन्दापस्मारिणे वटे ॥
चतुष्पथे च कर्त्तव्यं स्नानमस्य यतात्मना ।
स्कन्दापस्मारसंज्ञो यः स्कन्दस्य दयितः सखा ।

सुरसादिः "सू० ३८अ०" द्रष्टव्यः । सर्व्वगन्धश्च "उ० ३७ अ०" व्याहृतमस्माभिः । क्षीरेति । च शब्दोऽयं पक्षान्तरमाशंसति । वापीति निपात समुदायश्चार्थस्तदयमर्थः क्षीरवृक्षकषाये वटादिपञ्चककषाये वा तथा काकोल्यादिगणे काकोल्यादि कषाये वा पयसान्वितं पानीयं घृतं विपक्तव्यमित्यर्थः । युक्तं मिलितं वचाहिङ्गूत्सादनमुद्वर्त्तनं हितं भवतीतिशेषः । अनन्तामिति । अनन्ता विशल्या । कुक्कुटी शाल्मली । मर्कटी अपामार्गः । अनन्तादीनां मूलान्येवात्रादेयानि । प्रसन्ना मद्यविशेषः । मुद्गयूषसहित ओदनः मुद्गौदनः । अपस्मारयितुं शीलमस्येत्यपस्मारी स्कन्दसखोऽपस्मारी स्कन्दापस्मारी । वटे वटमूले । अत्र निवेद्य इति यथायोगं लिङ्गवचनव्यत्यासेनान्वेयम् । चतुष्पथ इति । यतात्मना ऋत्विजा अस्य कुमारस्य चतुष्पथे स्नानं कर्त्तव्यं कारयितव्यम , प्रागुक्त साहचर्य्यात् गायत्र-

विशाखसंज्ञश्च शिशोः शिवोऽस्तु विकृताननः ॥ २ ॥
इति सुश्रुतसंहितायामुत्तरतन्त्रे स्कन्दापस्मारप्रतिषेधो नामैकोनत्रिंशोऽध्यायः ॥२९ ॥

---

भिमन्त्रिताभि रद्भिरित्यन्वेयम् । रक्षासूक्तं पठति स्कन्देति ॥ २ ॥
इति श्रीडाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे स्कन्दापस्मार प्रतिषेधोनामैकोनत्रिंशोऽध्यायः ॥

---

# त्रिंशोऽध्यायः ।

---

अथातः शकुनीप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
शकुन्यभिपरीतस्य कार्य्यो वैद्येन जानता ।
वेतसाम्रकपित्थानां निःक्वाथः परिषेचने ॥
कषायमधुरैस्तैलं कार्य्यमभ्यञ्जने शिशोः ।
मधुकोशीरह्रीवेर-सारिवोत्पलपद्मकैः ॥
रोध्रप्रियङ्गुमञ्जिष्ठा-गैरिकैः प्रदिहेच्छिशुम् ॥

---

क्रमागतं शकुनीप्रतिषेधमधिकरोति अथात इत्यादिना ॥ १ ॥

व्रणेषुक्तानि चूर्णानि पथ्यानि विविधानि च।
स्कन्दग्रहे धूपनानि तानीहापि प्रयोजयेत्॥
शतावरीमृगैर्व्वारु नागदन्तीनिदिग्धिकाः।
लक्ष्मणां सहदेवाञ्च वृहतीञ्चापि धारयेत्॥
तिलतण्डुलकं माल्यं हरितालं मनःशिला।
बलिरेष करञ्जेषु निवेद्यो नियतात्मना॥
निकुञ्जे च प्रयोक्तव्यं स्नानमस्य यथाविधि।
स्कन्दग्रहोपशमनं घृतं तच्चेह पूजितम्॥
कुर्य्याच्च विविधां पूजां शकुन्याः कुसुमैः शुभैः।
अन्तरीक्षचरा देवी सर्व्वालङ्कारभूषिता।
अधोमुखी तीक्ष्णतुण्डा शकुनी ते प्रसीदतु॥
दुर्द्दर्शना महाकाया पिङ्गाक्षी भैरवस्वरा।
लम्बोदरी शङ्कुकर्णी शकुनी ते प्रसीदतु॥ २॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे शकुनीप्रतिषेधो नाम त्रिंशोऽध्यायः॥ ३०॥

---

शकुनीति। नागदन्ती, दन्तीभेदः। करञ्जेषु नक्तमालानां मूलेषु। निकुञ्जे लतापिहितोदरे देशे। रक्षासूक्तं पठति अन्तरीक्षेति॥ २॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे शकुनीप्रतिषेधोनाम त्रिंशोऽध्यायः॥

# एकत्रिंशोऽध्यायः ।

अथातो रैवतीप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

अश्वगन्धाजशृङ्गी च सारिवा सपुनर्नवा ।

सहे विदारी च तथा कषायाः सेचने हिताः ॥

तैलमभ्यञ्जने कार्य्यं कुष्ठे सर्ज्जरसेऽपि वा ।

धवाश्वकर्ण-ककुभ-धातकीतिन्दुकीषु च ।

काकोल्यादिगणे चैव पानीयं सर्पिरिष्यते ।

कुलत्थाः शङ्खचूर्णञ्च प्रदेहाः सार्व्वगन्धिकाः ॥

गृध्रोलूकपुरीषाणि यवा यवफलो घृतम् ।

सन्ध्ययोरुभयोः कार्य्यमेतदुद्धूपनं शिशोः ॥

वरुणारिष्टकमयं रुचकं सैन्धवं तथा ॥

सततं धारयेच्चापि कृतं वा पौत्रजीविकम् ।

शुक्लाः सुमनसो लाजाः पयः शाल्योदनं तथा ॥

---

क्रमागतं रैवती प्रतिषेध मधिकरोति अथात इत्यादिना ॥ १ ॥

अश्वगन्धेति । सहे मुद्गमाषपर्ण्यौ । सर्ज्जः सालरसः "धुना" इति प्रथते धवः स्वनामप्रसिद्धो राढ़ीयोद्भवः । अश्वकर्णः शालभेदः । ककुभोऽर्जुनः । तिन्दुकी "गाव" इति परिचीयते । "चातुर्जातक कर्पूर

बलिर्निवेद्यो गोतीर्थे रेवत्यै प्रयतात्मना।
सङ्गमे च भिषक् स्नानं कुर्य्याद्धात्रीकुमारयोः॥
नानावस्त्रधरा देवी चित्रमाल्यानुलेपना।
चलत्कुण्डलिनी श्यामा रेवती ते प्रसीदतु॥
लम्बा कराला विनता तथैव बहुपुत्रिका।
रेवती सततं माता सा ते देवी प्रसीदतु॥ २॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे रेवतीप्रतिषेधो नामैकत्रिंशोऽध्यायः॥ ३१॥

---

कक्कोलागुरु कुङ्कुमम् लवङ्गसहितञ्चैव सर्व्वगन्धं प्रकीर्त्तितम्” इत्युक्तेन सर्व्वगन्धेन संसृष्टाः सार्व्वगन्धिकाः। यवफलोवंशः। वरणेति। अपि-रयमवधारणार्थः वरुणारिष्टक मयं निम्बवरुणकाष्ठोद्भवम्। तथासैन्धुकं सिन्धुवार काष्ठोद्भवम्। वाशब्दादथवा कृतं पौत्रजीविकं पुत्रञ्जीववीज सम्बन्धीयं रुचकं माल्यं सततं धारयेदेव शिशुमितिशेषः। पुत्रञ्जीवोनाम ‘जीयापुता’ इति परिचीयते॥

गोतीर्थेगोष्ठे गोशालायामिति यावत्। सङ्गमइति। सङ्गमेनदनद्यो-र्मेलने कुर्य्यात् कारयेदित्यर्थः। रक्षामन्त्रमुपदिशति नानेति॥ २॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे रेवतीप्रतिषेधोनामैकत्रिंशोऽध्यायः॥

# द्वात्रिंशोऽध्यायः ।

अथातः पूतनाप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

कपोतवङ्काऽरलुकौ वरुणः पारिभद्रकः ।
आस्फोता चैव योज्याः स्युर्बालानां परिषेचने ॥ २ ॥
वचा वयःस्था गोलोमी हरितालं मनःशिला ।
कुष्ठं सर्ज्जरसश्चैव तैलार्थे वर्ग इष्यते ॥
हितं घृतं तुगाक्षीर्य्यां सिद्धं मधुरकेषु च ।
कुष्ठतालीशखदिरं चन्दनस्यन्दने तथा ॥
देवदारु वचा हिङ्गु कुष्ठं गिरिकदम्बकः ।
एलाहरेणवश्चापि योज्या उद्धूपने सदा ॥
गन्धनाकुलिकुम्भीका मज्जानो बदरस्य च ।
कर्कटास्थि घृतञ्चैव धूपनं सर्षपैः सह ॥
काकादनीं चित्रफलां बिम्बीं गुञ्जाञ्च धारयेत् ।
मत्स्यौदनञ्च कुर्व्वीत कृशरां पललं तथा ॥

---

क्रमागतं पूतनाप्रतिषेधमधिकरोति अथात इत्यादिना ॥ १ ॥

कपोतेति । कपोतवङ्काब्राह्मी, अरलुकः श्योनाकः । आस्फोतानामौषधिः "आफोरमाली" इति "छागलवाटी" इति परिचीयते ॥ २ ॥

वयस्था हरीतकी । गोलोमी शब्देनेह श्वेतदुर्व्वाभिप्रेयते । मधुरकेषु "सू० ४२ अ०" उक्तेषु मधुरवर्गेषु । धूपनमाह कुष्ठेति । चन्दनं

शरावसम्पुटे कृत्वा बलिं शून्यगृहे हरेत्।
उच्छिष्टेनाभिषेकेण शिरसि स्नानमिष्यते॥
पूज्या च पूतना देवी बलिभिः सोपहारकैः॥
मलिनाम्बरसंवीता मलिना रूक्षमूर्द्धजा।
शून्यागाराश्रिता देवी दारकं पातु पूतना॥
दुर्द्दर्शना सुदुर्गन्धा कराला मेघकालिका।
भिन्नागाराश्रया देवी दारकं पातु पूतना॥ २॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे पूतनाप्रतिषेधो नाम द्वात्रिंशोऽध्यायः॥ ३२॥

---

तिनिशः। "तिनाश" इति माथुरैरभिधीयते। गिरिकदम्बो नीपः इति पर्य्यायौ। धूपनान्तरं निवेदयति गन्धेति। गन्धनाकुली रास्ना। कुम्भीका वारिपर्णी "पाना" इति प्रथते। गन्धनाकुली सहिता कुम्भीका गन्धनाकुलिकुम्भीका। काकेति। काकादनी श्वेतगुञ्जा। चित्रफलाकण्टकारी। कृशरा तिलकल्कः। पललं मांसं। उच्छिष्टेन पीतावशिष्टेन अभिषेकेण जलेन। भाषीव माषंसत्ते अलिमेति॥ २॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे पूतनाप्रतिषेधोनाम द्वात्रिंशोऽध्यायः॥

# त्रयस्त्रिंशोऽध्यायः ।

अथातोऽन्धपूतनाप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

तिक्तकद्रुमपत्राणां कार्य्यः क्वाथोऽवसेचने ।
सुरा सौवीरकं कुष्ठं हरितालं मनःशिला ॥
तथा सर्ज्जरसश्चैव तैलार्थमुपदिश्यते ।
पिप्पल्यः पिप्पलीमूलं वर्गो मधुरको मधु ॥
शालपर्णी बृहत्यौ च घृतार्थमुपदिश्यते ॥
सर्व्वगन्धैः प्रदेहश्च गात्रेष्वक्ष्णोश्च शीतलैः ॥
पुरीषं कौक्कुटं केशांश्चर्म्म सर्पत्वचं तथा ।
जीर्णाश्च भिक्षुसङ्घाटीं धूपनायोपकल्पयेत् ॥
कुक्कुटीं मर्कटीं शिम्बीमनन्ताञ्चापि धारयेत् ॥
मांसमामं तथा पक्वं शोणितञ्च चतुष्पथे ।
निवेद्यमन्तश्च गृहे शिशो रक्षानिमित्ततः ॥
शिशोश्च स्नपनं कुर्य्यात् सर्व्वगन्धादिकैः शुभैः ॥

---

क्रमागतमन्धपूतनाप्रतिषेधमधिकरोति अथात इत्यादिना ॥ १ ॥

तिक्तकेति । तिक्तकः सू० ४२ अ० उक्त स्तिक्तोवर्गः । सुरेति । अत्र सुरा सौवीरकेषु चतुर्षु शेषाणां कल्कः । मधुरोवर्गः 'सू० ४२ अ०' द्रष्टव्यः । सर्व्वगन्धै बहुतमयोगयुक्तत्वेनानेकविधैः "चातुर्ज्जातककर्पूरकक्कोलागुरुकुङ्कुमम् । लवङ्ग सहितञ्चैतत् सर्व्वगन्धम्" इत्युक्तद्रव्याणि चैवाकार्य

कराला पिङ्गला मुण्डा कषायाम्बरवासिनी ।
देवी बालमिमं प्रीता संरक्षत्वन्धपूतना ॥ २ ॥
इति सुश्रुतसंहितायामुत्तरतन्त्रे ऽन्धपूतनाप्रतिषेधो
नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

---

# चतुस्त्रिंशोऽध्यायः ।

अथातः शीतपूतनाप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
कपित्थं सुवहां बिम्बीं तथा बिल्वं प्रचीबलम् ।
नन्दीं भल्लातकीञ्चापि परिषेके प्रयोजयेत् ॥

---

गन्धद्रव्यैर्वा । शीतलैः कुमुदोत्पलादिभिः । सङ्घाटी चीवरम्, कुक्कुटी शाल्मली मर्कटी अपामार्गः, अनन्ता विशल्या अनन्तमूलमिति पौरस्त्याः सर्व्वगन्धादिकैः सर्व्वगन्धवद्भिर्गन्धद्रव्यैः । काम्यं कामयते । करालेति ॥२॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे ऽन्धपूतनाप्रतिषेधोनाम त्रयस्त्रिंशोऽध्यायः ॥

---

नवग्रहाकृतिविज्ञानीयक्रमागतं शीतपूतना प्रतिषेधमधिकरोति अथात इत्यादिना ॥ १ ॥

कपित्थमिति । सुवहा रास्ना, प्रचीबलं वचामनयेति प्रचीबला इन्दीवरादिः । प्रचीबला वचा तुरगगन्धा चेति यावत् तस्याः पत्रं

बस्तमूत्रं गवां मूत्रं मुस्तञ्च सुरदारु च ।
कुष्ठञ्च सर्व्वगन्धांश्च तैलार्थमवचारयेत् ॥
रोहिणीसर्जखदिर-पलाशककुभत्वचः ।
निःक्वाथ्य तस्मिन् निःक्वाथे सक्षीरञ्च विपाचितम् ॥
गृध्रोलूकपुरीषाणि बस्तगन्धामहिस्त्वचः ।
निम्बपत्राणि मधुकं धूपनार्थे प्रयोजयेत् ॥
धारयेदपि लम्बाञ्च गुञ्जां काकादनीं तथा ।
नद्यां मुद्गकृतैश्चान्नैस्तर्पयेच्छीतपूतनाम् ॥
देव्यै देयश्चोपहारो वारुणी रुधिरं तथा ।
जलाशयान्ते बालस्य स्नपनञ्चोपदिश्यते ॥
मुद्गौदनाशना देवी सुराशोणितपायिनी ।
जलाशयालया देवी पातु त्वां शीतपूतना ॥ २ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे शीतपूतनाप्रतिषेधो
नाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

---

प्रचीवलम । नन्दीमन्दीहय: 'नाइकर' इति प्रथते । सर्व्वगन्धो नामित: पूर्व्वाध्याये व्याहृतमस्माभिः । तैलान्तरमाह रोहिणीति । अत्र चकारेण तुवरा समाकृष्टतया पूर्व्वस्मादुपमर्ज्जनीभूतस्यापि तैलस्यावमर्षः क्रियते । लम्बा तिक्ततुम्बी, काकादनी श्वेतगुञ्जा चनामयं प्रार्थयते मुद्गौदनेति ॥ २ ॥

इति श्रीहाराणचन्द्र चक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
शीतपूतना प्रतिषेधोनाम चतुस्त्रिंशोऽध्यायः ॥

# पञ्चविंशोऽध्यायः ।

अथातो मुखमण्डिकाप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

कपित्थबिल्वतर्कारी-वांशीगन्धर्वहस्तकाः ।
कुबेराक्षी च योज्याः स्युर्बालानां परिषेचने ॥
स्वरसैर्भृङ्गवृक्षाणां तथाजशृङ्गिगन्धयोः ।
तैलं वसाञ्च संयोज्य पचेदभ्यञ्जने शिशोः ॥
मधूलिकायां पयसि तुगाक्षीर्यां गणे तथा ।
मधुरे पञ्चमूले च कनीयसि घृतं पचेत् ॥
वचा सर्जरसः कुष्ठं सर्पिश्चोद्धूपने हितम् ।
धारयेदपि जिह्वाश्च चाषचीरल्लिसर्पजाः ॥
वर्णकं चूर्णकं माल्यमञ्जनं पारदं तथा ।
मनःशिलाश्चोपहरेद् गोष्ठमध्ये बलिं तथा ॥

---

प्रक्रान्तं मुखमण्डिकाप्रतिषेधमधिकरोति । अथात इत्यादिना ॥ १ ॥

कपित्थेति । तर्कारी जयन्ती, वांशी वंशलोचना गन्धर्वहस्तक एरण्डः कुबेराक्षी पाटला । भृङ्गवृक्षो भृङ्गराजः अजशृङ्गिगन्धयोः यमान्यजगन्धयोः । मधूलिका मूर्वा मधुरोगणः 'सू० ३७ अ० उक्तो मधुरोवर्गः । अत्र पयः स्नेहसमम् । तुगाक्षीरीव्यतिरिक्तानां त्रयाणां स्नेहसमाश्रयः क्वाथाः कल्कस्तु चतुर्थांशमित्युपदेशः । धारयेदिति । चाषः स्वर्णचूडो नीलाङ्गः खगभेदः "नीलकण्ठ" इति विख्यायते चिरल्ली भिल्लीति केचित् । अन्ये तु प्रतिकूलतया

पायसं सपुरोडाशं बल्यर्थमुपहारयेत् ।
मन्त्रपूताभिरद्भिश्च तत्रैव स्नपनं हितम् ॥
अलङ्कृता रूपवती सुभगा कामरूपिणी ।
गोष्ठमध्यालयरता पातु त्वां मुखमण्डिका ॥ २ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे मुखमण्डिकाप्रतिषेधो नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

---

दीर्घत्वमवलुम्पति । वर्णकं हरितालं चूर्णकं फल्गु समाख्यं रजः "आविर" इति परिचीयते । कं नाम बलिमुपहरेत् ? आह पायसमिति पायसः परमान्नं पुरोडाशो हविर्भेदो यवचूर्णकृतःपूपविशेष इति यावत् । मन्त्रपूता गायत्र्यभिमन्त्रिता । निरामय मभीप्सति अलङ्कृतेति ॥ २ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे मुखमण्डिकाप्रतिषेधोनाम पञ्चत्रिंशोऽध्यायः ॥

# षट्त्रिंशोऽध्यायः ।

अथातो नैगमेषप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

बिल्वाग्निमन्थपूतीकाः कार्य्याः स्युः परिषेचने ।
सुरासौवीरधान्याम्लैः परिषेकश्च शस्यते ॥
प्रियङ्गुसरलानन्ता-शतपुष्पाकुटन्नटैः ॥
पचेत् तैलं सगोमूत्रैर्दधिमस्त्वम्लकाञ्जिकैः ॥
पञ्चमूलद्वयक्वाथे क्षीरे मधुरकेषु च ।
पचेद्घृतञ्च मेधावी खर्ज्जूरीमस्तकेऽपि च ॥
वचां वयःस्थां गोलोमीं जटिलां वापि धारयेत् ।
उत्सादनं हितञ्चात्र स्कन्दापस्मारनाशनम् ॥
सिद्धार्थकवचाहिङ्गु-कुष्ठञ्चैवाक्षतैः सह ।
भल्लातकाजमोदाश्च हितमुद्धूपनं शिशोः ॥

---

क्रमागतं नैगमेषप्रतिषेधमधिकरोति । अथात इत्यादिना । "ईजगति कुत्सनयोः" इति धातु स्तस्यैगेति रूपं नैगः कुत्साभावो विद्यते यस्येति नैगो यशस्वः वक्ष्यति च "महायशाः" इति । नैगोमेषाननो यस्तो नैगमेष उच्यते भीमो भीमसेन इतिवत् । मेषाननत्वञ्चास्य परमतो निवेदयिष्यते स्वय-मेव ॥ १ ॥

बिल्वेति । कुटन्नटः श्योनाकः मधुरकोनाम 'सू० ४२ अ०' उक्तो मधुरोगणः । खर्ज्जूरः खर्ज्जूरी, वयस्था हरीतकी, गोलोमीह श्वेत-

मर्कटोलूकगृध्राणां पुरीषाणि नखाश्च वै ।
धूपः सुप्ते जने कार्य्यो बालस्य हितमिच्छता ॥
तिलतण्डुलकं माल्यं भक्ष्यांश्च विविधानपि ।
कुमारपितृमेषाय वृक्षमूले निवेदयेत् ॥
अधस्तादटवृक्षस्य स्नपनञ्चोपदिश्यते ।
वलिं न्यग्रोधवृक्षेषु तिथौ षष्ठ्यां निवेदयेत् ॥
अजाननश्चलाक्षिभ्रूः कामरूपी महायशाः ।
बालं पालयिता देवो नैगमेषोऽभिरक्षतु ॥ २ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे नैगमेषप्रतिषेधो
नाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥

---

दूर्व्वेति प्राच्चः, जटिला जटामांसी सुमेजनि षड्डराजे, कुमारपितृमेषाय कुमारस्य पितृग्रहसमाख्याय मेषाननाय षष्ठाय नैगमेषायेतिनिष्कर्षः । पितृग्रहसंज्ञा चास्य प्रागेवोपदिष्टा । स्नपनं गायत्र्याभिमन्त्रिताभि रद्भि-रित्युक्तेयं प्रागुक्तसाहचर्य्यात् । षष्ठ्यां पुनर्वलिस्थानं विशिनष्टि, वलिमिति । वरं वृणीते अजेति । मेषापरपर्य्यायोऽयमजशब्दः "मत्तवारणगते ऽजवक्त्रः" इति कालिदासवचनमिरूपणवत् ॥ २ ॥

इति श्रीडारानाथचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
उत्तरतन्त्रे नैगमेषप्रतिषेधोनाम षट्त्रिंशोऽध्यायः ॥

# सप्तत्रिंशोऽध्यायः ।

अथातो ग्रहोत्पत्तिमध्यायं व्याख्यास्यामः ॥ १ ॥

नव स्कन्दादयः प्रोक्ता बालानां य इमे ग्रहाः ।
श्रीमन्तो दिव्यवपुषो नारीपुरुषविग्रहाः ॥
एते गुहस्य रक्षार्थं कृत्तिकोमाग्निशूलिभिः ।
सृष्टाः शरवणस्थस्य रक्षितस्यात्मतेजसा ॥
स्त्रीविग्रहा ग्रहा ये तु नानारूपा मयेरिताः ।
गङ्गोमाकृत्तिकानां ते भागा राजसा मताः ॥
नैगमेषस्तु पार्वत्या सृष्टो मेषाननो ग्रहः ।
कौमारधारी देवस्य गुहस्यात्मसमः सखा ॥
स्कन्दापस्मारसंज्ञो यः सोऽग्निनाग्निसमद्युतिः ।

---

सम्प्रत्यवसरवशाद् व्याचिख्यासितत्वेनोररीकृतं ग्रहाणामुत्पत्त्याख्यानमधिकरोति अथात इत्यादिना ॥ १ ॥

ग्रहाणामुत्पत्तिमधिकृत्य कृता आख्यायिका ग्रहोत्पत्तिः "लुप् आख्यायिकाभ्यो बहुलम्" इति तद्धितलुप् । नवेति । स्वतेजसा रक्षितस्यासहायत्वेन स्थितस्येत्येव हृदयम्, वामनपुराणे चतुःपञ्चाशेऽध्याये "दिव्ये शरवणे स्थितः" इत्युपक्रम्य तथैवोपदेशात् । कृत्तिकोमेति पार्वत्यपरपर्यायोऽयमुमाशब्दोऽजहत्स्वार्थया लक्षणया गङ्गामपि लक्षयति हिमवत्-

स च स्कन्दसखो नाम विशाख इति चोच्यते ॥
स्कन्दः सृष्टो भगवता देवेन त्रिपुरारिणा ।
बिभर्त्ति चापरां संज्ञां कुमार इति स ग्रहः ॥
कुमारः स्कन्दसामान्यादत्र केचिदपण्डिताः ।
गृह्णातीत्यल्पविज्ञाना ब्रुवते देहचिन्तकाः ॥
बाललीलाधरो योऽयं देवो रुद्राग्निसम्भवः ।
मिथ्याचारेषु भगवान् स्वयं नैष प्रवर्त्तते ॥ २ ॥

---

प्रभवत्वसाधर्म्यादित्यवश्यं वक्तव्यम् परमतो गङ्गोमाकृत्तिकानामेत्युक्तः। कौमार धारीति। कौमारशब्दस्येह कार्त्तिकेयसमे वयसि तात्पर्यमिति गम्यते गुहस्यात्मसमः सखेति विशेषणात् सखित्वं हि प्रायेण सवयसामेव सम्भवतीति पश्याम स्तथाच कार्त्तिकेयवयस्य इत्यर्थनिष्कर्षः। स्कन्दसखः स्कन्दग्रहसखो न पुनः कार्त्तिकेयसखः तत् सखाभिपन्न इति तच्छब्देन प्रागस्यैवावमर्शात्। विशाखानक्षत्रे जातो विशाखः, विशाखः कार्त्तिकेय इवाकृत्येति वा विशाखः। येतु पुनः स्कन्दग्रहस्य स्कन्दःकुमार श्चेति कार्त्तिकेयसमानं नामधेयद्वितयमभिसमीक्ष्य भगवान् कार्त्तिकेय एव बालशरीराण्याविशतीत्याहुः तान् न्यक्कृत्यापाकरोति कुमार इति। कुमारः कार्त्तिकेयः स्कन्दसामान्यात् स्कन्दसमाननामधेयत्वात्। अपण्डिता स्तत्त्वानुगतबुद्धिरहिता। अल्पविज्ञाना यथावदविदितवेदितव्याः। किन्तु खलु एतान् न्यक्कुरुषे आह बालेति। स्मरन्तिहि "हृष्टश्च सुरैः शक्तोर्वीर्ये भूमौ पपातह भूमि स्तदपि पतञ्ज्ञौ वह्निश्च शरकानने" इति "प्रभवे, गर्भेश" तदिदं साम्प्रत मुक्तं रुद्रेति। रुद्राग्निज कार्त्तिकेयः। मिथ्याचारेषु कलावेशात्मकेषु पापाचारिष्वित्यर्थः "मिथ्या-च उच्यते" इति भगवद्गीतासु "मिथ्याचारः पापाचारः" इति भाष्यम्। एष कार्त्तिकेयः ॥ २ ॥

ततो भगवति स्कन्दे सुरसेनापतौ कृते।
उपतस्थुर्ग्रहाः सर्व्वे दीप्तशक्तिधरं गुहम्॥
ऊचुः प्राञ्जलयश्चैनं वृत्तिं नः संविधत्स्व वै।
तेषामर्थे ततः स्कन्दः शिवं देवमचोदयत्॥
ततो ग्रहांस्तानुवाच भगवान् भगनेत्रहृत्।
तैर्य्यग्योनं मानुषञ्च दैवञ्च त्रितयं जगत्॥
परस्परोपकारेण वर्त्तते धार्य्यतेऽपि च॥
देवा मनुष्यान् प्रीणन्ति तैर्य्यग्योनांस्तथैव च।
वर्त्तमानैर्यथाकालं शीतवर्षोष्णमारुतैः॥
इज्याञ्जलिनमस्कारजपहोमव्रतादिभिः।
नराः सम्यक् प्रयुक्तैश्च प्रीणन्ति त्रिदिवेश्वरान्॥
भागधेयं विभक्तञ्च शेषं किञ्चिन्न विद्यते।

---

तत इति उपतस्थुः वृत्तिलिप्सया तुष्टुवुः। 'वालिप्सायाम्' इति परस्मै पदम्। अचोदयत् नोदयामास। तैर्य्यग्योनं पशुपक्षिसमाख्यम्, जगत् जङ्गमो लोकः: "स्याज्जगत् पिष्टपे क्लीबं वायौ ना जङ्गमे त्रिषु" इति रुद्रः। धार्य्यते पुत्रपौत्रादिसन्तत्या सुखं स्थाप्यते इत्यर्थः। आप्यायते च "देवान् भावयतानेन ते देवा भावयन्तु वः। परस्परं भावयन्तः श्रेयः परमवाप्स्यथ" इति भगवद्गीतासु। परस्परोपकारप्रकारं स्वयमपि परिस्फुटमवगमयति देवा इति। इज्यादौ च तैर्य्यग्योनानां उपकरणत्वेनो-क्तानां नरा इत्यत्र प्रधानं तस्योपकरणं भवत् इति, तदिदमुक्तं सम्यक् प्रयुक्तैः फलादिवर्जितभक्तिसमाधिसमन्वितत्वेन

तद्युष्माकं शुभा वृत्तिर्बालेष्वेव भविष्यति ॥
कुलेषु येषु नेज्यन्ते देवाः पितर एव च ।
ब्राह्मणाः साधवश्चैव गुरवोऽतिथयस्तथा ॥
निवृत्ताचारशौचेषु परपाकोपभोजिषु ।
उत्सन्नबलिभिक्षेषु भिन्नकांस्योपभोजिषु ॥
गृहेषु तेषु ये बालास्तान् गृह्णीध्वमशङ्किताः ॥
तत्र वो विपुला वृत्तिः पूजा चैव भविष्यति ॥
एवं ग्रहाः समुत्पन्ना बालान् गृह्णन्ति चाप्यतः ॥
ग्रहोपसृष्टा बालास्तु दुश्चिकित्स्यतमा मताः ॥
वैकल्यं मरणञ्चाशु ध्रुवं स्कन्दग्रहे मतम् ॥
स्कन्दग्रहोऽत्युग्रतमः सर्व्वेष्वेव यतः स्मृतः ॥
अन्यो वा सर्व्वरूपस्तु न साध्यो ग्रह उच्यते ॥ ३ ॥

---

विभिन्नत् साधितैरित्यर्थः । नातःपरस्परोपकारेण सुखं वर्त्तमानेषु वो वृत्तिरुप लप्स्यते इत्याकूतम् । स्यादेतत् कथं नु खलु दिष्टमनुसरन् वृत्तिं न संविधत्-स्वेत्याह भागधेयं भाग्यं विभक्तं तत्तत्फलविशेषेण निर्णीतम्, शेषमविभक्तं किञ्चिद्भागधेयं न विद्यते तत् तस्मात्, शुभा अभीष्टेत्यर्थः । भगवन् बालानामिज्यादावसामर्थ्यात्तद्बन्धुभिः कृतैरिज्यादिभिरेव न वृत्त्यादिमन्तो भविष्यन्ति तत् किमिदमुच्यते बालेष्वेवेत्याह कुलेष्विति । इज्यादिभि-र्विनाकृतानि मानवा असंशयं देवताभिस्त्यज्यन्ते ततश्च अपक्रान्तदेवता स्तेऽवश्यं नानाविधैः दुःखैः पीड्यन्ते पीड़िताश्च देवपूजाबलिहोमादी प्रारभन्ते प्रायेण तदिह मुख्या अयाचिता वृत्तिः । अयाचिता वृत्तिः पूजा च

इति सुश्रुतसंहितायामुत्तरतन्त्रे षष्ठीत्पत्ति-
र्नाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

---

# अष्टत्रिंशोऽध्यायः ।

---

अथातो योनिव्यापत्प्रतिषेधं व्याख्यास्यामः ॥ १ ॥

प्रवृद्धलिङ्गं पुरुषं याऽत्यर्थमुपसेवते ।
रूक्षदुर्ब्बलबालायास्तस्या वायुः प्रकुप्यति ॥
स दुष्टो योनिमासाद्य योनिरोगाय कल्पते ।
शेषाणामपि दोषाणां यथास्वं लक्षणेन तु ॥

---

भविष्यत्याशीस्त्विति संशयरहिता इत्यर्थः । परिशिष्टं निगदव्याख्यातम् ।

इति श्रीहाराणचन्द्र चक्रवर्त्तिविरचिते सुश्रुतार्थ सन्दीपने सुश्रुतभाष्ये
उत्तरतन्त्रे षष्ठीत्पत्तिर्नाम सप्तत्रिंशोऽध्यायः ।

---

व्यापन्नायां हि योन्यां नाधीयते गर्भः कथञ्चिदाहितोऽपि कुक्षावेव विपद्यते जातो वा न चिरं जीवेदितितु उदावर्त्तेत्यादि सूत्रमनुसन्धायाध्यवसितव्यम् । तदिदानीं कौमारतन्त्र मुपसंहरन् कुमारजन्मानुगुणं योनिव्यापत्प्रतिषेध-मधिकरोति अथात इत्यादिना ॥ १ ॥

प्रवृद्धेति । कियतां दृष्टाधिरयमेवमेवोत्पद्यते ? नेत्याह शेषाणामिति ।

विंशतिर्व्यापदो योनेर्निर्द्दिष्टा रोगसंग्रहे ॥
मिथ्याचारेण ताः स्त्रीणां प्रदुष्टेनार्त्तवेन च।
जायन्ते बीजदोषाच्च दैवाच्च शृणु ताः पृथक् ॥
उदावर्त्ता तथा वन्ध्या विप्लुता च परिप्लुता।
वातला चेति वातोत्था पित्तोत्था रुधिरक्षरा ॥
वामिनी स्रंसिनी वापि पुत्रघ्नी पित्तला च या।
अत्यानन्दा च या योनिः कर्णिनी चरणाद्वयम् ॥
श्लैष्मिकी सकफा ज्ञेया षण्डी च फलिनी तथा।
महतीसूचिवक्त्रा च सर्व्वजेति त्रिदोषजा ॥ २ ।
साफेनिलमुदावर्त्ता रजः कृच्छ्रेण मुञ्चति ॥ ३ ॥
वन्ध्यां नष्टार्त्तवां विद्याद्विप्लुतां नित्यवेदनाम् ॥ ४ ॥

---

रोगसंग्रहे प्राग्नन्यायुर्व्वेदे। आचारोऽत्राविशेषादाहारविहारव्यवहारः। मिथ्यात्वञ्चाहितत्वमित्यवोचाम, कुष्ठनिदानभाष्ये सप्रमाणम्। तथाच मिथ्याचारेणाहिताहारविहारेणेत्यायातम्। एवञ्च तस्यां तस्यामवस्थायां प्रहृष्टलिङ्गवेवाया अपि मिथ्याचारत्वेनोपलम्भेऽपि पृथगुपादानं चिरप्रकारित्वेनाव्यभिचारित्वेन चैकान्ततः प्राधान्यादित्यनुसन्धेयम्। प्रदुष्टेन "शा० २अ०" निर्द्दिष्टदुष्टलिङ्गपरोतेन, बीजदोषात् स्त्रीणां मातापित्रोरितरेतरस्य-रजः कांनिर्व्वचनीय-दोषदुष्टान्मिश्रीभावमापन्नाद्बीजादित्यर्थनिष्कर्षः। दैवा-त्पयोबाल्मन याद्दष्टवशादित्यु नेयम्। स्मरन्ति हि "शा० २अ०" 'मातापित्रोश्च नास्तिक्यादशुभैश्च पुराकृतैः वातादीनाञ्च कोपेन गर्भो विकृतिमाप्नुयात्" इति विकृतिश्च सा गर्भात् प्रभृत्याप्रसयौवनं यावत् सूक्ष्मरूपेणावस्थाय पश्चात् प्रव्यक्ततामुपैतीत्युपपन्नं भवति दैवादिति। श्लैष्मिकी च सकफेति तान्पर्य्यम्।२
समाफेनिलमर्त्तं रक्तं टीकत्वावगमयति चेति। उदावर्त्तां वाय्वावृतां

परिप्लुतायां भवति ग्राम्यधर्मेण रुजा भृशम् ॥ ५ ॥
वातला कर्कशा स्तब्धा शूलनिस्तोदपीड़िता ॥ ६ ॥
चतसृष्वपि चाद्यासु भवन्त्यनिलवेदनाः ॥ ७ ॥
सदाहं प्रक्षरत्यस्रं यस्याः सा लोहितक्षरा ॥ ८ ॥
सवातमुद्गिरेद्बीजं वामिनी रजसा युतम् ॥ ९ ॥
प्रस्रंसिनी स्रंसते तु क्षोभिता दुःप्रसूश्च या ॥ १० ॥
स्थितं स्थितं हन्ति गर्भं पुत्रघ्नी रक्तसंक्षयात् ॥ ११ ॥
अत्यर्थं पित्तला योनिर्दाहपाकज्वरान्विता ॥ १२ ॥
चतसृष्वपि चाद्यासु पित्तलिङ्गोच्छ्रयो भवेत् ॥ १३ ॥
अत्यानन्दा न सन्तोषं ग्राम्यधर्मेण गच्छति ॥ १४ ॥
कर्णिन्यां कर्णिकायोनौ श्लेष्मासृग्भ्यां तु जायते ॥ १५ ॥

---

वर्त्तते [illegible]वेगविघातः सोऽस्या अस्तीत्युदावर्त्ता नष्टस्त्रावीजत्वादि दोष-दुष्टं नष्टञ्च तिरोहितमितिनष्टे, नष्टे आर्त्तवेयस्याःसा नष्टार्त्तवा । वात-लेति । अत्र विशेषेण वातवेदना भवन्तीत्यवगन्तव्यम् परमतः [illegible]-पीस्वपि । प्रेति । यादुःप्रसूर्दुःखजातायोनिः क्षोभिता कथञ्चित् [illegible] स्रंसते अधःपतति सा प्रस्रंसिनीनाम । स्थितमिति । पुत्रश्चदुहिता च पुत्रौ "भ्रातृपुत्रौ स्वसृदुहितृभ्यां" इति "पा० सू० १।२।६८ पुत्रशब्दः शिष्यते तौ च नचिरं [illegible] प्रत्येतव्यौ साधारणशब्दविशेषात् [illegible]-[illegible] । पुत्रौ हन्तीति पुत्रघ्नी पदमिदं योनावुपचर्य्यते तथाच रक्तसंक्षयात् [illegible] पुत्रघ्नीनामयोनिः क्वचित् स्थितं स्थितं [illegible] गर्भमपि हन्ति दोष[illegible]दित्यभिसन्धिः । अत्यानन्देति । [illegible] [illegible] योनिर्[illegible]-[illegible] । कर्णिका [illegible] [illegible] कर्णिके-

मैथुनेऽचरणा पूर्व्वं पुरुषादतिरिच्यते ॥ १६ ॥
बहुशश्चातिचरणात्तयोर्बीजं न विन्दति ॥ १७ ॥
श्लेष्मला पिच्छिला योनिः कण्डूयुक्तातिशीतला ॥ १८ ॥
चतसृष्वपि चाद्यासु श्लेष्मलिङ्गोच्छ्रितिर्भवेत् ॥ १९ ॥
अनार्त्तवस्तनी षण्डी खरस्पर्शा च मैथुने ॥ २० ॥
अतिकायगृहीतायास्तरुण्याः फलिनी भवेत् ॥ २१ ॥
विवृतातिमहायोनिः——————॥ २२ ॥
——————सूचिवक्त्रातिसंवृता ॥ २३ ॥
सर्व्वलिङ्गसमुत्थाना सर्व्वदोषप्रकोपजा ॥ २४ ॥
चतसृष्वपि चाद्यासु सर्व्वलिङ्गोच्छ्रितिर्भवेत् ॥ २५ ॥
पञ्चासाध्या भवन्तीमा योनयः सर्व्वदोषजाः ॥ २६ ॥

---

त्यभिधीयते। अचरणां निवेदयति मैथुन इति। यत्र योनौ मैथुने मैथुनकाले पुरुषात् पुरुषवीजात् पूर्व्वं अतिरिच्यते निःशेषं निर्गच्छति स्त्रीवीजमिति शेषः। सा खलु मैथुनाचरणादचरणाभिधाना योनिर्बीजं शुक्रं न विन्दति न लभते स्खलितस्यार्त्तवस्य प्रागेव वहिर्निष्क्रमणादित्युन्नेयम्। योनिर्हि सङ्कुच्य युगपत् स्खलितं शुक्रार्त्तवमन्तः स्थापयति गर्भमभिनिर्व्वर्त्तयितुं मत्वन्यदितितु "शा० ३अ०" अधिगम्याध्यवसितव्यम्। अतिचरणां व्याचष्टे बहुश इति। बहुशश्चरणात् दैनन्दिनमनेकवारान् मैथुनाचरणात् अतिचरणात् पुमांसमतिक्रम्य चरणाच्चान्या अचरणाप्रतियोगितया अतिचरणा नाम योनिरपि वीजं न विन्दति न लभते बहुशश्चरणजनितेन योनेः शैथिल्येन वीजग्रहणानुगुणभूतायाः सङ्कोचशक्तेः समुत्कावमाकाशात् पुम्बीजस्याप्रसरत्वाच्च। तदात्वेऽपि विकृतद्वारत्वात् स्खलितं शुक्रं सद्य एव वहिर्निःसरतीत्याकूतम्। अतिकायगृहीताया महालिङ्गेन सङ्गतायाः फलिनी फलवन्निःसृतांशविशेषेत्यर्थः॥ १४—२६॥

प्रतिदोषन्तु साध्यासु स्नेहादिक्रम इष्यते ।
दद्यादुत्तरवस्तींश्च विशेषेण यथोदितान् ॥ २७ ॥
कर्कशां शीतलां स्तब्धामल्पस्पर्शाञ्च मैथुने ।
कुम्भीस्वेदैरुपचरेत् सानूपौदकसंयुतैः ॥
मधुरौषधसंयुक्तान् वेशवारांश्च योनिषु ।
निक्षिपेद्धारयेच्चापि पिचुं तैलमतन्द्रितः ॥
धावनानि च पथ्यानि कुर्वीतापूरणानि च ॥ २८ ॥
शोफशोषान्वितामूक्तां कुर्य्याच्छीतं विधिं भिषक् ।
दुर्गन्धां पिच्छिलाञ्चापि चूर्णैः पञ्चकषायजैः ।
पूरयेद्राजवृक्षादिकषायैश्चापि धावनम् ॥ २९ ॥
योन्यान्तु पूयस्राविण्यां शोधनद्रव्यसंभृतैः ।
सगोमूत्रैः सलवणैः पिण्डैरापूरणं हितम् ॥ ३० ॥

---

प्रतीकारक्रममुपदिदिक्षति प्रतीति । यथोदितानित्यनुवासनोत्तर वस्तिचिकित्सिते उदितस्यानतिक्रमो यथोदितं ततो यथं श्राद्याच विधिवत् कथितानित्यर्थः । कुम्भीस्वेदः "चि० ३२ अ०" मधुरौषधानि सू० ४२ अ० वेशवाराश्च सू० ४६ अ० कृतान्नवर्गे द्रष्टव्याः । निःक्षिपेत् वस्त्रखण्डे वर्त्त्याकारेण विन्यस्य निदध्यादित्यर्थः । अतन्द्रिता अतिस्थूलत्वादि दोषपरिहारेणानिःशेषं चतुरङ्गुलमात्रं प्रवेशयितुं कृताभिनिवेशाः नेह वेशवारानित्यनुपपन्नं तत्तद्द्रव्याणां दोषबलापेक्षिणा भागतारतम्येनानेकविधत्वादित्युन्नेयम् । पिचुं कार्पासतूलं तैलं वातहरतैलाक्तं पिचुविशेषणमेतत् । पथ्यानि वातहरद्रव्यसिद्धत्वेनोपयोगिकानि । पूरणानि बलातैलादीनि ॥ २७—२८ ॥

शोफेति । शीतं विधिं शतधौतघृतलेपनादिकम् । पञ्चकषायाः पञ्चक्षीरिद्रुमाः, राजवृक्षादिरारग्वधादिः "सू० ३८ अ०" द्रष्टव्यः । शोधन

बृहतीफलकल्कस्य हिहरिद्रायुतस्य च ।
कण्डूमतीमपस्पर्शां पूरयेद्धूपयेत् तथा ॥ ३१ ॥
वर्त्तिं प्रदद्यात् कर्णिन्यां शोधनद्रव्यसंभृताम् ॥ ३२ ॥
प्रस्रंसिनीं घृताभ्यक्तां क्षीरस्विन्नां प्रवेशयेत् ।
पिधाय वेशवारेण ततो बन्धं समाचरेत् ॥ ३३ ॥
प्रतिदोषं विदध्याच्च सुरारिष्टासवान् भिषक् ।
प्रातः प्रातर्निषेवेत रसोनादुद्धृतं रसम् ।
क्षीरमांसरसप्रायमाहारं विदधीत च ॥ ३४ ॥
शुक्रार्त्तवादयो दोषाः स्तनरोगाश्च कीर्त्तिताः ।
क्लैव्योत्थानानि मूढस्य गर्भस्य विधिरेव च ॥

---

द्रव्याणीह विमृश्य मिश्रकाद्युक्तान्यादेयानि । बृहतीति । बृहतीफलकल्कस्य पिण्डैः पूरयेत् । धूपयेत् "चि० ४० अ०" उक्तेन व्रणधूपनविधिनेति-शेषः ॥ २८—३४ ॥

माभूत् यथा कथञ्चित् योनिसम्बन्धित्वेन साम्यात् योनिव्यापत् संदृष्टाना मार्त्तवदोषादीनां चिकित्सितेनानेनोपशमो भविष्यतीत्येवं मन्द-धियां भ्रिप्रतिपत्तिरित्यभिसन्धायाह शुक्रेति । शुक्रार्त्तवशब्दावादियेषां शुक्रा-र्त्तवे आदीयेते एभिरिति वा 'उपसर्गे घोःकिः" इति पा० सू० ३।३।९२ को शुक्रार्त्तवादयः । अत्र स्तनरोगाणां योनिसम्बन्धित्वं "तासामेव प्रजा-तानां" इत्यादिना निदानोक्तेनाध्यवसितव्यम् । शुक्रार्त्तवादयोदोषाः प्रकृत-त्वात् शुक्रार्त्तवादिदोषप्रतीकाराः स्तनरोगाः "चि० १७ अ०" उपदिष्टा-स्तेते प्रतीकाराः । क्लैव्यादुत्तिष्ठन्त्येभिरिति क्लैव्योत्थानानि क्लैव्यचिकित्सि-तानि । गर्भिणी प्रतिरोगेषु गर्भिणीव्याकरणोपदिष्टेषु प्रत्येकशो गर्भिण्याः शूलादिषु रोगेषु चिकित्सा चोदाहृता इति । तैतेप्रतीकाराः तानि च चिकित्सितानि स च विधिः सर्वं चिकित्सेति । "त्वदादीनां मिथः सहोक्तौ

गर्भिणीप्रतिरोगेषु चिकित्सा चाप्युदाहृता ।
तां सर्व्वथा प्रयुञ्जीत योनिव्यापत्सु बुद्धिमान् ।
अपप्रजातारोगांश्च चिकित्सेदुत्तराद्भिषक् ॥ ३५ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे योनिव्यापत्प्रतिषेधो नामाष्टत्रिंशोऽध्यायः ॥ ३८ ॥

इति सुश्रुताचार्य्यविरचित आयुर्व्वेदशास्त्रे सुश्रुतसंहिताया-मुत्तरतन्त्रे कौमारभृत्यं तन्त्रं समाप्तम् ॥

---

यत्परं तत्(शिष्यते)" इति कात्यायन सूत्रेणैकशेषः । नेत्वादादितः शेषे पुंनपुंसकतो लिङ्गवचनानि" इति वार्त्तिकमाद्रियते । हेत्वपरपर्य्यायश्च सर्व्वथाशब्दः "सर्व्वथाहेतुबाढ़योः" इतिमेदिनी । तथाच बुद्धिमान् भिषक् सर्व्वथा हेतुतो हेतुमासाद्य तानि तान्यार्त्तवदोषादीन्यभिसमीक्ष्येति यावत् । ताः शुक्रार्त्तवदोषादिचिकित्साः प्रयुञ्जीतेत्यर्थः, एतेनैतदुक्तं भवति योनिव्यापत्सूत्पन्नास्तु चेदार्त्तव रोगाः दृश्यन्ते तर्हि "शा० २ अ०" उक्त मार्त्तवदोष चिकित्सितं कार्य्यमित्येतेन शेषं व्याख्यात प्रायमित्याहु-र्वयन्त्वत्र शुक्रदोषादि चिकित्सितातिदेशार्थोऽयमारम्भ इतिब्रूमः । दृश्यते हि व्यापन्नायां विशेषतस्तु पुत्रघ्नीसमाख्यायां योन्यां सम्भूतोगर्भः प्रायेण विपद्यते विपन्ने चाविपन्ने च गर्भे प्रजाता स्त्रियो नानाविधैर्विकारैरुपतप्यन्ते । तदिदानीं तासां प्रतीकारार्थं मिदमुच्यते अपेति । अपप्रजातेति विरुद्धा प्रजातं गर्भपातनादिरूपं प्रजनन मस्त्यस्या इत्यकारो मत्वर्थीयः चकारात् सुखं प्रजातारोगांश्चेत्यर्थः यथा योगं परिशिष्टं विधिमभिसमीक्ष्येत्युत्तरात् अतिरोहितार्थं मन्यत् ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये योनिव्यापत्प्रतिषेधोनामाष्टत्रिंशोऽध्यायः ॥

समाप्तञ्चेदं कौमारभृत्यभाष्यम् ॥